विभु प्रभु प्रथमं मेहनावतो बृहस्पते: सुविदत्राणि राध्या ||

इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विश: ||४२||

योऽवरे वृजने विश्वथा विभुर्महामु रण्व: शवसा ववक्षिथ ||

स देवो देवान्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पति: ||४३||

विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ||

अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ||४४||

उताशिष्ठा अनु श्रृण्वन्ति वह्नय: सभेयो विप्रो भरते मती धना ||

वीळुद्वेषा अनु वश ऋणमाददि: स ह वाजी समिथे ब्रह्मणस्पति: ||४५||

ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यत: ||

यो गा उदाजत्स दिवे वि चाभजन्महीव रीति: शवसासरत्पृथक् ||४६||

ब्रह्मणस्पते सुयमस्य विश्वहा राय: स्याम रथ्यो३वयस्वत: ||

वीरेषु वीराँ उप पृङ्ग्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥४७॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ॥

विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदेथ सुवीराः ॥४८॥

इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ॥

जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥४९॥

वीरेभिवीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना ॥

तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥५०॥

सिंधुर्न क्षोदः शिमीवाँ ऋघायतो वृषेंव वध्री रमि वष्ट्योजसा ॥

अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्पतिः ॥५१॥

तस्मा अर्षंति दिव्या असश्वतः सत्वभिः प्रथमो गोषु गच्छति ॥

अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥५२॥

तस्मा इद्विश्वे धुनयन्त सिंधवोऽच्छिद्रा शर्म दधिरे पुरूणि ॥

देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥५३॥

ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्त-मभ्यसत् ॥

सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥५४॥

यजस्व वीर प्र विहि महायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ॥

हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे ॥५५॥

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ॥

देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥५६॥

यो आस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ॥

उरुष्यतीमंहसो रक्षती रिषों३होश्चिदस्मा उरुचक्रिरद्भुतः ॥५७॥

तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ॥

इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥५८॥

इयं वां ब्रह्मणस्पते सुपृक्तिर्ब्रह्मेन्द्राय वज्रिणे अकारि ॥

आविष्टं धिंयो जिगृतं पुंरधीर्जजस्तमर्यो वनुषामरातीः ॥५९॥

चत्तों इतश्चत्तामुतः सर्वा भ्रूणान्यारुषी ॥

अराण्यं ब्रह्मणस्पते तीक्ष्णश्रृंगोदषन्निहि ॥६०॥

अदो यद्दारुप्लवते सिंधोः पारे अपूरुषं ॥

तदा रभस्व दुर्हणो तेन गच्छ परस्तरं ॥६१॥

अग्निर्येन विराजति सूर्यो येन विराजति ॥

विराज्येन विराजति तेनास्मान्ब्रह्मणस्पते विराज समदं कुरु ॥६२॥

इति ब्रह्मणस्पतिसूक्तं समाप्तम् ॥

III

गणपत्युपनिषत्

गणपत्यथर्वशीर्षम् ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा । भद्रं पश्येमाक्षभिर्यजत्राः॥

स्थिरैरंगैस्तुष्टवांसस्तनूभिः । व्यशेम देवहितं यदायुः॥१॥

ॐ स्वस्ति न इंद्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः॥ स्वस्तिनस्ताक्ष्यों अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु ॥२॥

ॐ शान्तिः शान्तिः शान्तिः॥ ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि॥ त्वमेव केवलं कर्तासि ॥ त्वमेव केवलं धर्तासि ॥ त्वमेव केवलं हर्तासि ॥ त्वमेव सर्वं खल्विदं ब्रह्मासि ॥ त्वं साक्षादात्मासि नित्यम् ॥१॥

ऋतं वच्मि॥ सत्यं वच्मि ॥२॥

अव त्वं माम् ॥ अव वक्तारम् ॥ अव श्रोतारम्॥ अव दातारम् । अव धातारम् ॥ अवानूचानमव शिष्यम् ॥ अव पश्चात्तात् ॥ अव पुरस्तात् ॥ अवोत्तरात्तात् ॥ अव दक्षिणात्तात् ॥ अव चोर्ध्वात्तात् ॥ अवाधरात्तात् ॥ सर्वतो मां पाहि पाहि समन्तात् ॥३॥

त्वं वाङ्मयस्त्वं चिन्मयः ॥ त्वमानन्दमयस्त्वं ब्रह्ममयः ॥ त्वं सच्चिदानन्दाद्वितीयोऽसि ॥ त्वं प्रत्यक्षं ब्रह्मासि ॥ त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४॥

सर्वं जगदिदं त्वत्तो जायते ॥ सर्वं जगदिदं त्वत्तस्तिष्ठति॥ सर्वं जगदिदं त्वयि लयमेष्यति॥ सर्वं जगदिदं त्वयि प्रत्येति ॥ त्वं भूमिरापोऽनलोऽनिलो नभः ॥ त्वं चत्वारि वाक्पदानि॥ ५॥

त्वं गुणत्रयातीतः ॥ त्वं देहत्रयातीतः ॥ त्वं कालत्रयातीतः ॥ त्वं अवस्थात्रयातीतः ॥ त्वं मूलाधारस्थितोऽसि नित्यम्॥ त्वं शक्तित्रयात्मकः ॥ त्वां योगिनो ध्यायन्ति नित्यम् ॥ त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवःस्वरोम् ॥६॥

गणादिं (गणादीन्) पूर्वमुच्चार्य वर्णादिं तदनन्तरम् ॥ अनुस्वारः परतरः॥ अर्धेन्दुलसितम् ॥ तारेण ऋद्धम् (रुद्धम्) ॥ एतत्तवमनुस्वरूपम् ॥ गकारः पूर्वरूपम् ॥ अकारो मध्यमरूपम् ॥ अनुस्वार-श्चान्त्यरूपम् ॥ बिन्दुरुत्तररूपम् ॥ नादः सन्धानम् ॥ सँहिता सन्धिः ॥ सैषा गणेशविद्या (गणेशीविद्या) ॥ गणक ऋषिः ॥ निचृद्गायत्री छन्दः॥ (मन्त्रा) गणपतिर्देवता॥ ॐ गं गणपतये नमः॥७॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ॥ तन्नो दन्ती (दन्तिः) प्रचोदयात् ॥८॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ॥ रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लम्बोदरं

शूर्पकर्णकं (सुकर्णं) रक्तवाससम् ॥
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् (मुत्तमम्) ॥
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥९॥
नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय (श्री) वरदमूर्तये नमः ॥१०॥
एतदथर्वशीर्षं योऽधीते ॥ स ब्रह्मभूयाय कल्पते ॥ स सर्वविघ्नैर्न बाध्यते ॥ स सर्वतः सुखमेधते ॥ स पञ्चमहापापात्प्रमुच्यते ॥ सायमधीयानो दिवसकृतं पापं नाशयति ॥ प्रातरधीयानो रात्रिकृतं पापं नाशयति ॥ सायं प्रातः प्रयुञ्जानो (अधीयानो) अपापो भवति ॥ सर्वत्राधीयानोऽपविघ्नो भवति ॥ धर्मार्थकाममोक्षं च विन्दति ॥
इदमथर्वशीर्षमशिष्याय न देयम् ॥ यो यदि मोहाद्दास्यति स पापीयान् भवति ॥ सहस्रावर्तनात् यं यं काममधीते तं तमनेन साधयेत् ॥ अनेन गणपतिमभिषिञ्चति स वाग्मी भवति ॥ चतुर्थ्यामनश्नञ्जपति स विद्यावान्भवति । इत्यथर्वणवाक्यम् ॥ ब्रह्मद्यावरणं विद्यात् ॥ न बिभेति कदाचनोति ॥ यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति ॥ यो लाजैर्यजति स यशोवान्भवति स मेधावान्भवति ॥ यो मोदकसहस्रेण यजति स वांच्छितफलवाप्नोति ॥
यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥ अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति ॥ सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति ॥ महाविघ्नात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥ महाप्रत्यवायात्प्रमुच्यते ॥ स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद ॥ इत्युपनिषत् ॥

इति गणपत्यथर्वशीर्षं समाप्तम् ॥

IV

गणेशपूर्वतापिन्युपनिषत् ।

ॐ नमो वरदाय विघ्नहर्त्रे ॥ अथातो ब्रह्मोपनिषदं व्याख्यास्यामः । ब्रह्मा देवानां सवितुः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । धाता वसूनां सुरभिः सृजानां ॥ नमो ब्रह्मणेऽथर्वपुत्राय मीढुषे ॥ धाता देवानां प्रथमं हि चेतो मनो वनानीव मनसाऽकल्पयद्यः । नमो ब्रह्मणे ब्रह्मपुत्राय तुभ्यं ज्येष्ठायाथर्वपुत्राय धन्विने ॥१॥

ॐ प्रजापतिः प्रजा असृजत । ताः सृष्ट्वा अब्रुवन् कथमन्नाद्या अभवन्निति । स त्रेधा व्यभजद्-भूर्भुवःस्वरिति । तपोऽतप्यत। स ब्रह्मा स विष्णुः स शिवः स प्रजापतिः सेन्द्रः। सोऽग्निः समभवत्। स तूष्णीं मनसा ध्यायन् कतमिमेऽन्नाद्याः स्युरिति। सोऽपश्यदात्मनाऽऽत्मानं गजरूपधरं देवं शशिवर्णं चतुर्भुजं। यतो वा इमानि भूतानि जायन्ते यतो वा यन्ति यत्रैव यन्ति च। तदेतदक्षरं परं ब्रह्म। एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुरापो ज्योतिः पृथिवी विश्वस्य धारिणी। पुरुष एवेदं विश्वं तपो ब्रह्म परामृतमिति ॥२॥

सोऽस्तुवत नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नमो वेदेभ्यो नमो देवेभ्यो नम ऋषिभ्यो नमः कुल्येभ्यः प्रकुल्येभ्यो नमः सवित्रे प्रसवित्रे नमो भोज्याय प्रकृष्टाय कपर्दिने चक्राय चक्रधरायान्नायान्नपतये शिवाय सदाशिवाय तुर्याय तुरीयाय भूर्भुवःस्वःपते रायस्पते वाजिपते गोपते ऋग्यजुःसामाथर्वाङ्गिरःपते नमो ब्रह्मपुत्रायेति ॥३॥

सोऽब्रवीद्वरदोऽस्म्यहमिति । स प्रजापति-रब्रवीत्कथमिमेऽन्नाद्याः स्युरिति । स होवाच ब्रह्मपुत्रस्तपस्तेपे सिद्धक्षेत्रे महायशाः। स सर्वस्य वक्ता सर्वस्य ज्ञातासीति । स होवाच तपस्यन्तं सिद्धारण्ये भृगुपुत्रं पृच्छध्वमिति। ते प्रत्याययुः। स होवाच किमेतदिति। ते होचुः कथं वयमन्नाद्या भवाम इति । स तूष्णीं मनसा ध्यायन् कथमिमेऽन्नाद्याः स्युरिति । स एतमानुष्टुभं मन्त्रराजमपश्यत् । यदिदं किञ्च सर्वमसृजत । तस्मात्सर्वमानुष्टुभमित्याचक्षते यदिदं किञ्च । अनुष्टुभा वा इमानि भूतानि जायन्ते । अनुष्टुभा जातानि जीवन्त्यनुष्टुभं प्रयन्त्यभिसंविशन्ति । तस्यैषा भवति-अनुष्टुप्प्रथमा भवत्यनुष्टुबुत्तमा भवति । वाग्वा अनुष्टुब्वाचैव प्रयन्ति वाचैवोद्यन्ति। परमा वा एषा छन्दसां यदनुष्टुप्। सर्वमनुष्टुप्। एतं मन्त्रराजं यः पश्यति स पश्यति। स भुक्तिं मुक्तिं च विन्दति। तेन सर्वज्ञानं भवति। तदेतन्निदर्शनं भवति। एको देवः प्रापको यो वसूनां श्रिया जुष्टः सर्वतोभद्र एषः। मायादेवो बलगहनो ब्रह्मारातीस्तं देवमीडे दक्षिणास्यम्। आ

तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सङ्गृभाय । महाहस्ती दक्षिणेन ॥ इति सहस्रकृत्वस्तुष्टाव ॥४॥

अथापश्यन्महादेवं श्रिया जुष्टं मदोत्कटम् । सनकादिमहायोगिवेदविद्भिरुपासितम् ॥ द्रुहिणादिम देवेशषट्पदालिविराजितम् । लसत्कर्णं महादेवं गजरूपधरं शिवम् ॥ स होवाच वरदोऽस्मीति । स तूष्णीं मनसा वव्रे । स तथेति होवाच । तदेष श्लोकः -

स संस्तुतो दैवतदेवसुनुः सुतं भृगोर्वाक्यमुवाच तृष्टः ।

अवेहि मां भार्गव वक्रतुण्डमनाथनाथं त्रिगुणात्मकं शिवम् ॥

अथ तस्य षडङ्गानि प्रादुर्बभूवुः । स होवाच जपध्वमानुष्टुभं मन्त्रराजं षट्पदं सषडक्षरम् । इति यो जपति स भूतिमान् भवतीति यूयमन्नाद्या भवेयुरिति । तदेतन्निदर्शनम् -

गणानां त्वा गणनाथं सुरेन्द्रं कविं कवीनामतिमेधविग्रहम् ।

ज्येष्ठराजं वृषभं केतुमेकं सा नः शृण्वन्नूतिभिः सीद शश्वत् ॥५॥

ते होचुः कथमानुष्टुभं मन्त्रराजमभिजानीम इति । स एतमानुष्टुभं षट्पदं मन्त्रराजं कथयाञ्चक्रे । स साम भवति । ऋग्वै गायत्रि यजुरुष्णिगनुष्टुप् साम । स आदित्यो भवति । ऋग्वै वसुर्यजू रुद्राः सामादित्या इति । स षट्पदो भवति । साम वै षट्पदः । ससागरां सप्तद्वीपां सपर्वतां वसुन्धरां तत्साम्नः प्रथमं पादं जानीयाद्रायस्पोषस्य दातेति । तेन सप्तद्वीपाधिपो भवति भूःपतित्वं च गच्छति । यक्षगन्धर्वाप्सरोगणसेवितमन्तरिक्षं द्वितीयं पादं जानीयान्निधिदातेति । तेन धनदादिकाष्ठापतिर्भवति भुवःपतित्वं च गच्छति । वसुरुद्रादित्यैः सर्वैर्देवैः सेवितं दिवं तत्साम्नस्तृतीयं पादं जानीयादन्नदो मत इति । तेन देवाधिपत्यं स्वःपतित्वं च गच्छति । ऋग्यजुःसामाथर्वाङ्गिरोगणसेवितं ब्रह्मलोकं तुर्यं पादं जानीयाद्रक्षोहण इति । तेन देवाधिपत्यं ब्रह्माधिपत्यं च गच्छति । वासुदेवादिचतुर्व्यूहसेवितं विष्णुलोकं तत्साम्नः पञ्चमं पादं जानीयाद्बलगहन इति । तेन सर्वदेवाधिपत्यं विष्णुलोकाधिपत्यं च गच्छति । ब्रह्मस्वरूपं निरञ्जनं परमव्योम्निकं तत्साम्नः षष्टं पादं जानीयात् । तेन वक्रतुण्डाय हुमिति यो जानीयात्सोऽमृतत्वं च गच्छति । सत्यलोकाधिपत्यं च गच्छति ॥६॥

ऋग्यजुःसामाथर्वाश्चत्वारः पादा भवन्ति । रायस्पोषस्य दाता चेति प्रथमः पादो भवति, ऋग्वै प्रथमः प्रादः । निधिदाताऽन्नदो मत इति द्वितियः पादः, यजुर्वै द्वितीयः पादः । रक्षोहणो वो बलगहन इति तृतीयः पादः, साम वै तृतीयः पादः । वक्रतुण्डाय हुमिति चतुर्थः पादः अथर्वश्चतुर्थः प्पादोऽथर्वश्चतुर्थः पाद इति ॥७॥

इति गणेशपूर्वतापिन्युपनिषत्सु प्रथमोपनिषत् ॥

स होवाच प्रजापतिरग्निर्वै वेदा इदं सर्वं विश्वानि भूतानि विराट् सम्राट् तत्साम्नः प्रथमं पादं जानीयात् । ऋग्यजुःसामाथर्वरूपः सूर्योऽन्तसदित्ये हिरण्मयः पुरुषस्तत्साम्नो द्वितीयं पादं जानीयात् । य ओषधीनां प्रभविता तारापतिः सोमस्तत्साम्नस्तृतीयं पादं जानीयात् ।

यो ब्रह्मा तत्साम्नश्चतुर्थं पादं जानीयात् । यो हरिस्तत्साम्नः पञ्चमं पादं जानीयात् । यः शिवः स परं ब्रह्म तत्साम्नोऽन्त्यं पादं जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति परं ब्रह्मैव भवति । तस्मादिदमानुष्टुभं साम यत्र क्वचिन्नाचष्टे । यदि दातुमपेक्षते पुत्राय शुश्रूषवे दास्यत्यन्यस्मै शिष्याय वेति ॥१॥

तस्य हि षडङ्गानि भवन्ति – ॐ हृदयाय नमः शिरसे स्वाहा, शिखायै वषट् कवचाय हुं । नेत्रत्रयाय वौषट्, अस्त्राय फडिति प्रथमं प्रथमेन द्वितीयं द्वितीयेन तृतीयं तृतीयेन चतुर्थं चतुर्थेन पञ्चमं पञ्चमेन षष्ठं षष्ठेन प्रत्यक्षरमुभयतो माया लक्ष्मीश्च भवति । माया वा एषा वैनायकी सर्वमिदं सृजति, सर्वमिदं रक्षति, सर्वमिदं संहरति, तस्मान्मायामेतां शक्तिं वेद । स मृत्युं जयति । पाप्मानं तरति । स महतीं श्रियमश्नुते । सोऽभिवादी षट्कर्मसंसिद्धो भवत्यमृतत्वं च गच्छति ।

मीमांसन्ते ब्रह्मवादिनो ह्रस्वा वा दीर्घा वा प्लुता वेति । यदि ह्रस्वा भवति सर्वपाप्मानं तरत्यमृतत्वं च गच्छति । यदि दीर्घा भवति महतीं श्रियमाप्नुयादमृतत्वं च गच्छति । यदि प्लुता भवति ज्ञानवान् भवत्यमृतत्वं च गच्छति ।

तदेतदृषिणोक्तं निदर्शनम् – स ईं पाहि य ऋजीषी तरुद्रः स श्रियं लक्ष्मीमौपलाम्बिकां गाम् षष्ठीं च यामिन्द्रसेनेत्युत आहुस्तां विद्यां ब्रह्मयोनिस्वरूपाम् ॥

तामिहायुषे शरणं प्रपद्ये । क्षीरोदार्णवशायिनं कल्पद्रुमाधःस्थितं वरदं व्योमरूपिणं प्रचण्डदण्डदोर्दण्डं वक्रतुण्डस्वरूपिणं पार्श्वाधःस्थितकामधेनुं शिवोमातनयं विभुम् । रुक्माम्बरनिभाकाशं रक्तवर्णं चतुर्भुजम् । कपर्दिनं शिवं शान्तं भक्तानामभयप्रदम् ॥ उन्नतप्रपदाङ्गुष्ठं गूढगुल्फं सपार्ष्णिकम् । पीनजङ्घं गूढजानुं स्थूलोरुंप्रोन्नमत्कटिम् ॥ निम्ननाभिं कम्बुकण्ठं लम्बोष्ठं लम्बनासिकम् । सिद्धिबुद्ध्युभयाश्लिष्टं प्रसन्नवदनाम्बुजम् ॥ इति संसर्गः ॥ २॥

अथ छन्दोदैवतम् । अनुष्टुप्छन्दो भवति, द्वात्रिंशदक्षरानुष्टुब् भवति । अनुष्टुभा सर्वमिदं सृष्टमनुष्टुभा सर्वमुपसंहृत शिवोमायुतः परमात्मा वरदो देवता ॥

ते होचुः कथं शिवोमायुत इति । स होवाच भृगुपुत्रः प्रकृतिपुरुषमयो हि स धनद इति, प्रकृतिर्माया पुरुषः शिव इति । सोऽयं विश्वात्मा देवतेति । तदेतन्निदर्शनम् – इन्द्रो मायाभिः पुरुहूत ईडे शर्वो विश्वं मायया स्विद्दधार । सोऽजः शेत मायया स्विद्गुहायां विश्वं न्यस्तं विष्णुरें विजज्ञे । तदेतन्माया हंसमयी देवानाम् ॥ सर्वेषां वा एतद्भूतानामाकाशः परायणम् । सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्ते जातानि जीवन्त्याकाशं प्रयन्त्यभिसंविशन्ति । तस्मादाकाशबीजं शिवो विद्यात् । तदेतन्निदर्शनम् – हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदिति ॥ ३॥

अथाधिष्ठानम् – मध्ये बिन्दुं त्रिकोणं तदनु ऋतुगणं वसुदलं द्वादशारं षोडशकर्णिकेति । मध्ये बीजात्मकं देवं यजेत् । वामदक्षिणे सिद्धिर्बुद्धिः । अग्रे कामदुधा षट्कोणे सुमुखादयः । षड्विनायकाः । वसुदले वक्रतुण्डाद्यष्टविनायकाः । द्वादशारे बटुको वामनो महादशकमहोदरौ सुभद्रो

माली वरो राम उमा शिवः स्कन्दो नन्दी । तद्बाह्येऽणिमादि सिद्धयः। षोडशारे दिक्पालाः सायुधा इति ॥४॥

अथ प्रसारः - य एतेन चतुर्थीषु पक्षयोरुभयोरपि । लक्षं जुहुयादपूपानां तत्क्षणाद्धनदो भवेत् ॥ सिद्धौदनं त्रिमासं तु जुह्वदग्नावनन्यधीः। तावज्जुह्वत्पृथुकान्हि साक्षाद्वैश्रवणो भवेत् ॥ उच्चाटयेद्विभीतैश्च मारयेद्विषवृक्षजैः । वश्याय पङ्कजैर्विद्वान्धनार्थी मोदकैर्हुनेत् एवं ज्ञात्वा कृतकर्मा भवति कृतकर्मा भवतीति ॥५॥

इति गणेशपूर्वतापिन्युपनिषत्सु द्वितीयोपनिषत् ॥

अथ होवाच भृगुपुत्रस्तन्त्रं विजिज्ञासितव्यमिति। मूले शून्यं विजानीयात् शून्यं वै परं ब्रह्म । तत्र सतारं समायं साम न्यसेत्त्रिरेखं भवति, त्रयो हीमे लोकास्त्रयो हीमे वेदा :। ऋग्वै भूः सा माया भवति। यजुर्वै भुवः स शिवो भवति। साम वै स्वः स हिरण्यगर्भो भवति। षट्कोणं भवति षड् हीमे लोकाः षड्ढा ऋतवो भवन्ति । तत्र तारमायारमामारविश्वेशधरणीक्रमान्न्यसेत् । अष्टपत्रं भवत्यष्टाक्षरा गायत्री भवति ब्रह्मगायत्रीं न्यसेत्। द्वाद्वशपत्रं भवति द्वादशादित्या भवन्ति ते स्वरा भवन्ति । स्वरान् ज्ञात्वादित्यलोकमश्नुते । षोडशपत्रं भवति षोडशकलो वै पुरुषो वर्णो ह वै पुरुषः स लोकाधिष्ठितो भवत्यनुष्टुब् वै पुरुषः॥१॥

स होवाच भृगुपुत्र एतमानुष्टुभं मन्त्रराजं साङ्गं सप्रसृतिकं समायं साधिष्ठानं सतन्त्रं यो जानाति स भूतिमान् भवति सोऽमृतत्वं च गच्छति सोऽमृतत्वं च गच्छतीति ॥२॥

इति गणेशपूर्वतापिन्युपनिषत्सु तृतीयोपनिषत् ॥

इत्याथर्वणीया गणेशपूर्वतापिन्युपनिषत्समाप्ता ॥

V

गणेशोत्तरतापिन्युपनिषत् ।

ॐ॥ ओमित्येकाक्षरं ब्रह्मेदं सर्वम् । तस्योपव्याख्यानम् ।

सर्वं भूतं भव्यं भविष्यदिति सर्वमोङ्कार एव । एतच्चान्यच्च त्रिकालातीतं तदप्योङ्कार एव। सर्वं ह्येतद्गणेशोऽयमात्मा ब्रह्मेति । सोऽयमात्मा चतुष्पात् । जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः। स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः। यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तिस्थान एकीभूतः प्रज्ञानघनं एवानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः । एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्। नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यलक्षणम चिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स गणेश आत्मा विज्ञेयः । सदोज्ज्वलो विद्यातत्कार्यहीनः स्वात्मबन्धरहितः सर्वदोषरहित आनन्दरूपः सर्वाधिष्ठानः सन्मात्रो निरस्ताविद्यातमोमोहमेवेति सम्भाव्याहमा तत्सत्परं ब्रह्म विघ्नराजश्चिदात्मकः सोऽहमा तद्विनायक परं ज्योती रसोऽहमित्यात्मानमादाय मनसा ब्रह्मणैकीकुर्यात् । विनायकोऽहमित्येतत्तत्त्वतः प्रवदन्ति ये। न ते संसारिणो नूनं प्रमोदो वै न संशयः॥ इत्युपनिषत्।

य एवं वेद स मुख्यो भवतीति याज्ञवल्क्य इति याज्ञवल्क्य इति। एतदेव परं ध्यानमेतदेव परं तपः। विनायकस्य यज्ज्ञानं पूजनं भवमोचनम्॥ अश्वमेधसहस्राणि वाजपेयशतानि च । एकस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम्॥

इति गणेशोत्तरतापिन्युपनिषत्सु प्रथमोपनिषत् ॥

ॐ॥ स विष्णुः स शिवः स ब्रह्मा सेन्द्रः सेन्दुः स सूर्यः स वायुः सोऽग्निः स ब्रह्मायमात्मने सर्वदेवाय आत्मने भूताय आत्मन इति मन्यन्ते । ॐ सोऽहं ॐ सोऽहं ॐ सोऽहमिति। ॐब्रह्मन् ॐब्रह्मन् ॐ ब्रह्मन्निति । ॐ शिवं ॐ शिवं ॐ शिवमिति। तं गणेशं तं गणेशमिदं श्रेष्ठम् । ॐ गणानां त्वा गणपतिः। सप्रियाणां त्वा प्रियपतिः। सनिधीनां त्वा निधिपतिः। ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्। ॐ तद्गणेशः। ॐ सद्गणेशः। ॐ परं गणेशः। ॐ ब्रह्म गणेशः।

गणनाकारो नादः। एतत्सर्वो नादः। सर्वाकारो नादः। एतदाकारो नादः। महान्नादः। स गणेशो महान् भवति। सोऽणुर्भवति। स वन्द्यो भवति। स मुख्यो भवति। स पूज्यो भवति। रूपवान् भवति। अरूपवान् भवति। द्वैतो भवति। अद्वैतो भवति। स्थावरस्वरूपवान् भवति। जङ्गमस्वरूपवान् भवति। सचेतनविचेतनो भवति। सर्वं भवति। स गणेशोऽव्यक्तो योऽणुर्यः श्रेष्ठः स वै वेगवत्तरः। अह्रस्वाह्रस्वश्च। अतिह्रस्वातिह्रस्वातिह्रस्वश्च। अस्थूला-स्थूलास्थूलश्च। ॐ न वायुर्नाग्निर्नाकाशो नापः पृथिवी न च। न दृश्यं न दृश्यं न दृश्यम्। न शीतं नोष्णं न वर्षं च। न पीतं न पीतं न पीतम्। न श्वेतं न श्वेतं न श्वेतम्। न रक्तं न रक्तं न रक्तम्। न कृष्णं न कृष्णं न कृष्णम्। न रूपं न नाम न गुणम्। न प्राप्यं गणेशं मन्यन्ते। स शुद्धः स शुद्धः स शुद्धो गणेशः। स ब्रह्म स ब्रह्म स ब्रह्म गणेशः। स शिवः स शिवः स शिवो गणेशः। इन्द्रो गणेशो विष्णुर्गणेशः सूर्यो गणेश एतत्सर्वं गणेशः। स निर्गुणः स निरहङ्कारः स निर्विकल्पः स निरीहः स निराकार आनन्दरूपस्तेजोरूपमनिर्वाच्यमप्रमेयः पुरातनो गणेशो निगद्यते। स आद्यः सोऽक्षरः सोऽनन्तः सोऽव्ययो महान्पुरुषः। तच्छुद्धं तच्छबलं ततः प्रकृतिमहत्तत्त्वानि जायन्ते। ततश्चा-हङ्कारादिपञ्चतन्मात्राणि जायन्ते। ततः पृथिव्या ओषधय ओषधीभ्योऽन्नमन्नाद्रेतस्ततः पुरुषस्ततः सर्वं ततः सर्वं ततः सर्वं जगत्। सर्वाणि भूतानि जायन्ते। देवा नु जायन्ते। ततश्च जीवन्ति। देवा नु जीवन्ति। यज्ञा नु जीवन्ति। सर्वं जीवति। स गणेश आत्मा विज्ञेयः। इत्युपनिषत्। य एवं वेद स मुख्यो भवतीति याज्ञवल्क्य इति याज्ञवल्क्य इति॥

इति गणेशोत्तरतापिन्युपनिषत्सु द्वितीयोपनिषत्॥

ॐ॥ गणेशो वै ब्रह्म तद्विद्यात्। यदिदं किञ्च सव भूतं भव्यं जायमानं च तत्सर्वमित्याचक्षते। अस्मान्नातः परं किञ्चित्। यो वै वेद स वेद ब्रह्म ब्रह्मैवोपाप्नोति। तत्सर्वमित्याचक्षते। ब्रह्मविष्ण्वादिगणाना- मीशभूतमित्याह तद्गणेश इति। तत्परमित्याह यमेते नाप्नुवन्ति पृथिवी सुवर्चा युवतिः सजोषाः। यद्वै वाङ् नाक्रामति मनसा सह नाग्निर्न पृथ्वी न तेजो न वायुर्न व्योम न जलमित्याह। नेन्द्रियं न शरीरं न नाम न रूपम्। न शुक्लं न रक्तं न पीतं न कृष्णमिति। न जाग्रन्न स्वप्नो न सुषुप्तिर्न वै तुरीया। तच्छुद्धमप्राप्यमप्राप्यं च। अज्ञेयं चाज्ञेयं च। विकल्पासहिष्णु तत्सशक्तिक गजवक्त्रं गजाकारं जगदेवावरुन्धे। दिवमनन्त शीर्षैर्दिशमनन्तकरैव्यामानन्त-जठरैर्मही मनन्तपादैः स्वतेजसा बाह्यान्तरीयान्व्याप्य तिष्ठतीत्याह। तद्वै परं ब्रह्म गणेश इत्यात्मानं मन्यन्ते। तद्वै सर्वतः पश्यति स्म न किञ्चिद्ददर्श। ततो वै सोऽहमभूत्। नैकाकिता युक्तति गुणान्निर्ममे। नाभे रजः स वै ब्रह्मा। मुखात्सत्त्वं स वै विष्णुः। नयनात्तमः स वै हरः।

ब्रह्माणमुपदिशति स्म ब्रह्मन् कुरु सृष्टिम् । ब्रह्मोवाच नाहं वेद्मि । गणेश उवाच मद्देहे ब्रह्माण्डान्तर्गतं विलोकय तथाविधामेव कुरु सृष्टिम् । अथ ब्रह्मा जन्मद्वारेण ब्रह्माण्डान्तर्गतं विलोकयति स्म । सनुद्यान् सरितः पर्वतान् वनानि महीं दिवं पातालं च नरान् पशून्मृगान्नागान् हयान् गोब्रजान् सूर्याचन्द्रमसो नक्षत्राण्यग्नीन् वायून्दिशस्ततो वै सृष्टिमचीकरत्। ततश्चात्मानमिति मन्यते स्म। न वै मत्तः परं किञ्चिदहमेव सर्वस्येश इति यावद्वदति तावत्क्रूरा अजायेरन् महद्देहा जिह्वया भुवं लिहाना दंष्ट्राव्याप्ताकाशा महच्छब्दा ब्रह्माणं हन्तुमुद्युक्ताः । तान्दृष्ट्वाबिभ्यत्तत्सस्मार । ततश्चाग्रे कोटिसूर्यप्रतीकाशमानन्दरूपं गजवक्त्रं विलोकयति स्म । तुष्टावाथ गणेश्वरम् । त्वं निर्माता क्ष्माभृतां सरितं सागराणां स्थावराणां जङ्गमानां च । त्वत्तः परतरं किञ्चिन्नैवास्ति जगतः प्रभो । कर्ता सर्वस्य विश्वस्य पाता संहारकारकः भवानिदं जगत्सर्वं व्याप्यैव परितिष्ठति ॥

इति स्तुत्वा ब्रह्माणं तदुवाच ब्रह्मंस्तपस्व तपस्वेत्युक्त्वाऽन्तर्हिते तस्मिन् ब्रह्मा तपश्चचार। कियत्स्वतीतेष्वनेहःसु तपसि स्थिते ब्रह्मणि पुरो भूत्वोवाच । प्रसन्नोऽहं प्रसन्नोऽहं वरान् वरय । श्रुत्वैवं वचोन्मील्य नयने यावत्पुरः पश्यति तावद्गणेशं ददर्श । स्तौति स्म । त्वं ब्रह्मा त्वं विष्णुस्त्वं गणेशः। त्वया व्याप्तं चराचरं। त्वदृते न हि किञ्चन। ततश्च गणेश उवाच। त्वं चाहं च न वै भिन्नौ कुरु सृष्टिं प्रजापते। शक्तिं गृहाण मद्दत्तां जगत्सर्जनकर्मणि ॥ ततो वै गृहीतायां शस्त्वा ब्रह्मणः सृष्टिरजायत। ब्राह्मणो वै मुखाज्जज्ञे बाह्वोः क्षत्रमूर्वोर्वैश्यः पद्भ्यां शूद्रश्चक्षुषो वै सूर्यो मनसश्चन्द्रमा अग्निर्वै मुखात्प्राणाद्वायुर्नाभेर्व्योम शीर्ष्णो द्यौः पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकानकल्पयन्निति। ततो वै सत्त्वमुवाच त्वं वै विष्णुः पाहि पाहि जगत्सर्वम्। विष्णुरुवाच न मे शक्तिः। सोवाच गृहाणेमां विद्याम्। ततो वै सत्त्वं तामादाय जगत्पाति स्म। हरमुवाच कुरु हर संहारम् । जगद्धरणाद्धरो भव । हरश्चात्मानमित्यवैति स्म न् वै मत्परं किञ्चिद्विश्वस्यादिरहं हर इति गर्वं दधौ । यावत्तावद्व्याप्तं व्योम गजवक्त्रैर्महच्छब्दैर्हरं हर्तुमुद्युक्तैः । हरो वै विलोक्य रुदति स्म । रोदनाद्रुद्रसंज्ञः। ततस्तं पुरुषं स्मृत्वा तुष्टाव त्वं ब्रह्मा त्वं कर्ता त्वं प्रधानं त्वं लोकान् सृजसि रक्षसि हरसि । विश्वाधारस्त्वमनाधारोऽनाधेयोऽनिर्देश्योऽप्रतर्क्यो व्याप्येदं सर्वं तिष्ठसीति स्तवनाद्विनायकं ददर्श । ततश्च तं ननाम । गणेश उवाच कुरु हर हरणम् तद्वै संहर्ताऽभूद्रुद्रः । य एवं वेद स गणेशो भवति । इत्युपनिषत् ॥

इति गणेशोत्तरतापिन्युपनिषत्सु तृतीयोपनिषत् ॥

ॐ ॥ गणेशो वै सदजायत तद्वै परं ब्रह्म । तद्विदाप्नोति परम् । तदेषाभ्युक्ता यदनादिभूतं यदनन्तरूपं यद्विज्ञानरूपं यद्देवाः सर्वे ब्रह्म ज्येष्ठमुपासते न वै कार्यं करणं न तत्समश्चाधिकश्च दृश्यः। सूर्योऽस्माद्भीत उदेति। वातोऽस्माद्भीतः पवते । अग्निर्वै भीतस्तिष्ठाति । सच्चित्स्वरूपं निर्विकारमद्वैतं च ।

तन्मायाशबलजनीत्याह । अनेन यथा तमस्ततश्चोमिति ध्वनिरभूत्। स वै गजाकारः। अनिर्वचनीया सैव माया जगद्बीजमित्याह। सैव प्रकृतिरिति गणेश इति प्रधानमिति च मायाशबलमिति च । एतस्माद्वै महत्तत्त्वम जायत । ततः कराग्रेणाहङ्कारं सृष्टवान् स वै त्रिविधः सात्त्विको राजसस्तामसश्चेति । सात्त्विकी ज्ञानशक्तिः । राजसी क्रियाशक्ति :। तामसी द्रव्यशक्तिः । तामस्याः पञ्चतन्मात्रा अजायन्त पञ्चभूतान्यजायन्त । राजस्याः पञ्च ज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्च वायवश्चाजायन्त । सत्त्विक्या दिशो वायुः सूर्यो वरुणोऽश्विनाविति ज्ञानेन्द्रियदेवताः अग्निरिन्द्रो विष्णुः प्रजापतिर्मित्र इति कर्मेन्द्रियंदेवताः । इदमादिपुरुषरूपम् । परमात्मनः सूक्ष्म शरीरमिदमेवोच्यते।

अथ द्वितीयम्। पञ्चतन्मात्राः पञ्चसूक्ष्म भूतान्युपादाय पञ्चीकरणे कृते पञ्चमहाभूतान्यजायन्त । अवशिष्टानां पञ्च पञ्चाशानां कल्पारम्भसमये भूतविभागे चैतन्यप्रवेशादहमित्यभिमानः। तस्मादादिगणेशो भवानुच्यते । ततो वै भूतेभ्यश्चतुर्दश लोका अजायेरन्। तदन्तर्गतजीवराशय स्थूलशरीरैः सह विराडित्युच्यते। इति द्वितीयम्।

राजसो ब्रह्मा सात्त्विको विष्णुस्तामसो वैहरः। त्रयं मिलित्वा परस्परमुवाच अहमेव सर्वस्येश इति। ततो वै परस्परमसहमानाश्चोर्ध्वं जग्मुः। तत्र न किञ्चिद्ददृशुः । ततश्चाधःप्रदेशे दशदिक्षु भ्रमन्तो न किञ्चित्पश्यन्ति स्म । ततो वै ध्यानस्थिता अभूवन्। ततश्च हृद्देशो महान्तं पुरुषं गजवक्त्रमसंख्यशीर्षमसंख्यपादमनन्तकरं ते जसा व्याप्ताखिललोकं ब्रह्ममूर्धानं दिक्श्रवणं ब्रह्माण्डगण्डं चिद्व्योमतालुकं सत्यजननं च जगदुत्पत्त्यपायोन्मेषनिमेषं सोमार्काग्निनेत्रं पर्वतेशरदं पुण्यापुण्योष्ठं ग्रहोडुदशनं भारतीजिह्वं शक्रघ्राणं कुलगोत्रांसं सोमेन कण्ठं हरशिरोरुहं सरिन्नदभुजमुरगाङ्गुलिकमृक्षनखं श्रीहृत्कमा काशनाभिकं सागरोदरं महीकटिदेशं सृष्टिलिङ्गकं पर्वतेशोरुं दस्रजानुकं जठरान्तः स्थितयक्षगन्धर्वरक्षःकिन्नरमानुषं पातालजङ्घकं मुनिचरणं कालाङ्गुष्ठकं तारकाजाललाङ्गुलं दृष्ट्वा स्तुवन्ति स्म। अतो वा इमानि भूतानि जायन्ते अतोऽग्निः पृथिव्यप्तेजो वायुर्यत्कराग्राद् ब्रह्मविष्णुरुद्रा अजायन्त यतो वै समुद्राः सरितः पर्वताश्च यतो वै चराचरमिति स्तवनात्प्रसन्नो भूत्वोवाचाऽहं सर्वस्येशो मत्तः सर्वाणि भूतानि मत्तः सर्वं चराचरं भवन्तो वै न मद्भिन्ना गुणा मे वै न संशयः। गुणेशं मां हृदि संचिन्त्य राजस त्वं जगत्कुरु सात्त्विक त्वं पालय तामस त्वं हरेत्युक्त्वान्तर्हितः। स वै गणेशः सर्वात्मा विज्ञेयः सर्वदेवात्मा वै स एकः। य एवं वेद स गणेशो भवति। इत्युपनिषत्॥

इति गणेशोत्तरतापिन्युपनिषत्सु चतुर्थोपनिषत् ॥

ॐ॥ देवा ह वै रुद्रमब्रुवन् कथमेतस्योपासनम्। स होवाच रुद्रो गणको निचृद्गायत्री श्रीगजगणपतेरेनं मन्त्रराजमन्योन्याभावात्त्रणवस्वरूपस्यास्य परमात्मनोऽङ्गानि जानीते स जानाति सोऽमृतत्वं च गच्छति। योऽधीते स सर्वं तरति। य एनं मन्त्रराजं गणपतेः सर्वदं नित्यं जपति सोऽग्निं स्तम्भयति स उदकं स्तम्भयति स वायुं स्तम्भयति स सूर्यं स्तम्भयति स सर्वोपद्रवान्स्तम्भयति। इत्युपनिषत्॥

य एनं मन्त्रराजं नित्यमधीते स विघ्नानाकर्षयति देवान्यक्षान् रोगान् ग्रहान्मनुष्यान् सर्वानाकर्षयति। स भूर्लोकं जयति स भुवर्लोकं जयति स स्वर्लोकं स महर्लोकं स जनोलोकं स तपोलोकं स सत्यलोकं स सप्तलोकं स सर्वलोकं जयति। सोऽग्निष्टोमेन यजते सोऽत्यग्निष्टोमेन स उक्थ्येन स षोडशीयेन स वाजपेयेन सोऽतिरात्रेण सोऽप्तोर्यामेण स सर्वैः क्रतुभिर्यजते। य एनं मन्त्रराजं विघ्नराजं नित्यमधीते स ऋचोऽधीते स यजूंष्यधीते स सामान्यधीते सोऽथर्वणमधीते सोंऽगरिसमधीते स शाखा अधीते स पुराणान्यधीते स कल्पानधीते स गाथा अधीते। स नाराशंसीरधीते स प्रणवमधीते। य एनं मन्त्रराजं गाणेशं वेद स सर्वं वेद स सर्वं वेद। स वेदसमः स मुनिसमः स नागसमः स सूर्यसमः सोऽग्निसम इति। उपनीतैकाधिकशतं गृहस्थैकाधिकशतं वानप्रस्थैकाधिकशतं रुद्र जापकसमम्। यतीनामेकाधिकशतमथर्वशिरःशिखाध्यापकसमम्। रुद्रजापकैकाधिकशतमथर्वशिरःशिखाध्यापकाधिकशतं गाणेशतापिनीयोपनिषदध्यापकसमम् मन्त्रराज जापकस्य यत्र रविसोमौ न तपतो यत्र वायुर्नक्षत्राणि न वाति भान्ति यत्राग्निर्मृत्युर्न दहति प्रविशति यत्र मोहो न दुःखं सदानन्दं परानन्दं समं शाश्वतं सदाशिवं परं ब्रह्मादिवन्दितं योगिध्येयं परमं पदं चिन्मात्रं ब्रह्मणस्पतिमेकाक्षरमेवं परमात्मानं गाणेशं वेद स सर्वं वेद स सर्वं वेद। बाह्यान्ते लब्धांशं हृदि समावेश्य किञ्चिज्जप्त्वा ततो न जपो न माला नासनं न ध्यानावाहनादि। स्वयमवतीर्णो ह्ययमात्मा ब्रह्म सोऽहमात्मा चतुष्पात्। बहिःप्रज्ञःप्रविविक्तभुक् तैजसः। यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। तत्रैकीभूतः प्रज्ञानघन एवानन्दभुक् चेतोमुखः प्राज्ञः। एष सर्वेश्वरः सर्वान्तर्यामी एष योनिः सर्वभूतानाम्। न बहिःप्रज्ञं नान्तःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनमव्यपदेश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतमेवं चतुष्पादं ध्यायन् स एवात्मा भवति। स आत्मा विज्ञेयः सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मबन्धरहितो द्वैतरहितो निरस्ताविद्या तमोमोहाहङ्कारप्रधानमहमेव सर्वमिति सम्भाव्य विघ्नराजब्रह्मण्यमृते तेजोमये परंज्योतिर्मये सदानन्दमये स्वप्रकाशे सदोदिते नित्ये शुद्धे मुक्ते ज्ञेश्वरे परे ब्रह्मणि रमते रमते रमते रमते। य एवं गणेशतापनीयोपनिषदं वेद स संसारं तरति घोरं तरति दुःखं तरति विघ्नांस्तरति महोपसर्गं तरति। आनन्दो भवति स नित्यो भवति स शुद्धो भवति स मुक्तो भवति स

स्वप्रकाशो भवति स ईश्वरो भवति स मुख्यो भवति स वैश्वानरो भवति स तैजसो भवति स प्राज्ञो भवति स साक्षी भवतीति । इत्युपनिषत् ॥

इति गणेशोत्तरतापिन्युपनिषत्सु पञ्चमोपनिषत् ॥

ॐ ॥ अथोवाच भगवती गौरी ह वै रुद्रमेतस्य मन्त्रराजस्यानुष्ठानविधिं मे ब्रूहीति । स होवाच रुद्रो विधिं लब्धांशं गुरुदेवतयोरालभ्य मनसा पुष्पं निवेद्योपक्रम्य भूतोत्सारणमासनबन्धाद्या-त्मरक्षासुनियमभूतशुद्धिप्राणस्थापनप्रणवावर्त नमातृपूजनान्तर्मा तृकान्तर्यागादि सम्पाद्यात्र केचन समन्त्रं मूलवैदिककल्पैरुपक्रमं ग्रहणसमर्पणनिवेदनानि बाह्येऽन्यथेति महार्घ्यं शङ्खः त्रिपाद्योर्गन्धादिना पूजितयोः स्थाप्य पात्रासादनं दक्षिणोपक्रमेण पाद्यार्घ्याचमनमधु-पर्कपुनराचमननिवेदनपात्राणि संस्थासु यथोपदिष्टं चतुर्थ्योः पर्वणि संस्थासु यथाविधि स्थाप्य निवेदने प्रक्षालनमेव ततोऽर्वाक् पञ्चामृतपात्राणि रिक्तं च मूलेनालभ्य निवेदिन्यार्घ्योदकेनात्मानं पात्राणि संभारं च प्रोक्ष्य पात्रातिरिक्तानि महार्घ्योदकेन सर्वनिवेदनं करशुद्धिं मूलासुनियमं यथोक्तर्षिच्छन्दोदैवतं स्मृत्वा विनियोगश्च नित्ये पूजाङ्गो जपो जपाङ्गा पूजा जप इत्यङ्गुष्ठव्यापकस्वान्तार्तीं ष्टाङ्गदण्डिमुण्डिन्यासादि कृत्वा मुखमवेक्ष्यात्मानं देवरूपिणं सम्भाव्य मूर्ध्नि पुष्पं दत्त्वा पीठं सम्पूज्यासनं दत्त्वा ऋष्यादि कृत्वा ध्यात्वा हृदयाम्भोजे योगिनोऽत्र जपन्ति स्वान्ताम्भोजाद्देवमावाह्य मुद्रां दर्शयित्वा देवस्य सकलीकरणाङ्गुष्ठहृदयार्पिन्या स्वान्ते मुद्रां निवेद्य पात्राणि च मूलेन दत्त्वा रिक्ते पञ्चामृतं संयोज्य तेन पञ्चवारं सकृद्वाऽभिषिच्य नित्येन संतर्प्य कल्पस्तवनादिपुरुषसूक्तरुद्राध्यारघोषशान्त्या-दिना मूलेन चाभिषिच्य सर्वपूजां निवेद्य दीपं त्रिर्भ्राम्य सव्येनाप्लाव्य महानैवेद्य पीठावरणान्युपसंहृत्य दर्शयेत् । ताम्बूलान्ते किञ्चिन्मूलमावर्त्य पुनर्धूपादित्रयभक्ष्यादि निवेद्य मुद्राः सर्वोपचारस्य दर्शयित्वा निवेदनमिदमासनं नमः पाद्ये एषोऽर्घ्यः स्वाहेति दक्षिणकरेऽर्घ्ये इदं स्वधेति पुरस्त्रिके मुखे नम इति स्नानेष्वेष गन्धो नमोऽक्षतेषु ॐ पुष्पाणि नमः पुष्पेष्वेष धूपो दीपो नमो धूपदीपयोः समर्पयामीति नैवेद्यफलताम्बूलेषु निवेदयामि नमो हिरण्ये एष पुष्पाञ्जलिर्नम इति मालायामिति परमं रहस्यमप्रकाश्यं बीजं य एवं वेद स सर्वं वेद स सर्वं वेद । वर्णार्थं लब्धांशेन मन्त्रार्थेन च पीठावरणदेवतावधानेन वा जपति स जपति । मुख्यं लब्धांशमासहं मृदुलं भुक्तरिक्तवासः कौसुम्भमाञ्जिष्ठरक्त कम्बलचित्रमृगव्याघ्राजिनं वा यथोक्त मुक्तान्यतरैरासनान्तरयोजनास्फटिककनकभद्रा क्षमणि - मुक्ताप्रवालरुद्राक्षकुशग्रन्थिषु वा जपति स जपति । कुशमयी नित्याक्षालनं चन्दनालेपो धूपेनाभिमन्त्र्य पृथगभिमन्त्रणं सद्योजातैः पञ्चभिः प्राणस्थापनजीवनतर्पणगुप्तानि च स्वमूले गुह्यं वामेन स्पृशेन्न दर्शयेत् । एवं श्रावणे पवित्रेणमधौ दमनेन जपमालया महानवम्यां तापस्यां चतुर्थ्यां तिललड्डुकैः सप्तम्यां शीतलचन्दनेन शिवरात्र्यां बिल्वदल

मालयाऽन्यस्मिन्पर्वणि महत्यार्चयन्ति तेऽर्चयन्ति मोदकपृथुकलाजसक्तुरम्भाफले क्षुनारीकला पूपानन्यानि च यथोपदिष्ट माहुतिभिर्जुहोति । जपंश्च प्राक्प्रवणे होमोऽन्यथोपास्यः । एवं यः करोति सोऽमृतत्त्वं विन्दति स प्रतिष्ठां प्राप्नोति मुक्तिं विन्दति भुक्तिं भुनक्ति वाचं वदति यशो लभते । इदं रहस्यं यो जानाति स जानाति योऽधीते सोऽधीते स आनन्दो भवति स नित्यो भवति स विशुद्धो भवति स मुक्तो भवति स प्रकाशो भवति स दयावान्भवति ज्ञानवान्भवत्यानन्दवान्भवति विज्ञानवान्भवति विज्ञानानन्दो भवति सोऽमृतत्वं भवत्यमृतत्वं भवतीति ॥

इति गणेशोत्तरतापिन्युपनिषत्सु षष्ठोपनिषत् ॥

इत्याथर्वणीया गणेशतापिन्युप-निषत्समाप्ता ॥

VI

हेरन्बोपनिषत् ।

अथातो हेरम्बोपनिषदं व्याख्यास्यामः । गौरी सा सर्वमङ्गला सर्वज्ञं परिसमेत्योवाच ।

अधीहि भगपन्नात्मविद्यां प्रशस्तां यया जन्तुर्मुच्यते मायया च ।

यतो दुःखाद्विमुक्तो याति लोकं परं शुभ्रं केवलं सात्त्विकं च ॥१॥

तां वै स होवाच महानुकन्पासिन्धुर्भुवनस्य गोप्ता ।

श्रद्धस्वैतद्गौरि सर्वात्माना त्वं मा ते भूयः संशयोऽस्मिन् कदाचित् ॥२॥

हेरम्बतत्त्वे परमात्मसारे नो वै योगान्नैव तपोऍं बलेन । नैवायुधप्रभावतो महेशि दग्धं पुरा त्रिपुरं देवयोगात् ॥३॥

तस्यापि हेरम्बगुरोः प्रसादाद्यथा विरिञ्चिर्गरुडो मुकुन्दः ।

देवस्य यस्यैव बलेन भूयः स्वं स्वं हितं प्राप्य सुखेन सर्वम् ॥४॥

मोदन्ते स्वे स्वे पदे पुण्यलब्धे सर्वैर्देवैः पूजनीयो गणेशः ।

प्रभुः प्रभूणामपि विघ्नराजः सिन्दूरवर्णः पुरुषः पुराणः ॥५॥

लक्ष्मीसहायोऽद्वयकुञ्जराकृतिश्चन्द्रकलाकलापः ।

मायाशरीरो मधुरस्वभावस्तस्य ध्यानात् पूजनात्तत्स्वभावाः ॥६॥

संसारपारं मुनयोऽपि यान्ति स वा ब्रह्मा स प्रजेशो हरिः सः ।

इन्द्रः स चन्द्रः परमः परात्मा स एव सर्वो भुवनस्य साक्षी ॥७॥

स सर्वलोकस्य शुभाशुभस्य तं वै ज्ञात्वा मृत्युमत्येति जन्तुः ।

नान्यः पन्था दुःखविमुक्तिहेतु : सर्वेषु भूतेषु गणेशमेकम् ॥८॥

विज्ञाय तं मृत्युमुखात् प्रमुच्यते स एवमास्थाय शरीरमेकम् ।

मायामयं मोहयतीव सर्वं स प्रत्यहं कुरुते कर्मकाले ॥॥

स एव कर्माणि करोति देवो ह्येको गणेशो बहुधा निविष्टः ।

स पूजितः सन् सुमुखोऽभिभूत्वा दन्तीमुखोऽभीष्टमनन्तशक्तिः ॥१०॥

स वै बलं बलिनामग्रगण्यः पुण्यः शरण्यः सकलस्य जन्तोः ।

तमेकदन्तं गजवक्त्रमीशं विज्ञाय दुःखान्तमुपैति सद्यः ॥११॥

लम्बोदरोऽहं पुरुषोत्तमोऽहं विघ्नान्तकोऽहं विजयात्मकोऽहं ।

नागाननोऽहं नमतां सुसिद्धः स्कन्दाग्रगण्यो निखिलोऽहमस्मि ॥१२॥

न मेऽन्तरायो न च कर्मलोपो न पुण्यपापे मम तन्मयस्य।

एवं विदित्वा गणनाथतत्त्वं निरन्तरायं निजबोधबीजम् ॥१३॥

क्षेमङ्करं सन्ततसौख्यहेतुं प्रयन्ति शुद्धं गणनाथतत्त्वम्।

विद्यामिमां प्राप्य गौरी महेशादभीष्टसिद्धिं समवाप सद्यः।

पूज्या परा सा च जजाप मन्त्रं शम्भुं पतिं प्राप्य मुदं ह्यवाप ॥१४॥

य इमां हेरम्बोपनिषदमधीते स सर्वान् कामान् लभते। स सर्वपापैर्मुक्तो भवति। स सर्वैर्वेदैर्ज्ञातो भवति । स सर्वैर्देवैः पूजितो भवति । स सर्ववेदपारायणफलं लभते । स गणेशसायुज्यमवाप्नोति य एवं वेद । इत्युपनिषत् ॥

इति हेरम्बोपनिषत् समाप्ता ॥



CHAPTER TWO

IN THE SMṚTI CONTEXT

Śukla-yajurveda (Mādhyandina, 16, 25) speaks of numerous Gaṇapatis:

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः।

Mahīdhara commenting on this line explains that the word gaṇa refers to distinct troops of celestial beings who attend upon the gods, and that the gaṇa-patis are the leaders or protectors of these troops:

देवानुचरा भूतविशेषा गणाः, गणानां पालकाः गणपतयः।

Mahābhārata in a significant passage (3, 150, 25) identifies the lords of the troops with 'great leaders' (vināyakas), who are also rulers of the worlds:

ईश्वराः सर्वलोकानां गणेश्वरविनायकाः।

And the epic speaks of the Vināyakas as essentially trouble- makers, who however refrain from mischief if they are first properly propitiated (3, 65, 23, 'na pūjā vighna-kartṛṇām athavā prathamam kṛtā'). They are grouped along with malevolent spirits like demons, fiends and goblins (12, 284, 131):

न राक्षसा न पिशाचा न भूता न विनायकाः।
विघ्नं कुर्युर्गृहे तस्य यत्रायं पठ्यते स्तवः॥

Hari-vaṁśa also gives the same list of trouble-shooters ('rākshasāś cha piśāchāś cha bhūtāni cha vināyakāh'). Bhāgavata (10th skandha, episode of Pūtanī-vadha) enlarges the list to include other evil spirits like ḍākinis, yātudhānis, kūshmāṇḍas, arbhaka-grahas, pretas and yakshas:

डाकिन्यो यातुधान्यश्च कूष्माण्डा
येऽर्भकग्रहाः।
भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः॥

They are all responsible for our misery, misfortune, loss, defeat and infamy. And the Smṛti manuals prescribe that the Vināyakas among them must be propitiated before undertaking any work of importance. Practical considerations must have weighed when the number of vināyakas (really a legion) was fixed at four or five. Mānava-gṛhya-sūtra (2, 14), for instance, enumerates only four of them as worthy of

worship: Śāla-kaṭaṅkata, Kūshmāṇḍa-rājaputra, Usmita and Deva-yajana. Baijavāpa-gṛhya-sūtra also speaks of four vināyakas, but names them differently: Mita, Sammita, Śāla- kaṭaṅkaṭa and Kūshmāṇḍa.

These spirits cause loss, obstacles, ill-luck and dangers; they also seize people and trouble them. Yājñavalkya-smṛti (1, 271-294) (around 300 A.D.), which mentions the four vināyakas, explains that they were the offsprings of Aṁbikā (mother-goddess) and that they were appointed by Brahmā and Rudra to preside over the groups of vināyakas. The text further points out that the four names belonged to the same vināyaka; and that in actuality there is but one Vināyaka. As offerings to this deity, the text mentions fish, meat, cakes, wine and radish (ibid, 287-289). Baudhāyana calls this Vināyaka Bhūtanātha and describes him as elephant-headed (hasti-mukha) and lord of obstacles (vighneśvara); he also prescribes 'apūpa' and 'modaka' as suitable offerings to this Vināyaka. Gobhila- smṛti (1, 13) calls this vināyaka 'Gaṇādhipa' and insists that he must be worshipped along with the mātṛkās before any rite is undertaken.

Baudhāyana-kalpa calls this Vināyaka king, lord of the worlds, master of all beings and the very personification of obstacles, and describes him as courageous, fierce, terrible, elephant- headed and bestower of boons; he is surrounded by male and female attendant-deities of obstacles.

ॐ भूपतये नमो भुवनपतये नमो भूतानां पतये नमः ॥

ॐ विनायकाय भूपतये नमो विनायकाय स्वाहा ।

ॐ विनायकाय भुवनपतये नमो विनायकाय स्वाहा।

ॐ विनायकाय भूतानां पतये नमो विनायकाय स्वाहा ॥

ॐ विघ्नाय स्वाहा

ॐ विनायकाय स्वाहा ।

ॐ वीराय स्वाहा ।

ॐ शूराय स्वाहा ।

ॐ उग्राय स्वाहा ।

ॐ भीमाय स्वाहा ।

ॐ हस्तिमुखाय स्वाहा ।

ॐ वरदाय स्वहा ।

ॐ विघ्नपार्षदेभ्यः स्वाहा ।

ॐ विघ्नपार्षदीभ्यः स्वाहा ॥



This Smṛti text prescribes that delicious sweet cakes (modaka) and another sweet preparation known as 'apūpa' must be offered to Vināyaka.





In the context of the smṛtis, worship of Vināyaka (or Gaṇādhi-pati) is usually resorted to while the mother-goddesses (mātṛkās) are propitiated. Gobhila-smṛti (1, 13), for instance, insists that 'mātṛkā-pūjā' and 'gaṇādhipa-pūjā' must precede all other rites. It is not accidental therefore that the earliest representations of Gaṇapati are in the panels of the seven mother-goddesses (sapta-mātṛkā) all over the country. Gaṇapati is shown at one end of the group while Śiva or Vīrabhadra is shown at the other end (see 'Sapta-mātṛkās' in Pratimā-kosha by the author, Vol.6).

Anushṭhāna-prakāśa (Paddhati-kāṇḍa, p.59) gives the following details of 'mātṛkā-pūjā', in which the worship of six vināyakas forms the first.

अथ मातृकापूजनम् । तत्र तावत् षड्विनायकपूजनम् । गोधूमादिधान्य पुंजेषु हरिद्रारंजितेषु षड्विनायकाः स्थाप्याः। तद्यथा मोदश्च प्रमोदश्च सुमुखो दुर्मुखस्तथा । अविघ्नो विघ्नकर्ता च षडेते विघ्ननायकाः ।

The six Vināyakas (Moda, Pramoda, Sumukha, Durmukha, Avighna and Vighna-kartā) are here required to be invoked in heaps of grains, wheat etc., even as the mātṛkās (Gaurī, Padmā, Śachī, Medhā, Sāvitrī, Vijayā, Jayā, Devasenā, Svadhā and Svāhā), who are described as 'mothers of the world' ('mātaro loka-mātarah'), are invoked in heaps of unbroken rice-grains or in betel-nuts ('akshata-puñjeshu pūgī-phaleshu vā niveśyāh'). Along with these 'loka-mātarah'; three 'kula-devatās' are also mentioned and propitiated: Hṛshṭi, Pushṭi and Tushṭi. The worship with sixteen services (shoḍaśopachāra-pūjā) is first offered to the six vināyakas reciting their names, even before the mātṛkās are invoked in the grain-heaps. Curiously, the Smṛti manual mentions that the mātṛkās are superior in status to Gaṇeśa, who apears to be different from the vināyakas ('gaṇeśenādhikā hyetā vṛddhau pūjyāś cha'), although before the names of the mātrkās are recited Gaṇeśa receives homage thus:

ॐ गणेशाय नमः । गणेशमावाहयामि ।
ॐ गौर्यै नमः । गौरीमावाहयामि ।
ॐ पद्मायै नमः । पद्मामावहयामि ।
etc.

Gaurī, who heads the list of mātṛkās and who is associated with Gaṇeśa, is an independent mother-goddess, not to be mistaken for Pārvati, the wife of Śiva in the Purāṇic age. However, this Gauri was later not only identified with Pārvatī but was looked upon as Gaṇeśa's mother. It is important to note that the Smṛti texts distinguish between Vināyakas (who are multiple in number) and Gaṇeśa as they do between the mātṛkās and Gaurī; the immediate association of the mātṛkās is not with the vināyakas but with Gaṇeśa (or Gaṇādhipati) through Gaurī. It is probable, however, that Gaṇeśa was the lord of the Vināyaka-gaṇa (who are described as 'vighna-nāyakas); and came to be recognized as the Vināyaka, (who was Vighneśvara rather than one of the vighna-nāyakas), even as Gauri was conceptualized not only as the main representative of the mātṛkās but as Aṁbikā, the mother of the mātṛkās.

The Smṛti texts recognize sixteen mother-goddesses headed by Gaurī ('gauryādi-shoḍaśa-mātṛbhyo namah'):

1-10 the ten mātṛkās (Gaurī and others) individually;

11 the ten mātṛkās collectively ('mātṛbhyo namah');

12 the ten mātṛkās regarded collectively as mothers of the world ('loka-mātṛbhyo namah'):



ॐ गणेशाय नमः।

मोदादि षड्विनायकेभ्यो नमः।

गौर्यादि षोडशमातृकाभ्यो नमः।

13-15 the three Kula-mātarah (Hṛshṭi, Pushṭi, Tushṭi) individually;

16 the three above deities collectively (kula-mātṛbhyo namah).

These are distinguished from the familiar sapta-mātṛkās (Brāhmī, Māheśvarī, Kaumāri, Vaishṇavī, Vārāhi, Indrāṇi and Chāmuṇḍā) who are here regarded as 'gross' in nature (sthūla-mātṛkās).

In the Smṛti manuals, it is usual to find an entire section devoted to the pacification of vināyakas as evil spirits (vaināyakī śānti). Yājñavalkya-smṛti (āchārādhyāya) tells us about the indications of the vināyakas possessing the human beings. A person seized by the vināyakas will dream that he is being drowned or swept away in water; he will dream about shaven heads, people wearing red or black garments, riding on carnivorous birds, being pursued by enemies or being surrounded by outcasts, donkeys and camels. He will be absent-minded or depressed without a reason; whatever he sets out to do will fail. The prince will not get the kingdom that he is heir to; the girl will not get married, a married woman will remain childless. The teacher will get no student, a student will not be able to study, the merchant fails to make profit; the farmer will be unable to cultivate to his satisfaction.

विनायकोपसृष्टस्य लक्षणानि निबोधत ।
स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति ॥
काषायवाससश्चैव क्रव्यादाश्चाधिरोहति ।
अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ॥
व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः ।
विमना विफलारम्भः संसीदत्यनिमित्ततः ॥
तेनोपसृष्टो लभते न राज्यं राजनन्दनः ।
कुमारी च न भर्तारमपत्यं गर्भमंगना ॥
आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा ।
वणिग् लाभं न चाप्नोति कृषिं चापि
कृषिवलः ॥

The ritual involves the placing of two icons, one of Vināyaka and the other of Ambikā, on a prepared and consecrated seat with the svastika sign inscribed on it. The two gāyatrīs to be recited while worshipping them are:

1. For Vināyaka:

ओं तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्ती प्रचोदयात् ॥

2. For Aṁbikā (Gaurī).

ओं सुभगायै विद्महे काममालिन्यै धीमहि ।
तन्नो गौरी प्रचोदयात् ॥

According to Aparārka and Hemādri, the vināyakas to be invoked on the heaps of rice and worshipped as surrounding these two deities are twenty-one in number: (1) Mita, (2) Sammita; (3) Śāla; (4) Kaṭaṁkaṭa; (5) Kūshmāṇḍa; (6) Rājaputra; (7) Vyomakeśa; (8) Pārvatī; (9) Bhīmaja; (10) Kṛshṇasya-pitā (the father of Kṛshṇa); (11) Arka; (12) Ara; (13) Sita; (14) Dhishaṇa; (15)

Kleda-putra; (16) Koṇa; (17) Lakshmavanta; (18) Vidhim-tuda; (19) Ketu; (20) Bāhuleya; and (21) Nandakasya-dhārī (the bearer of the sword called Nandaka). The association of Gaṇapati with the number twenty-one goes back to this ritual, where it is prescribed:

निर्वापकाले मिताय त्वेत्यादिभिरेकविंशति मन्त्रैः प्रत्येकं चतुरावृत्तैश्चतुरशीतिवारं निरूप्य

But during the subsequent ritual, the six vināyakas (Mita till Rājaputra) are distinguished from the remaining fifteen vināyakas (Vyomakeśa till Nandakasya-dhāri). Aparārka prescribes four offerings for the first six vināyakas together (samāsāṅgikārena āhuti-chatushṭayam ity aparārkah). This is the background for the view that the Vināyakas are four in number.

The ritual involves at the final stage offering of food on a winnow-basket, which is placed upon the kuśa-grass spread on the ground where four roads meet ('chatushpathe āstīrṇa-kuśeshu śūrpe nihitam upahāram'): the list includes not only rice pounded but once, rice mixed with sesasum and dough, but boiled fish, cooked and uncooked meat, three kinds of liquor, milk mixed with jaggery, honey and dough, radish, curds-rice, sweet pudding, and preparations like pūrikā, apūpa, uṇḍeraka-sraja and laḍḍukas:

सकृदवहतास्तण्डुलाः तिलपिष्टमिश्रौदनः पक्वमत्स्याः अपक्वाः माषविकारास्तदाकारा वा पक्वमपक्वं च मांसं तादृशमाष विकारौ वा चित्रं सुगन्धिपुष्पं चन्दनादिसुगन्धि द्रव्यं त्रिविधा सुरा गुडमधुपिष्टमिश्राणि ससैन्धवानि पात्रत्रयस्थितानि क्षीराणि वा मूलकं पूरिकाः अपूपाः उण्डेरकस्रजः दध्योदनः पायसं गुडमिश्रितं तण्डुलादिपिष्टं लड्डुकाः इत्युपहाराः ॥

This rich, delicious and variegated food-offering is made to Vināyaka and Aṁbikā separately. A prayer is finally addressed to Vināyaka, for the granting of good appearance, celebrity, wealth, progeny and fulfilment of all desires.

रूपं देहि यशो देहि भगं भगवन् देहि मे ।
पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ॥

A similar prayer is addressed to Aṁbikā (according to Bṛhat- parāśara); who is addressed as the mother of Gaṇeśa, and also as Gaurī.

सौभाग्यमम्बिके देहि भगं रूपं यशोऽपि च ।
श्रियं पुत्रांश्च कामांश्च तथा शौर्यं च देहि मे ॥
गणेशमातरं बाले यत्किञ्चिन्मदभीप्सितम् ।
एकनाम्नैव तद्देवि देहि गौरि वरान्मम ॥

There is an interesting myth regarding the origin of the Vināyakas (cf. dialogue between Prajāpāla and Mahātapa in Vāraha, cited Śabdakalpadruma, Vol.4, pp.401-2). The gods and the sages were once greatly concerned about the obstacles that abound for the good people, while the wicked accomplish their evil designs with ease and facility. They approached Śiva and begged him to create obstacles for the wicked folk. Śiva thereupon looked intently at Pārvatī; and while he was doing so a thought passed across his mind: the four elements (earth, water, fire and air) that make up the world have each of them forms, but the fifth element (ākāśa) which provides support for the other elements has no form. The thought caused a smile on his face. And from the flash of smile, a lovely boy issued forth illumining the four quarters and verily like another Rudra. As soon as he appeared, all the womenfolk assembled there were enchanted by him; even Pārvatī looked at him with a love-lorn glance. This made Śiva indignant and curse the boy to become elephant-headed, pot-bellied and decorated with serpents. His anger still unabated, he shook his body and there appeared around him countless vināyakas, all elephant-headed, dark-complexioned, terrible-looking and carrying a variety of weapons in their hands: the world was at once shaken and troubled by them.

विनायकैः क्ष्मा क्षुभिता बभूव ।

Brahmā, the creator, saw sense in this curious and marvellous occurrence, and explained that now ākāśa also had acquired a form. Śiva then addressed the boy who had sprung forth from his face (viz.smile): "Be thou the chief of these terrible vināyakas. Let your name be Gaṇeśa and your function to create obstacles in all undertakings, sacred and secular, unless you are propitiated first".

विनायको विघ्नकरो गजास्यो
गणेशनामा तु भवस्य पुत्रः ॥
एते च सर्वे त्वपयन्तु भृत्या
विनायकाः क्रूरदृशः प्रचण्डाः
उच्छुष्मदानादि विवृद्धदेहाः
कार्येष्वसिद्धिं प्रतिपादयन्तः ॥
भवांश्च वेदेषु तथा मखेषु
कार्येषु चान्येषु महानुभावात् ।
अग्रेषु पूजां लभतेऽन्यथा च
विनाशयिष्यथ कार्यसिद्धिम् ॥

It was on the fourth day of the month (chaturthī) that Gaṇeśa was consecrated as the chief of the Vināyakas; and hence it is the day that is dear to this deity.

According to Brahma-vaivarta-purāṇa (Gaṇapati-khaṇḍa, chap.44) Vināyaka was given eight names on the occasion: (1) Gaṇeśa (the lord of the troops; the master of wisdom and salvation); (2) Eka-danta (one-tusked; exceedingly strong); (3) Heramba (the protector of the orphans); (4) Vighna-nāyaka (the remover of

obstacles); (5) Lambodara (the full-bellied one, consuming all offerings made by Vishṇu and Śiva); (6) Śūrpa-karṇa (ears like winnow-baskets; fanning away obstacles); (7) Gaja-vaktra (elephant-faced); and (8) Guhāgraja (elder brother to Guha or Kārttikeya, son of Rudra; worshipped before all other gods are worshipped)

गणेशमेकदन्तं च हेरम्बं विघ्ननायकम् ।
लम्बोदरं शूर्पकर्णं गजवक्त्रं गुहाग्रजम् ॥

ज्ञानार्थवाचको गश्च णश्च निर्वाणवाचकः ।
तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम् ॥

एकशब्दः प्रधानार्थो दन्तश्च बलवाचकः ।
बलं प्रधानं सर्वस्मादेकदन्तं नमाम्यहम् ॥

दीनार्थवाचको हेश्च रम्बः पालनवाचकः ॥
परिपालक तं दीनानां हेरम्बं प्रणमाम्यहम् ॥

विपत्तिवाचको विघ्नो नायकः खण्डनार्थकः ।
विपत्खण्डनाकारं तं नमामि विघ्ननायकम् ॥

विष्णुदत्तैश्च नैवेद्यैर्यस्य लम्बोदरं पुरा ।
पित्रा दत्तैश्च विविधैर्वन्दे लम्बोदरं च तम् ॥

शूर्पाकारौ च तत्कर्णौ विघ्नवारणकारणौ ।
सम्पदास्फालरूपौ च शूर्पकर्णं नमाम्यहम् ॥

विष्णुप्रसादपुष्पं च यन्मूर्ध्नि मुनिदत्तकम् ।
तद्गजेन्द्रवक्त्रयुक्तं गजवक्त्रं नमाम्यहम् ॥

ओं क्ष्म्यैं ग्लौं गं चिन्तामणये रत्नगर्भाय महा गणेशाय स्वाहा ॥

(Ratna-garbha-gaṇapati)

कर्म वक्रतुण्डाय हुं स स स

(Vakratuṇḍa-gaṇapati)

ह्रीं गं ह्रीं क क क क महागणपतये ह ह ह ह ह स्वाहा स स स ॥

(Śakti-gaṇapati)

18. For all benefits (sarva-siddhi)

ओं नमो भगवते ग्लौं महागणपतये सिन्दूररञ्जिताय ओं श्रीं ह्रीं क्लीं सर्वजनसंरक्षकाय सर्वलक्ष्मीप्रदाय सर्वलोकवशीकरणाय क्रों क्रों क्रों आं आं आं क्लीं क्लीं क्लीं सकलराजमण्डलं मम वशमानय वशमानय सकलविषादि निवारणं कुरु कुरु रं रं रं ह्रां ह्रीं हुं क्षं सकलभूतप्रेतपिशाच ब्रह्मराक्षस यक्षिणी मोहिनी शूलिनी चतुः षष्टियोगिन्यादि सकलवेतालग्रहशाकिनी डाकिनी विध्वंसनं कुरु कुरु फ्रों फ्रों फ्रों सकलचोरभयं निवारय निवारय ठं ठं ठं शत्रुमण्डलं ध्वंसय ध्वंसय ग्लौं ग्लौं ग्लौं सकलविघ्नान्निध्वंसय निध्वंसय सौं श्रीं मम मनोरथं साधय साधय ओं श्रीं ह्रीं क्लीं श्री महागणपतये हुं फट् स्वाहा ॥

(Mahā-gaṇapati)

ओं आं ह्रीं क्रों ह्रीं ह्रः सकलकार्यकरी कुलवृद्धिकरी परमज्ञानकरी महाभयविनाशिनी मनोवाञ्छितदायिनी दुष्टग्रह निवारिणी विद्राविणी उन्मादिनी ज्वालिनी भञ्जनी मोहिनी त्रिजगद्व्यापिनी भूतकृतं कर्मकृतं पिशाचकृतं नाशय नाशय रक्ष रक्ष मां अचलं कुरु कुरु ह्रीं हुं हुं हुं ठं ठं ठं फट् स्वाहा ॥

अहो विघ्नेश्वर महागणेश स्फोटनाय सर्वविघ्नान्नाशय नाशय अकालमृत्युं जघान जघान वज्रहस्तेन छिन्दि छिन्दि परशुहस्तेन भिन्दि भिन्दि अहो गणाधिपते आगच्छागच्छ अवतरावतर श्रीरुद्रमाज्ञापय स्वाहा ॥

आं ह्रीं क्रों गणपते प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा ॥

In the lexicon of mantras, 'glauṁ' is regarded as the seed-syllable of earth (pṛthivī-bīja); 'klīṁ' the seed-syllable of desire (kāma-rāja-bīja); 'hrīṁ' māyā-bīja, 'kroṁ' aṅkuśa-bīja; 'a' pāśa-bīja; 'śrīṁ' lakshmī-bīja; 'glauṁ' also signifies staṁbhana; 'hūṁ' vidveshaṇa; 'svāhā' śānti; 'phaṭ' visarjana; 'vaushaṭ' ākarshaṇa; 'ṭhaṁ' māraṇa' and 'oṁ' is all speech and the principal deity.

In accordance with these various expectations of the devotee (viniyogas), iconic representations of the deity also became manifold. The source of iconic representation is deep and continuous contemplation on the contents of a mantra; visualization of the deity becomes possible only when the vitalized mantra begins to function. The tāntrik texts mention several (32, 26,21,16 or 8) forms of Gaṇapati as visual transformations of dhyāna-ślokas. The deity's colour, shape and size, number of its heads and hands,

ŚAKTI-HERAMBA-GAṆAPATI
(bronze, from Nepāl)



ŚAKTI-GAṆAPATI
(Stone, mutilated, from Khajurāho)

ŪRDHVA-GAṆAPATI

weapons carried in the hands, posture of body, presence of consorts and attendants and such other details are all aspects of visualization, and they have their own symbolisms. For instance, the following verses specify that the deity's colour must be in accordance with the objective with which Gaṇapati is worshipped:

पीतं स्मरेत् स्तम्भनकार्य एनं वश्याय मन्त्री
ह्यरुणं स्मरेत्तम् ।
कृष्णं स्मरेन्मारणकर्मणीशमुच्चाटने धूमनिभं
स्मरेत्तम् ॥
बन्धूकपुष्पादिनिधिं च कृष्टौ स्मरेद् बलार्थं
किल पुष्टिकार्ये।
स्मरेद्धनार्थी हरिवर्णमेतं मुक्तौ च शुक्लं
मनुवित्स्मरेत्तम् ।
एवं प्रकारेण गण त्रिकाल ध्यायञ्जपन्
सिद्धियुतो भवेत्सः ॥

In 'staṁbhana' (magical rites for arresting and paralysing the limbs of the enemy), the deity's colour must be yellow; in 'vaśya' (rites for subjugating people) rosy red; in 'māraṇa' (killing enemies by witchcraft), black, and in 'ucchāṭaṇa' (driving away people from their own fields by magical means) ashy grey. For 'kṛshṭi' (ākarshaṇa, charming people and possessing them) the deity's colour should be that of the bandhūka-flower; as also for obtaining strength and in rites of nourishment through magic (pushṭi). One who wants wealth must worship Gaṇapati of green colour, and for one who desires emancipation, the god must be of white complexion.

In tāntrik rites, when icons are not available, the deity may be invoked and worshipped in yantras and mandalas.

अभावे प्रतिमायाः यन्त्रं विलिख्य पूजयेत् ।

The yantra is looked upon as a brief representation of the deity as suggested by the etymological meaning of the word 'yantra' ('yantṛ sañkoche'). Made up of geometrical forms like the centre, triangle. circle, six-, eight- or twelve- sided figures. the deity is invoked in the centre of the yantra. The deity is here represented by seed-syllables (bījāksharas). which are specific to the deity, and which constitutue the mantra of the deity. Gaṇapati's basic seed-syllable is 'gaṁ'; it may also be 'glauṁ'.

Brahmānda-purāṇa (1,24-26) prescribes that Gaṇapati's yantra must be a square inscribed in ashṭa-gandha (sandal-paste with eight ingredients), or in red sandal-paste (rakta-chandana). It should have entrances on the four sides ('tatra vaināyakam yantram chatur-dvāra-virājitam, ashṭa-gandhena vilikhed rakta-chandanatopi vā'). In the four corners must be invoked Lakshmī and Nārāyaṇa, Pārvati and Śiva, Bhū and Varāha, and Rati and Manmatha.

The yantra for the worship of Gaṇapati must comprehend, according to Meru-tantra (17) the mystic circle of the letters

UCCHHISHṬA-GAṆAPATI-YANTRA



GAṆAPATI-YANTRA



MAHĀGAṆAPATI-YANTRA

of the alphabet as seed-syllables ('pūjā-yantram . gaṇeśasya mātṛkā-padmam uchyate'. It must be enclosed by three parallel lines constituting a square, with openings on four sides ('chatur-dvāra samāyuktam chaturaśra-trayāvṛtam'). Inside must be a six-angled figure enclosing a traingle ('tat-karṇikāyām shaṭ-koṇam tad antaś cha trikoṇakam').

Another yantra of Gaṇeśa is given as follows:

बीजं षट्कोणमध्ये स्फुरदनलपुरे तारकं दिक्षु
लक्ष्मी-
मायाकन्दर्पभूमीस्तदनुरसपुटेष्वालिखेद्वी-
जषट्कम् ॥
तत्सन्धिष्वङ्गमन्त्रान् वसुदलकमले
मूलमन्त्रस्य वर्णान् ।
शिष्टान् यन्त्रेषु विद्वान् विलिखतु
गुणशश्चान्त्यमन्त्ये पलाशे ॥
आवितं लिपिभिः क्रमोत्क्रम-
वशात्पाशाङ्कुशाभ्यामपि ।
भूबिम्बद्वितयेन वेष्टितमिदं यन्त्रं
गणाधीशितुः ॥
लाक्षाकुङ्कुमरोचनामृगमदैर्भूर्जोदरे हेम्नि वा ।
संलिख्याभिवहन् लभेत सकलैः
सम्प्रार्थनीयां श्रियम् ॥
उक्तं महागणपतेर्विधानं सुरपूजितम् ।
सर्वसिद्धिकरं पुंसां समस्तपुरुषार्थदम् ॥

Rudra-yāmala suggests a variant yantra:

सुषमे तु प्रदेशे तु निम्नोन्नतविवर्जिते ।
मृल्लिप्तं सुखदेशे तु पुष्पप्राकार शोभिते ॥१॥
पूजयेद्देवेदेवेशं गणेशं शंकरात्मकम्
(गिरिजात्मजम्) ।
भूर्जक्षौमेऽथ वा पट्टे यन्त्रराजं समुद्धरेत् ॥२॥
षडारं चक्रमालिख्य अष्टारं च ततोपरि ।
द्वादशारं पुनार्लिख्य षाडशारं ततोऽद्धरेत् ॥३॥
चतुर्विंशद्दलं पद्मं द्वात्रिंशद्दलबाह्यतः ।
पार्थिवं मण्डलमालिख्य वज्राष्टक-
विभूषितम् ॥४॥
तद्बाह्ये वारुणेनैव मण्डलेन विराजितम् ।
अष्टावरणमेतद्धि चक्रराजमनुत्तमम् ॥५॥
साध्यं प्रणवमध्यस्थं श्रीबीजं सम्पुटीकृतम् ।
मन्त्राङ्गानि षडारे च उद्धरेच्च यथाविधि ॥६॥
अष्टारे स्वरसंयुक्त युग्मयुग्मं च कल्पयेत् ।
कामराजं लिखेत्पश्चाद् द्वादशारे महोहरे ॥७॥
द्वादशस्वरभेदेन मूर्ध्नि बिन्दुविभूषितम् ।
ग्लौंकारं षोडशदले चतुर्विंशद्दले मनुम् ॥८॥
द्वात्रिंशत्पत्रके पद्मे लिपिवर्णान् न्यसेत्क्रमात् ।
पार्थिवे मण्डले चैव महेन्द्रं बीजमुत्तमम् ॥,॥

वेष्टयेद् वारुणेनैव यन्त्रराजं समुद्धरेत् ।
मायया वेष्टनं कत्वा अङ्कुशेन निरोधयेत् ॥१०॥

It is usual to write or inscribe inside a yantra one of the following root-mantras of Gaṇapati.

१. ॐ ॥
२. ॐ गं ॐ ॥
३. ॐ गं गणपतये नमः ॥
४. ह्रीं गं ह्रां गणपतये नमः ॥
५. ॐ वक्रतुण्डाय हुं ॥
६. ह्रीं श्रीं क्लीं गौं वरदमूर्तये स्वाहा ॥
७. ॐ ह्रीं श्रीं क्लीं नमो भगवते विनायकाय ॥
८. ॐ ह्रीं श्रीं क्लीं ग्लौं गः श्रीमहागणाधिपतये नमः ॥
९. ॐ नमः उच्छिष्टगणेशाय हस्ति-पिशाचिलिखे स्वाहा ॥
१०. वक्रतुण्डैकदंष्ट्राय क्लीं ह्रीं श्रीं गं ॥
११. ह्रां गं ह्रीं महागणपतये स्वाहा ॥

Sometimes one of the gaṇeśa-gāyatris is written:

१. ॐ एकदन्ताय विद्महे । लम्बोदराय
धीमहि । तन्नो दन्तिः प्रचोदयात् ॥
२. ॐ महाकर्णाय विद्महे । वक्रतुण्डाय
धीमहि । तन्नो दन्ती प्रचोदयात् ॥
३. ॐ तत्पुरुषाय विद्महे । वक्रतुण्डाय
धीमहि । तन्नो दन्ती प्रचोदयात् ॥

(Nārāyaṇopanishat 10,1)

४. ॐ एकदन्ताय विद्महे । वक्रतुण्डाय
धीमहि । तन्नो दन्ती प्रचोदयात् ॥

(Maitrāyaṇī-saṁhitā, 2,9,1,6)

५. ॐ. तत्कराटाय विद्महे । हस्तिमुखाय
धीमहि । तन्नो दन्तिः प्रचोदयात् ॥

(Maitrāyaṇīya-saṁhitā, 2,9,6)

Gaṇapati is also represented in Sarvato-bhadra-maṇḍala, a square within which 17 (Gaṇapati-bhadra) or 30 (Gaṇeśa-bhadra) parallel lines are drawn horizontally, vertically, forming several indu- khaṇḍas (lunar phases. three cells;) śṛṅkhalas (chains, four cells), vallis (creepers, nine cells). paridhis (moats) or ramparts, twenty cells), vāpis (tanks), eight-petalled lotuses (sixteen cells in the centre) and so on. The sarvato-bhadra-maṇḍala is so called because it presents identical aspects on all four sides. The areas demarcated are filled with colours, usually five in number ('rañjayet pañcha-varṇair maṇḍalam tan manoharam'): yellow (turmeric power). white (powdered rice), red (powdered kusuṁbha flower), black (burnt paddy-husk) and blue- black (obtained from bilva-leaves). The maṇdalas are used for placing the icons of Gaṇapati in worship (pūjādhāra-maṇḍala-viśesha). There are prescriptions concerning the preparation of these maṇḍalas :

1. Gaṇapati-bhadra-maṇḍala (Vighna-mardana):

अथातः संप्रवक्ष्यामि मण्डलं सर्वसिद्धिदम् ।
नाम्ना च विघ्नमर्दाख्यं विनायक व्रते
हितम् ॥१॥
तिर्यगूर्ध्वं सप्तदशरेखाः कार्याः सुशोभनाः ।



GAṆAPATI-MAṆḌALA

खण्डेन्दुस्त्रिपदः कोणे शृंखला च चतुष्पदैः ॥२॥
कार्या नवपदा वल्लीभद्रं रक्तं चतुष्पदम् ।
ततो विंशतिकोष्ठेषु कार्यो गणपतिः शुभः ॥३॥
कोष्ठद्वयेन मुकुटं गणेशस्य च कारयेत् ।
पीतश्च परिधिः कार्य पदैर्विंशतिभिस्तदा ॥४॥
मध्ये षोडशकोष्ठैश्च पद्मं कार्यं सुशोभनम् ।
सर्वतोभद्रदेवान् वै विशेषेणात्र योजयेत् ॥५॥

2. Gaṇesha-bhadra-maṇḍala

तिर्यगूर्ध्वरेखाः कार्यास्त्रिंशदृजुः शुभाः ।
कोणेन्दुखण्डस्त्रिपदैः श्वेतेन नवशृंखला ॥१॥
एकोनविंशद्वल्ली च कृष्णनीलेन पूरयेत् ।
भद्र चतुष्पदैश्चैव रक्तेनैकपदं त्यजेत् ॥२॥
तत्पदं च पदादूर्ध्वं त्रित्रिकेषु पदेषु च ।
कोणे कोणान्तराले च सितं तदधश्च वै ॥३॥
तिर्यगस्याधो ऽधास्तिर्यगेवं द्वादशकं पदे ।
रक्तवर्णेन संपूर्य तत्रस्थस्तु गजाननः ॥४॥
पदमेकं पदं हित्वोर्ध्वं द्वितीयो गजाननः ।
एवं चतुः प्रतिदिशं संख्या चैव षोडश ॥५॥
गणेशाद्यद्वयोर्मध्ये ऊर्ध्वं पञ्चसु वापिका ।
द्वित्रयोर्मध्यभागे तु लिङ्गं कृष्णाष्टकं ततः ॥६॥
वल्लीवापीद्वयोः पार्श्वे द्वयं लिङ्गं तु पूर्ववत् ।

तयोर्मध्ये गणेशस्य रक्तवर्णैश्चतुर्दिशम् ॥२॥
तदूर्ध्वं परिधिः कार्यः द्वात्रिंशत्पीतवर्णकः ।
मध्ये एकोनपञ्चाशत्पदे महागजाननः ॥८॥
पदानि त्ववशेषाणि सत्त्वेन च प्रपूरयेत् ।
एकविंशतिगणेशं मण्डलं तद्वतस्य च ॥९॥

The former maṇḍala has on each side of the square a Gaṇapati- sthāna (comprising of twenty cells in the middle) and two cells on top of this area known as the crown of Ganapati in the central portion. On each side of this area is a bhadra (four cells); adjoining the Gaṇapati area and the bhadra, forming a stepped pyramid, are a vallī (creeper, made up of nine cells) and a śṛṅkhalā (chain, four cells).

The central portion of the maṇḍala is also a square, comprising of a sixteen-celled inner square (called a lotus), in the midmost portion of which is the seat of Gaṇapati (four-celled square), and is surrounded by a paridhi or rampart (enclosure made up of twenty cells). From each side of this inner square enclosed by the rampart emanates the design above mentioned. At each of the four corners of the maṇḍala is an indu-khaṇḍa (lunar phase, three cells).

Thus, in this maṇḍala there are five gaṇapati-sthānas, one in the centre and one on each side of the maṇḍala.

The latter maṇḍala is more complicated, although the basic pattern is the same. On each side are five gaṇapati-sthānas (four towards the outer rampart and one adjoining the inner rampart); and are smaller than the central gaṇapati-sthāna. There are thus twenty-one gaṇapati-sthānas in this maṇḍala.

The tāntrik involvement in the ideology of Gaṇapati also becomes apparent in Gaṇapati symbolizing Kuṇḍalinī energy in all beings. It is well-known that the Devī, the matrix of the entire universe, appears as Kuṇḍalinī in the microcosm. The being is equipped with six psychic centres called chakras, comprehending not only the details of individual constitution but also the fundamental components of all speech; the centres also correspond with six deities.

1. Mūladhāra (four-petalled lotus) : located in the private parts (guhya-sthāna) representing bone (asthi-dhātu); symbolizing the earth element and letters of the alphabet (varṇa-mātṛkās), व and स; and presided over by Gaṇapati;

2. Svādhishṭhāna (six petals) : root of penis (liṅga-mūla), fat (medas); fire element ब and ल : Brahmā

3. Maṇi-pūra (ten petals) ; navel (nābhi); flesh (māṁsa); water element ड and फ; Vishṇu;

4. Anāhata (twelve petals) : heart (hṛdaya) blood (asṛk); air element क and ठ; Rudra.

5. Viśuddha (sixteen petals) : throat (kaṇṭha) : skin (tvak); ākāsa element; अ and आः ; jīvātmā;

6. Ājñā (two petals) : eye-brows meet (bhrū-madhya); bone-marrow (majja); ह and क्ष; paramātmā.

Beyond the reach of these six lotuses or chakras is the sahasrāra, the thousand petalled lotus where Śiva as pure consciousness-bliss abides transcendentally. Śakti, the feminine counterpart of Śiva, dwells in the basal centre, mūlādhāra ('mūlādhāre vasech chaktih sahasrāre



The six chakras through which Kuṇḍalinī traverses. The bottom-most is Mūlādhara, which is the abode of Kuṇḍalinī; it is the region where Gaṇapati resides.



PAÑCHA BHŪTĀTMA-GAṆAPATI

sadāśivah'). Śakti is prakṛti and Śiva purusha. It is in mūlādhāra that the source of body, mind and speech is hidden ('tri-vidham kāya-vāk-chittam guhyam ity abhidhīyate')

Within the mūlādhāra-chakra is the triangle (trikoṇa), within which is the seed of desire (kāma-bīja), which is fundamental to all manifestation, transformation and dissolution. This seed occurs in the forms of self-manifest linga, the top portion of which is the aspect of pure and undifferentiated consciousness (chit-kalā). Entwining this liṅga in three and a half circles is the bright Kuṇḍalinī, the energy. The coiled Kuṇḍalinī is the power that creates the worlds and illumines the universe. Gaṇapati is identified with Kuṇḍalinī, his curved trunk (vakra-tuṇḍa) suggesting the coils, and the snake around his belly showing the serpentine nature of the energy.

गुदाद् द्वयगुलमूर्ध्वं तु लिङ्गादेकांगुलादधः
मूलाधारस्त्रिकोणाभं चतुर्दलमरोरुहं ।
वशषसाक्षरे युक्तं लसदोंकारकर्णिकम्
तत्रस्थं वलभीरम्यं गणेश्वरमुपास्महे ।।

The mūlādhāra-chakra represents the earth element, the seed syllable of which is 'glauṁ', and Gaṇapati's icons are mostly prescribed to be made in clay, and his seed-syllable is 'gaṁ'. In the scheme of correspondance between the six chakras and the enclosures of Śrī-chakra, the mūlādhāra is the bhū-pura (the outer-most enclosure, square in form, and three-fold in nature), which is also called Trailokya-mohana. A popular form of Gaṇapati in the tāntrik practice is Trailokya-mohana-gaṇapati.

According to <u>Rudra-yāmala</u> (17, 10), Kuṇḍalinī not only creates the world but manifests herself as fifty letters of the alphabet (अ to क्ष). She is of the form of sound, and the letters are the mātṛkās (pañchāśad-varṇa-rūpiṇī). The transcendental reality which is undifferentiated existence-awareness-bliss (sacchidānanda--vibhava) transforms itself initially as a deity (sa-guṇa- parameśvara). From this proceeds the transcendental nucleus, known as parā-bindu, which in turn gives rise to immanent nucleus (viz. Śiva), or aparā-bidu. Along with this immanent nucleus, appear primordial sound called 'nāda' and primeval seed called 'bīja' (viz. Śakti). The primordial sound is regarded as the result of union of Śiva and Śakti. The

sound occurs in all beings as mere awareness and initial energy. This is technically known as Kuṇḍalinī, an urge of the transcendental speech (parā-vāk), located in the mūlādhāra centre. It rises up differentiating itself as 'perceptive' (paśyantī) at the level of svādhishṭhāna (navel) centre when the same sound-energy reaches the anāhata (heart) centre, it becomes 'midling' (madhyamā) and at the viśuddha (throat) centre, it is known as expressive speech (vaikharī).

We read in Ṛgveda (1,164, 45)

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥

The three caverns (guhā) mentioned here are the mūla-sthāna (guhya), where subtlest soul abides, the nābhi-sthāna where 'paśyantī' arises, and the hṛdaya where 'madhyamā' takes shape. Beyond that is the throat where human speech manifests itself.

It is at this stage that the fifty letters of the alphabet get formed. The vowels known as mātṛkās (matrices) represent Śakti, while the consonants known as varnas are of Śiva's nature. When the two unite, we get the seed-syllables (bījāksharas). The Śakti is represented by the bindu (the articulation of 'aṁ'), without which there can be no formation of the seed-syllables ('bindu- yogam vinā bījatvāyogāt).

Kuṇḍalinī is identified with Oṁkāra or praṇava, which is all speech, and which comprehends all the letters and all things of the universe. It is the śabda-brahma in mūlādhāra.

ओंकार एव सर्वा वाक् । सैषा
स्पर्शोष्मभिर्व्यज्यमाना वह्वी नानारूपा
भवति ॥

(स्पर्श covers the consonants क to म, while ऊष्म stands for श, ष, स and ह)

This is how gaṇapati is identified with Oṁkāra; his trunk is said to assume the form of praṇava. Gaṇapati being the deity presiding over the mūlādhāra centre, he is regarded as basic to the composition of all things by the five elements (pañcha-tattvātmika). Mūlādhāra has four petals, and all the petals are red in colour. This is the background of the association of red colour with Gaṇapati. The body of Gaṇapati is mostly red; and the devotees of Gaṇapati (viz. the gāṇapatyas) wear marks of red-sandal paste on their forehead and wear red garments during worship. Red flowers are especially sacred to Gaṇapati. The noose (pāśa) that the deity carries in one of his hands symbolizes desire and attachment, which is imagined as red in colour (rāga-svarūpa-pāśa); the goad (aṅkuśa)

which goes with it is also red in colour, as it symbolizes anger (dveshāṅkuśa)

When the tāntrik cults spread in the neighbouring countries, Gaṇapati also travelled abroad, but only as a minor deity. He never achieved the importance that was accorded to him in India, but the tāntrik forms in which he was represented outside the country are more numerous and interesting. There are also several spells (dhāraṇīs) by which he was invoked for magical ends. In the regions where the tāntrik forms of Buddhism were prevalent (like Nepal, Tibet, Mongolia, China and Japan), he was regarded as a form of bodhisattva or as a guardian of shrines. Sometimes, he was identified with the Buddha, one of whose appellations was Vināyaka, 'an extraordinary leader of mankind'. He was also regarded as a patron-god of learning, especially scriptural learning.

In countries, into which Indian populations migrated and where they made settlements (like Thailand, Cambodia, Champā, Jāwā, Bāli and Borneo), Gaṇapati also arrived, retaining his yaksha character. Numerous icons of Gaṇapati-vināyaka are available in these countries and it is probable that this god was widely worshipped. But they all possess an iconographic distinction, suggesting tāntrik involvement (like magic and sorcery).



Stone, from Padmanābha-svāmi temple, Trivandrum

EXCERPTS FROM ŚĀRADĀ-TILAKA-TANTRA
(13th Paṭala)

अथ वक्ष्ये गणपतेर्मन्त्रान् सर्वार्थसिद्धिदान् ।
यान् लब्ध्वा मानवा नित्यं साधयन्ति
मनोरथान् ॥१॥
पञ्चान्तकं शशिधरं बीजं गणापतेर्विदुः ।
गणकः स्यान्मुनिश्छन्दो निचृद्विघ्नोऽस्य देवता ॥२॥
षड्दीर्घभाजा बीजेन कुर्यादङ्गक्रियां मनोः ॥३॥
सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दन्तं पाशाङ्कुशेष्टान्युरुकरविलसद्बीजपूराभिरामम्
बालेन्दुद्योतिमौलिं करिपतिवदनं दानपूरार्द्रगन्डं
भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्रा-
ङ्गरागम् ॥४॥
वेदलक्षं जपेन्मन्त्रं दशांशं जुहुयात्ततः ।
मोदकैः पृथुकैर्लाजैः सक्तुभिश्चेक्षुपर्वभिः ॥५॥
नारिकेलैस्तिलैः शुद्धैः सुपक्वैः कदलीफलैः ।
अष्ट द्रव्याणि विघ्नस्य कथितानि मनीषिभिः ॥६॥
तीव्रादिशक्तिभिर्युक्ते पीठे विघ्नेश्वरं यजेत् ।
तीव्राख्या ज्वालिनी नन्दा भोगदा काम-
रूपिणी ॥७॥
उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ।
सर्वादिशक्तिकमलासनाय हृदयावधिः ॥८॥
पीठमन्त्रोऽयमेतेन प्रदद्यादासनं विभोः ।
मूलेन मूर्तिं सङ्कल्प्य तस्यां विघ्नेश्वरं यजेत् ॥।॥
कर्णिकायां चतुर्दिक्षु प्रथमं पूजयेदिमान् ।
गणाधिपं गणेशानं तृतीयं गणनायकम् ॥१०॥
गणक्रीडं पीतगौररक्तनीलरुचः क्रमात् ।
सर्वान्निगेन्द्रभूषाद्यान् भक्ष्यलक्षितपुष्करान् ॥११॥
यथापूर्वं ततोऽभ्यर्च्य केसरेष्वङ्गदेवताः ।
पत्रमध्येषु विधिवद्वक्रतुण्डादिकान् यजेत् ॥१२॥
वक्रतुण्डमेकदंष्ट्रं महोदरगजाननौ ।
लम्बोदराख्यं विकटं विघ्नराजमनन्तरम् ॥१३॥
धूम्रवर्णं दलाग्रेषु ब्राह्म्याद्याः पूजयेत्ततः ।
लोकपालांस्तदस्त्राणि देवमित्थं समर्चयेत् ॥१४॥
सिद्धमन्त्रः प्रकुर्वीत प्रयोगान् कल्पजोदितान् ।
तर्पयेत्सलिलैः शुद्धैर्दिनशो गणनायकम् ॥१५॥
चतुश्चत्वारिंशदाद्यं चतुःशतमतन्द्रितः ।
प्राप्नुयान् मण्डलादर्वागभीष्टमधिकं नरः ॥१६॥
नारिकेलैः कृतो होमश्चतुर्थ्यां श्रीप्रदो भवेत् ।
शुक्लपक्षप्रतिपदमारभ्य दिनशः सुधीः ॥१७॥
चतुर्थ्यन्तं नारिकेलसक्तु लाजतिलैः क्रमात् ॥
चतुःशतं प्रजुहुयाद्वश्याः स्युः सर्वजन्तवः ॥१८॥
सतिलैस्तण्डुलैर्होमो लक्ष्मीवश्यप्रदो भवेत् ।
लाजैस्त्रिमधूरोपेतैर्होमः कन्यां प्रयच्छति ॥१॥
अनेन विधिना कन्या वरमाप्नोति वञ्छितम् ।
आच्याक्तहविषा होमः साधयेदीप्सितं
नृणाम् ॥२०॥
दध्ना विलोलितैर्लोणैर्होमो निशि चतुर्दिनम् ।
संवादं कुरुते तद्वद्वश्यं वितनुते सदा ॥२१॥
श्वेतार्कभवमूलेन रक्तचन्दनदारुणा ।
इभभग्नेन निम्बेन दन्तिदन्तेन वा कृतम् ॥२२॥

विघ्नेश्वरं समभ्यर्च्य शीतांशुग्रहणे जपेत् ।
स्पृष्ट्वा मन्त्री निराहारस्तं शिखायां समुद्वहन् ॥२३॥
युद्धेषु व्यवहारादौ विजयश्रियमाप्नुयात् ।
मन्त्रेणाऽनेन संजप्ता रोचना मदसंयुता ॥२४॥
तिलकक्रियया सर्वान् वंश नयति मानसान् ।
अनुलोमविलोमस्थबीजे नाम समालिखेत् ॥२५॥
नवनीते समभ्यर्च्य स्पृष्ट्वा प्रणमनुं जपेत् ।
अष्टोत्तरशतं भूयो मूलमत्रं प्रजप्य तत् ॥२६॥
भक्षयेन्मौनमास्थाय यामिन्यां सप्तवासरम् ।
स वश्यो जायते शीघ्रं साधकस्य न संशयः ॥२७॥
श्रीशक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत् ।
ङेऽन्तं गणपतिं पश्चाद्वरान्ते वरदं पठेत् ॥२८॥
उक्त्वा सर्वजनमेतं वशमानय ठद्वयम् ।
अष्टाविंशतीत्यक्षरोऽयं ताराद्यो मनुरीरितः ॥२९॥
गणकः स्यादृषिश्छन्दो गायत्री निवदन्विता ।
महागणपतिः प्रोक्तो देवता देववन्दिता ॥३०॥
षड्बीजस्थस्वबीजेन दीर्घभाजा प्रकल्पयेत् ।
षडङ्गानि मनोरस्य यथाविधि विधानवित् ॥३१॥
नवरत्नमयं द्वीपं स्मरेदिक्षुरसाम्बुधौ।
तद्वीचिधौतपर्य्यन्तं मन्दमारुतसेवितम् ॥३२॥
मन्दारपारिजातादि कल्पवृक्षलताकुलम् ।
तद्भूतरत्नच्छायाभिररुणीकृतभूतलम् ॥३३॥
उद्यद्दिनकरेन्दुभ्यामुद्भासितदिगन्तरम् ।
तस्य मध्ये पारिजातं नवरत्नमयं स्मरेत् ।
ऋतुभिः सेवितं षड्भिरनिशं प्रीतिवर्धनैः ॥३४॥
तस्याऽधस्तान्महापीठे रचिते मातृकाम्बुजे ।
षट् कोणान्तस्त्रिकोणस्थं महागणपतिं
स्मरेत् ॥३५॥

हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसा-
दाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया
सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहन्तं
भजे ॥३६॥

गण्डपालीगलद्दानपूरलालसमानसान् ।
द्विरेफान् कर्णातालाभ्यां वारयन्तं मुहुर्मुहुः ॥३७॥
कराग्रधृतमाणिक्यकुम्भवक्त्रविनिःसृतैः ।
रत्नवर्षैः प्रीणायन्तं साधकान्मदविह्वलम् ॥३८॥
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम् ।
ध्यायन्मन्त्रं जपेन्मन्त्री चतुर्लक्षं समाहितः ॥३८॥
चतुःसहस्रसंयुक्तं चत्वारिंशत्सहस्रकम् ।
दशांशं जुहुयाद् द्रव्यैरष्टाभिर्मोदकादिभिः ॥३॥
तर्पयेद्दिनशो नित्यं प्रागुक्तेनैव वर्त्मना।
प्रागुक्ते पूजयेत्पीठे विधिना गणनायकम् ॥४०॥
त्रिकोणबाह्ये पूर्वादि चतुर्दिक्षु समर्चयेत् ॥४१॥
पद्मयुग्मधरा पद्मा शङ्खचक्रधरो हरिः ।
दक्षिणे वटवृक्षाधौ गौरीं गौरीपतिं यजेत् ॥४२॥
पाशाङ्कुशधरा गौरी टङ्कशूलधरो हरः ।
पश्चिमे पिप्पलस्याऽधो रतिं रतिपतिं
यजेत् ॥४३॥
रतिरुत्पलहस्ताढ्या कोदण्डास्त्रधरः स्मरः ।
सौम्ये प्रियङ्गुवृक्षाधौ महीं पोत्रिण-
मर्चयेत् ॥४४॥
शुकव्रीह्यग्रहस्ता भूर्गदाचक्रधरः पतिः ।
देवाग्रे पूजयेल्लक्ष्मीसहितं गोपनायकम् ॥४५॥
षट्सु कोणेषु सम्पूज्या प्रमोदाद्याः प्रियान्विताः ।
आमोदं सिद्धिसहितमग्रकोणे समर्चयेत् ॥४६॥
समृध्या युतमभ्यर्चेत् प्रमोदं वह्निकोणतः ।
सुमुखं कान्तिसंयुक्तमीशकोणे समर्चयेत् ॥४७॥
दुर्मुखं मदनावत्या यजेद्वरुणकोणाके ।
विघ्नं मदद्रवायुक्तं कोणे नैशाचरे यजेत् ॥४८॥

वायव्ये विंघ्नहर्त्तारं द्राविण्या सहितं यजेत् ।
पाशाङ्कुशभयाभीष्टधारिणोऽरुणविग्रहाः ॥४९॥
गण्डभित्तिगलद्दानपूरधौतमुखाम्बुजाः ।
विघ्नास्तत्प्रमदाः सर्व्वा मदाघूर्णितलोचनाः ॥५०॥
एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः ।
षट्कोणपार्श्वयोः पूज्यौ शङ्खपद्मनिधी
मात ॥५१॥
निजप्रियाभ्यां सहितौ पूर्व्वोदीरितलक्षणौ ।
केसरेष्वङ्गपूजा स्याद् ब्राह्म्याद्याः
पात्रमध्यगाः ॥५२॥
बहिर्लोकेश्वराः पूज्या वज्रादीनि ततः परम् ।
इत्थं जपादिभिः सिद्धः प्रयोगान्
स्वमनीषितान् ॥५३॥
साधयेदष्टभिर्द्रव्यैरन्यैर्वा कल्पचोदितैः ॥
पद्महोमेन भूपालांस्तत्पत्नीरुत्पलैः शुभैः ॥५४॥
मन्त्रिणः कुमुदैः फुल्लैर्विप्रान् पिप्पलसम्भवैः ।
समिद्वरैर्नरपतीनुदुम्बरसमुद्भवैः ॥५५॥
प्लक्षैर्वैश्यान् वटोद्भूतैः शूद्रान्मन्त्री वशं नयेत् ।
मधुना स्वर्णलाभः स्याद्गोदुग्धेन लभेत गाः ॥५६॥
आज्यहोमेन महतीं श्रियमाप्नोति मानवः ।
दध्ना सर्व्वसंमृद्धिः स्यादन्नैरन्नपतिर्भवेत् ॥५७॥
वृष्टिकामः प्रजुहुयाद् वेतसानां समिद्वरैः ।
कुसुम्भकुसुमैर्हुत्वा वासांसि लभतेऽ-
चिरात् ॥५८॥
प्रत्येकमादौ मूलेन चतुर्वारं प्रतर्पयेत् ।
श्रीशक्तिरतिभूलक्ष्मीः स्वबीजाद्याः
प्रियान्विताः ॥५९॥
प्रमोदादीन् स्वबीजाद्यान् शक्तियुक्तांश्च तर्पयेत् ।
चतुश्चतुः पृथक्मन्त्रौ शङ्खपद्मनिधी तथा ॥६०॥
नामादिबीजसहितौ तर्पयेत् स्वप्रियान्वितौ ।
तर्पणेनाऽमुना स्वीयमिष्टमाप्नोति
मण्डलात् ॥६१॥
स्मृतिस्थं मांसमौबिन्दुयुक्तं भूबीजमी-
रितम् ॥६२॥
बीजं षट्कोणमध्ये स्फुरदनलपुरे तारगं दिक्षु लक्ष्मीं मायाकन्दर्पभूमीस्तदनु
रसपुटेष्वालिखेद्बीजषट्कम् ।
तत्सन्धिष्वङ्गमन्त्रान् वसुदलकमले मूलमन्त्रस्य वर्णान् शिष्टान् पत्रेषु विद्वान् विलिखतु
गुणाशश्चाऽन्त्यमन्त्ये पलाशे ॥६३॥
आवीतं लिपिभिः क्रमोत्क्रमवशात् पाशाङ्कुशाभ्यामपि क्ष्मागेहद्वितयेन वेष्टितमिदं
यन्त्रं गणाधीशितुः ।
लाक्षाकुङ्कुमरोचनामृगमदैर्भूर्जे वरे हेम्नि वा संलिख्याऽभिवहन् लभेत सकलैः संप्रार्थनीयां
श्रियम् ॥६४॥
उक्तं महागणपतेर्विधानं सुरपूजितम् ।
सर्व्वसिद्धिकरं पुंसां समस्तपुरुषार्थदम् ॥६५॥
माया विरिपदद्वन्द्वं ततो गणपतिं वदेत् ।
खड्गीशपावकौ पश्चाद्वरदान्ते वदेत् पुनः ॥६६॥
सर्वलोकं मे पदान्ते वशमानय ठद्वयम् ।
षड्विंशत्यक्षरो मन्त्रो भजतां सुरपादपः ॥६७॥
गणकः स्याद्दषिश्छन्दो गायत्रं देवता मनोः ।
विरिविघ्नेश्वरः प्रोक्तो भजतां सर्व्वकामदः ॥६८॥
अन्तःकरणवेदेषुभूतपञ्चविलोचनैः ।
एवं विभक्तैर्मन्त्रार्णैर्मायाद्यैरङ्गकल्पना।
महागणपतेः प्रोक्ते स्थाने मन्त्री
विचिन्तयेत् ॥६९॥
सिन्दूराभमिभाननं त्रिनयनं हस्तेषु पाशाङ्कुशौ
बिभ्राणां मधुमत्कपालमनिशं सार्द्धेन्दुमौलिं भजे ।
पुष्ट्याश्लिष्टतनुं ध्वजाग्रकरया पद्मोल्लसद्धस्तया

तद्योन्याहितपाणिमात्तवसुमत्पात्रोल्लसत्-
पुष्करम् ॥७०॥
चतुर्लक्षं जपेन्मन्त्रं तदेकदशांशं हुतक्रिया ॥७१॥
पूर्वोक्तं पूजयेत् पीठे तीव्रादिनवशक्तिकं ।
मूलेन मूर्तिं संकल्प्य तत्रावाह्याऽर्चयेद्विभुम् ॥७२॥
मिथुनावृत्तिराद्या स्यादामोदाद्यैर्दिगम्बरैः ।
द्वितीयाऽङ्गैस्तृतीया स्याच्चतुर्थी मातृभिः
स्मृता ॥७३॥

......

(७४-७६)

......

शक्तिरुद्धं निजं बीजं महागणपतिं वदेत् ।
ङेऽन्तमग्निवधूः प्रोक्तो मन्त्रोऽयं द्वादशाक्षरः ॥७७॥
गणकः स्यादृषिश्छन्दो गायत्री निवृदादिका ।
उदिता देवता तन्त्रे नाम्ना शक्तिगणाधिपः ।
व्यस्तैः समस्तैर्मन्त्रस्य पदैरङ्गानि कल्पयेत् ॥७८॥
मुक्तागौरं मदगजमुखं चन्द्रचूडं त्रिनेत्रं
हस्तैः स्वीयैर्दधतमरविन्दाङ्कुशौ रत्नकुम्भम् ।
अङ्कस्थायाः सरसिजरुचः स्वध्वजालम्बिपाणे-
र्देव्या योनौ विनिहितकरं रत्नमौलिं
भजामः ॥७८॥
लक्षमेकं जपेन्मन्त्रमपूपैस्तद्दशांशतः ।
जुहुयादर्चिते वह्नौ दिनशो देवमर्चयेत् ॥८०॥
प्राक्प्रोक्ते पूजयेत्पीठे प्रागुक्तनैव वर्त्मना ।
हुत्वेक्षुखण्डैर्मतिमान् राज्यश्रियमवाप्नुयात् ॥८१॥
नारिकेलफलैस्तद्वद्रम्भापक्वफलैस्ततः ।
वशयत्यखिलं लोकं पृथुकः शर्करान्वितैः ॥८२॥
वशं नयति राजानं सक्तुभिर्ब्राह्मणान् शुभैः ।
घृतहोमेन धनवान् जायते नात्र संशयः ॥८३॥
शक्त्या रुद्धं निजं बीजं वशमानय ठद्वयम् ।
ताराद्यो मनुराख्यातो रुद्रसंख्याक्षरान्वितः ॥८४॥
ऋष्याद्याः पूर्वमुक्ताः स्युरङ्गं मन्त्रपदैर्भवेत् ।
एकनादौ त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यामनन्तरम् ।
समस्तेनाऽस्त्रमाख्यातं अङ्गक्लृप्तिरियं मता ॥८५॥
हस्तैर्बिभ्रतमिक्षुदण्डवरदौ पाशाङ्कुशौ पुष्कर-
स्पृष्टस्वप्रमदावराङ्गमनयाऽऽश्लिष्टं ध्वजाग्रस्पृशा।
श्यामाङ्ग्या विधृताब्जया त्रिनयनं चन्द्रार्द्धचूडं
जवा रक्तं हस्तिमुख स्मरामि सततं
भोगातिलोलं विभुम् ॥८६॥
लक्षत्रयं जपेन्मन्त्रमिक्षुखण्डैर्दशांशतः ।
अपूपैराज्ययुक्तैर्वा जुहुयान्मन्त्रसिद्धये ॥८७॥
स्वगुरुं धनधान्याद्यैः प्रीणयेत् प्रीतमानसः।
पूजा पूर्ववदादिष्टा ततः काम्यानि साधयेत् ॥८८॥
हुत्वाऽपूपैस्त्रिमध्वक्तैर्वशयेद् भुवि पार्थिवान् ।
चतुर्थ्यां नारिकेलेन महतीं श्रियमश्नुते ॥७९॥
लवणैर्मधुसंयुक्तैर्वशयेद्वनिताजनम् ।
संवर्त्तको नेत्रयुतः पार्श्वे वह्न्यासनस्थितः ॥९०॥
प्रसादनाय ह्न्मन्त्रः स्वबीजाद्यो दशाक्षरः ।
गणको मुनिरस्य स्याद्विराट् छन्द उदाहृतम् ॥९१॥
क्षिप्रप्रसादनो विघ्नो देवताऽस्य समीरिता ।
दीर्घयुक्तेन बीजेन षडङ्गानि प्रकल्पयेत् ॥९२॥
पाशाङ्कुशौ कल्पलतां विषाणां दधत्
स्वशुण्डाहितबीजपूरः ।
रक्तस्त्रिनेत्रस्तरुणेन्दु- मौलिर्हारोज्ज्वलो
हस्तिमुखोऽवताद्वः ॥९३॥
लक्षं जपेज्जपस्याऽन्ते जुहुयादयुतं तिलैः ।
समधुत्रितयैर्द्रव्यैरथवाऽष्टाभिरीरितैः ॥९४॥
एकाक्षरोदिते पीठे वक्ष्यमाणेन वर्त्मना ।
पूजयेद्गन्धपुष्पाद्यैर्धूपदीपैर्गजाननम् ॥९५॥
अङ्गानि पूर्वमभ्यर्च्य विघ्नानष्टौ यजेत्ततः ।

विघ्नं विनायकं वीरं शूरं वरदसंज्ञकम् ॥९६॥
इभवक्त्रं चैकदन्तं लम्बोदरमनन्तरम् ।
पत्राग्रेष्वर्चयेत्पश्चाद् ब्राह्म्याद्यास्तद-
नन्तरम् ॥९७॥
लोकपालांस्तदस्त्राणि विघ्नपूजा समीरिता ।
आज्यान्नैर्जुहुयान्नित्यमन्नवान् वत्सराद्भवेत
॥९८॥
पायसान्नेन महतीं श्रियमाप्नोति मानवः ।
आज्यहोमेन वशयेत्प्राणिनः सकलान् सुधीः ॥९९॥
नारिकेलफलं पक्कं लोष्टचर्मसमन्वितम् ।
जुहुयात्प्रत्यहं मन्त्री मण्डलात् सिद्धिमा-
यात्प्र॥१००॥
जुहुयादष्टभिर्द्रव्यैर्मधुरत्रयसंयुतैः ।
वशयेत्पार्थिवान् सर्वान् तत्त्वीर्विधि-
नाऽमुना ॥१०१॥
दिनादिषु चतुश्चत्वारिंशद्वारैः शुभोदकैः ।
तर्पयेद्विघ्नराजस्य मस्तके श्रीप्रसिद्धये ॥१०२॥
पाशाङ्कुशौ कल्पलतां स्वदन्तं करैर्वहन्तं
कनकाद्रिकान्तम् ।
सोपानपङ्क्त्या दिननाथबिम्बादायान्तमम्भोज-
गतं विचिन्त्य ॥१०३॥
प्रागुक्तमन्त्रसम्प्रोक्तान् प्रयोगान्मनुनाऽमुना।
तैरस्मिन्नथवा प्रोक्तान् कुर्यान्मन्त्री
विधानवित् ॥१०४॥
पश्चान्तको बिन्दुयुतो वामकर्णविभूषितः ।
तारादिहृदयान्तोऽयं हेरम्बमनुरीरितः ॥१०५॥
चतुर्वर्णात्मको नृणां चतुर्वर्गफलप्रदः ।
षड्दीर्घभाजा बीजेन षडङ्गानि
समाचरेत् ॥१०६॥
मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितै-
र्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम् ।
दृप्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षात्मिकां
मालां मुद्गरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं
भजे ॥१०७॥
लक्षत्रयं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः ।
तीव्रादिपूजिते पीठे देवं हेरम्बमर्चयेत् ॥१०८॥
प्रणवः कवचद्वन्द्वं महासिंहाय गां ततः ।
हेरम्बेति पदं पश्चादासनाय हृदन्वितः ॥१०९॥
अयमासनमन्त्रः स्यात्प्रदद्यादमुनाऽऽसनम् ।
तारादिविघ्नबीजेन मूर्तिं तस्य प्रकल्पयेत् ।
आवाह्य पूजयेत् तस्यामङ्गावरणसंयुतम् ॥११०॥
बाह्ये लोकेश्वराः पूज्या वज्रादीनि ततः परम् ।
एवमभ्यर्चयेन्नित्यं साधयेत्
स्वमनीषितान् ॥१११॥
मोदकर्जुहुयात् षष्ठ्यामष्टम्यां कशरैस्तथा ।
चतुर्दशीदिनेऽपूपैर्जुहुयाद्वाञ्छितासये ॥११२॥
एभिर्द्रव्यैः प्रजुहुयान्मन्त्री पर्वदिनेष्वपि ॥
साधयेत्सकलान् कामान् प्रयत्नेनैव
साधकः ॥११३॥
अम्भोजं प्रथमं लिखेद्वसुदलं मध्ये स्वबीजान्तरे
साध्याख्यां बहिरङ्गमन्त्रविलसत्किञ्जल्क-
संशोभितम् ।
पत्राणामुदरे विभज्य मुनिशो मालामनुं शेषितान्।
षड्वर्गांश्चरमे दले परिवृतं शक्त्या
शकारेण च ॥११४॥
रोचनामदकाश्मीरैर्भूर्जपत्रे विलिख्य तत् ।
वेष्टितं श्वेतसूत्रेण लोहैस्त्रिभिरपि क्रमात्
धारयेद्बाहुना यन्त्रं सर्वान् कामान-
वाप्नुयात् ॥११५॥
शक्त्यङ्कुशं ध्रुवान्ते स्यात् स्वबीजं हृदयं ततः
सर्वविघ्नाधिपायाऽन्ते ङेऽन्तं सर्वार्थ-
सिद्धिदम् ॥११६॥
प्रवदेत् सर्वदुःखप्रशमनाय पदं ततः ।

एह्येहि भगवन् सर्व्वा आपदः स्तम्भयद्वयम् ॥११७॥
भुवनेशीं स्वबीजं गां नतिः पावकवल्लभा।
पुनरङ्कुशमायान्तं पञ्चपञ्चाशदक्षरः ॥११८॥
मालामन्त्रोऽयममुना प्रयोगान् साधयेत् सुधीः।
तारं खड्गीश्वरः कूर्मी निःस्वरो णान्त ईरितः॥११९॥
भुवे नतिः सप्तवर्णः सुब्रह्मण्यात्मको मनुः।
वह्निबीजेन षड्दीर्घयुक्तेनाऽङ्गक्रिया मता ॥१२०॥
सिन्दूरारुणकान्तिमिन्दुवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम्।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागांशुकं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥१२१॥
लक्षमेकं जपेन्मन्त्रं साज्येन हविषा ततः।
दशांशं जुहुयादन्ते ब्राह्मणानपि भोजयेत् ॥१२२॥
धर्म्मादिकल्पिते पीठे वह्निमण्डलपश्चिमे।
पूजयेद्विधिना देवमुपचारैर्यथोदितैः॥१२३॥
केसरेष्वङ्गपूजा स्यात्पत्रमध्यगतानिमान्।
जयन्ताख्यमग्निवेश्यंकृत्तिकापुत्रसंज्ञकम्॥१२४॥
अनन्तरं भूतपतिं सेनान्यं गुहसंज्ञकम्।
हेमशूलं विशालाक्षं शक्तिवज्र (शूल) करान् यजेत् ॥१२५॥
दिग्दलाग्रेषु पूर्व्वादि देवसेनापतिं पुनः।
विद्यां मेधां ततो वज्रं कोणस्थान् शक्तिकुक्कुटौ ॥१२६॥
मयूरं द्वीपमभ्यर्च्चेद्बाह्ये लोकेश्वरान् पुनः।
अस्त्राणि तेषामन्तेः स्युः सुब्रह्मण्या- र्चनेरिता ॥१२७॥
स्वादुभिर्भक्ष्यभोज्याद्यैः षष्ठ्यां संप्रीणयेद्विभुम्।
पूजयेद्देवताबुद्ध्या कुमारान् ब्रह्मचारिणः ॥१२८॥
सन्तानं विजयं वीर्य्यं रक्षामायुः श्रियं यशः।
प्रदद्यात् साधकस्याशु सुब्रह्मण्यः सुरार्चितः ॥१२९॥
जपतर्पणपूजादौ विघ्नेशं सर्वसिद्धिदम्।
प्रीणयेदनया स्तुत्या प्राप्तये सर्वसम्पदाम् ॥१३०॥
ॐकारमाद्यं प्रवदन्ति सन्तो वाचः श्रुतीनामपि यं गृणन्ति।
गजाननं देवगणानताङ्घ्रिं भजेऽहमर्द्धेन्दू- कृतावतंसम् ॥१३१॥
पादारविन्दार्चनतत्पराणां संसारदावानलभङ्ग दक्षम्।
निरन्तरं निर्गतदानतोयैस्तं नौमि विघ्नेश्वर- मम्बुदाभम् ॥१३२॥
कृताङ्गरागं नवकुङ्कुमेन मत्तालिमालां मदपङ्क लग्नाम्।
निवारयन्तं निजकर्णतालैः को विस्मरेत् पुत्रमनङ्गशत्रोः ॥१३३॥
शम्भोर्जटाजूटनिवासिगङ्गाजलं समादाय कराम्बुजेन।
लीलाभिराराच्छिवमर्चयन्तं गजाननं भक्तियुता भजन्ति ॥१३४॥
कुमारभुक्तौ पुनरात्महेतोः पयोधरौ पर्व्वतराजपुत्र्याः।
प्रक्षालयन्तं करशीकरेण मौग्ध्येपन तं नागमुखं भजामि ॥१३५॥
त्वया समुधृत्य गजास्य हस्तं ये शीकराः पुष्कररन्ध्रमुक्ताः।
व्योमाङ्गणे ते विचरन्ति ताराः कालात्मना मौक्तिकतुल्यभासः ॥१३६॥

क्रीडारते वारिनिधौ गजास्ये वेलामतिक्रामति
वारिपूरे।
कल्पावसानं प्रविचिन्त्य देवाः कैलासनाथं
स्तुतिभिः स्तुवन्ति ॥१३७॥
नागानने नागकृतोत्तरीये क्रीडारते
देवकुमारसङ्घैः।
त्वयि क्षणं कालगतिं विहाय तौ प्रापतुः
कन्दुकतामिनेन्दू ॥१३८॥
मदोल्लसत्पञ्चमुखैरजस्रमध्यापयन्तं सकला-
गमार्थान्।
देवानृषीन् भक्तजनैकमित्रं हेरम्बमर्कारुण-
माश्रयामि ॥१३९॥
पादाम्बुजाभ्यामतिवामनाभ्यां कृतार्थयन्तं
कृपया धरित्रीम्।
प्रकारणं कारणमाप्तवाचां तं नागवक्त्रं न जहाति
चेतः ॥१४०॥
येनार्पितं सत्यवतीसुताय पुराणमालिख्य
विषाणकोट्या।
तं चन्द्रमौलेस्तनयं तपोभिरवाप्तमानन्दघनं
भजामि ॥१४१॥
पदं स्तुतीनामपदं श्रुतीनां लीलावतारं
परमात्ममूर्तेः।
नागात्मको वा पुरुषात्मको वेत्यभेद्यमाद्यं भज
विघ्नराजम् ॥१४२॥
पाशाङ्कुशौ भग्नरदं त्वभीष्टं करैर्दधानं
कररन्ध्रमुक्तैः।
मुक्ताफलाभैः पृथुसीकरौघैः सिञ्चन्तमङ्गं
शिवयोर्भजामि ॥१४३॥
अनेकमेकं गजमेकदन्तं चैतन्यरूपं
जगदादिबीजम्।
ब्रह्मेति यं ब्रह्मविदो वदन्ति तं शम्भुसूनुं शरणं
भजामि ॥१४४॥
स्वाङ्कस्थिताया निजवल्लभाया मुखाम्बुजा-
लोकनलोलनेत्रम्।
स्मेराननाब्जं मदवैभवेन रुद्धं भजे विश्वविमोहनं
तम् ॥१४५॥
ये पूर्वमाराध्य गजानन त्वां शास्त्राणि सर्वाणि
पठन्ति तेषाम्।
त्वत्तो न चाऽन्यत् प्रतिपाद्यमेतैस्तदस्ति चेत्
सर्वमसत्यकल्पम् ॥१४६॥
हिरण्यगर्भं जगदीशितारं कविं पुराणं
रविमण्डलस्थम्।
गजाननं यं प्रविशन्ति सन्तस्तत्कालयोगैस्तमहं
प्रपद्ये ॥१४७॥
वेदान्तगीतं पुरुषं भजेऽहमात्मानमानन्दघनं
हृदिस्थम्।
गजाननं यन्महसा जनानां विघ्नान्धकारो विलयं
प्रयाति ॥१४८॥
शम्भोः समालोक्य जटाकलापे शशाङ्कखण्डं
निजपुष्करेण।
स्वभग्नदन्तं प्रविचिन्त्य मौग्ध्यादाकृष्टुकामः
श्रियमातनोतु ॥१४९॥
विघ्नार्गलानां विनिपातनार्थं यं नारिकेलैः
कदलीफलाद्यैः।
प्रतारयन्तो मदवारणास्यं प्रापुर्नरोऽभीष्टमहं
भजे तम् ॥१५०॥
यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं
गजराजवक्त्रम्।
स्तुत्याऽनया ये विधिना स्तुवन्ति ते
सर्वलक्ष्मीनिधयो भवन्ति ॥१५१॥

EXCERPTS FROM PRAPAÑCHA-SĀRA-TANTRA
(17th Paṭala)

अथ संग्रहेण कथयामि मनुमपि महागणोशितुः।
यं समवहितधियः सुधियः समुपास्य
सिद्धिमधिकां प्रपेदिरे ॥१॥
तारः श्रीशक्तिमारावनिगणपतिबीजानि दण्डीनि
चोक्त्वा
पश्चाद्विघ्नं चतुर्थ्या वरवरदमथो सर्वयुक्तं जनञ्च।
आभाष्य क्ष्वेलमेन्तं वशमिति च तथैवाऽनयेति
द्विठान्तः
प्रोक्तोऽयं गाणपत्यो मनुरखिलविभूतिप्रदः
कल्पशाखी ॥२॥
ऋषिरपि गणकोऽस्य स्याच्छन्दो निवृदन्विता च
गायत्री।
सकलसुरासुरवन्दितचरणयुगो देवता
गणाधिपतिः॥३॥
प्रणवादिबीजपीठस्थितेन दीर्घस्वरान्वितेन सता।
अङ्गानि षड्विदध्यान्मन्त्री विघ्नेश्वरस्य
बीजेन ॥४॥
मन्दाराद्यैः कल्पकवृक्षविशेषैर्विशिष्टतरफलदैः।
शिशिरितचतुराशेऽन्तर्बालातपचन्द्रिकाकुले च
तले ॥५॥
ऐक्षवजलनिधिलहरीकणजालकवाहिना च
गन्धवहेन।
संसेविते च सुरतरुसुमनःश्रितमधुपपक्ष-
चलनपरेण ॥६॥
रत्नमये मणिवज्रप्रवालफलपुष्पपल्लवस्य सतः।
महतोऽधस्तादृतुभिर्युगपत्संसेवितस्य
कल्पतरोः ॥७॥
सिंहमुखपादपीठगलिपिमयपद्मे
त्रिषट्कोणोल्लसिते।
आसीनस्त्वेकरदो वृहदुदरो दशभुजोऽरुणी
गजवदनः॥८॥
बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः।
ध्येयो वल्लभया च पद्मकरयाश्लिष्टो ज्वलद्भूषया
विश्वोत्पत्तिविनाशसंस्थितिकरो विघ्नो
विशिष्टार्थदः॥९॥
करपुष्करधृतकलशस्रुतमणिमुक्ताप्रवालवर्षेण।
अविरतधारां विकिरन् परितः साधक-
समग्रसम्पत्त्यै ॥१०॥
मदजललोलुपमधुकरमालां निजकर्णताल
ताडनया। निर्वासयन् मुहुर्मुहुरमरैरसुरैश्च
सेवितो युगपत् ॥११॥
अग्रेऽथ बिल्वमभितश्च रमारमेशौ
तद्दक्षिणे वटजुषौ गिरिजावृषाङ्कौ।
पृष्ठेऽथ पिप्पलजुषौ रतिपुष्पबाणौ
सव्ये प्रियङ्गुमभितश्च महीवराहौ ॥१२॥
ध्येयौ च पद्मयुगचक्रदरैः पुरोक्तौ
पाशाङ्कुशाख्यपरशुत्रिशिखैरथाऽन्यौ।
युग्मोत्पलेक्षुमयचापशरैस्तृतीया -
वन्त्यौ शुकाह्वकलमाग्रगदारथाङ्गैः ॥१३॥

ध्येयाः षट्कोणास्त्रिषु परितः
पाशाङ्कुशाभयेष्टकराः।
सप्रमदा गणपतयो रक्ताकाराः प्रभिन्नमद-
विवशाः ॥१४॥
अग्रास्त्रावामोदः प्रमोदसुमुखौ च
तमभितोऽस्त्रियुगे।
पृष्ठे च दुर्मुखाख्यस्त्वमुमभितो विघ्नाविघ्नकर्तारौ
॥१५॥
सव्यापसव्यभागे तस्य ध्येयौ च शङ्खपद्मनिधी।
मौक्तिकमाणिक्याभौ वर्षन्तौ धारया धनानि
सदा ॥१६॥
सिद्धिसमृद्धि चान्या कान्तिर्मदनावती मदद्रवया।
द्राविणिवसुधाराख्ये वसुमत्यपि विघ्न
निधियुगप्रमदाः ॥१७॥
ध्यात्वैवं विघ्नपतिं चत्वारिंशत्सहस्रसंयुक्तम्।
प्रजपेल्लक्षचतुष्कं चतुःसहस्रञ्च दीक्षितो
मन्त्री ॥१८॥
दिनमनु सचतुश्चत्वारिंशत्संख्यं सन्तर्पयेद्विघ्नम्।
उक्तजपान्ते मन्त्री जुहुयाच्च दशांशतोऽष्टभिर्द्रव्यैः
॥१९॥
मोदकपृथुकसलाजाः सशक्तवः सेक्षुनारि-
केलतिलाः।
कदलीफलसहितानीत्यष्ट द्रव्याणि संप्र- दिष्टानि
॥२०॥
अनुदिनमर्चयितव्यो जपता मनुमपि च मन्त्रिणा
गणपः।
प्राक्प्रोक्तपद्मपीठे सशक्तिके सासिकामनौ
विधिना ॥२१॥
तीव्रा ज्वालिनी नन्दा सभोगदा कामरूपिणी
चोग्रा।
तेजोवती च स(नि)त्या संप्रोक्ता विघ्ननाशिनी
नवमी ॥२२॥
सर्वयुतं शक्तिपदं प्रोक्त्वा कमलासनाय नम इति
च।
आद्या मिथुनैरावृतिरपरा सनिधिभिरपि च
षड्विघ्नैः ॥२३॥
अङ्गैरन्या मातृभिरपरेन्द्राद्यैश्च पञ्चमी पूज्या
॥२४॥
दीक्षाभिषेकयुक्तः प्रजपेत् संपूजयेदिति गणेशम्।
अभिधीयतेऽस्य च पुनर्गुर्वादिशेन मन्त्रिणो दीक्षा
॥२५॥
मध्ये च दिग्दलानां चतुष्टयाग्रे प्रविन्यसेत्
कलशान्।
क्षीरद्रुबिल्वरोहिणपिप्पलफलिनीत्वगुद्भवैः क्काथैः
॥२६॥
संपूरयेद्यथावत् क्रमात् समावाह्य
गणपतिमिथुनानि।
अभ्यर्च्य चोपचारैर्हुत्वा विधिवत् पुनः
समभिषिञ्चेत् ॥२७॥
इति जपहुतार्चनाद्यैः सिद्धो मन्त्रेण कर्म कुर्वीत।
अष्टद्रव्यैर्वाऽन्यैर्हुनेच्च तत्तत्प्रयोजनावाप्त्यैन
॥२८॥
स्वर्णाप्त्यै मधुना च गव्यपयसा गोसिद्धये सर्पिषा
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना च सर्वर्द्धये।
अन्नैरन्नसमृद्धये च सतिलैर्द्रव्याप्तये तण्डुलै-
र्लाजाभिः पतये कुसुम्भकुसुमैः साश्वारि-
भिर्वाससे ॥२९॥
पद्मैर्भूपतिमुत्पलैर्नृपवधूं तन्मन्त्रिणः कैरवै -
रश्वत्थादिसमिद्भिरग्रजमुखान् वर्णान् वधूः
पिष्टजैः।
पुत्तल्यादिभिरन्वहं च वशयेज्जुह्वन्ननावृष्टये

लोणैर्वृष्टिसमृद्धये च जुहुयान्मन्त्री पुनर्वेतसैः ॥३०॥

मन्त्रेणाऽथ पुराऽमुनैव चतुरावृत्त्या समातर्प्य च
श्रीशक्तिस्मरभूविनायकरतीर्नाम्नैव बीजादिकम्।
आमोदादिनिधिद्वयश्च सचतुःपूर्वं चतुर्वारकं
मन्त्री तर्पणतत्परोऽभिलषितं संप्राप्नु-यान्मण्डलात् ॥३१॥

अथ गजलिप्सुर्नृपतिर्गजवनमध्ये प्रसाधयेद्वारि।
तन्निकटे सुविशालं चतुरस्रं कारयेच्च गृहवर्यम् ॥३२॥

परिवीतदृढावरणं तच्च चतुर्द्वारतोरणोल्लसितम्।
तस्मिन्मण्डपवर्ये चतुरस्रामुन्नतां स्थलीं कृत्वा ॥३३॥

उत्तरभागे तस्याः कुण्डं रचयेद् यथा पुरा तत्र।
चापजहरिभवमेषजचक्रप्रोक्तानथाऽक्षरान्मन्त्री ॥३४॥

ऊर्ध्वादिमेखलासु क्रमेण विलिखेन्निजेष्टसमवाप्त्यै।
संप्रोक्तलक्षणयुतं प्रविरचयेन्मण्डलं स्थलीमध्ये ॥३५॥

आवाह्य विघ्नेश्वरमर्चयित्वा प्रागुक्तया तन्त्रविधानक्लृप्त्या।
निवेद्य चाथो सह भक्ष्यलेह्यैः आज्यैश्च साज्यैरपि भोज्यजातैः ॥३६॥

आधाय वैश्वानरमत्र कुण्डे समर्च्य मन्त्रैः क्रमशः कृशानोः।
तैरेव पूर्वं जुहुयाद्घृतेन मन्त्री समृद्ध्या च ततस्त्रि-वारम् ॥३७॥

तारेण लक्ष्म्यद्रिसुतास्मरक्ष्माविघ्नेशबीजैः क्रमशोऽनुबद्धैः।
पदत्रयेणापि च मन्त्रराजं विभज्य मन्त्री नवधा जुहोतु ॥३८॥

पुनः समस्तेन च मन्त्रवर्णसंख्यं प्रजुह्वन्नपि सर्पिषैव।
पूर्वप्रादिष्टैर्जुहुयादथाऽष्टद्रव्यैः प्रसिक्तैर्मधुरत्रयेण ॥३९॥

सचतुश्चत्वारिंशत्सहस्रसंख्यैश्चतुःशतैश्चतुर्भिश्च।
दशकैश्चतुर्भिरपि हुताच्चतुश्चत्वारिंशद्दिनैरतो हि ॥४०॥

करिकलभाः करिणीभिः संपाद्य (त्य) न्तेऽवटेऽत्र गणपतिना।
अतिदिनमभ्यवहार्य च विप्रान् संवर्धितस्तदाशीर्भिः ॥४१॥

तेषां मातङ्गानां दद्यात् पञ्चाशद्दक्षिणां गुरवे।
तद्विक्रीतं वसु वा प्रसादितायाऽथ तद्दशांशं वा ॥४२॥

मिथुनानां गणपानां निध्योश्च तथाऽङ्गमातृलोकेशानाम्।
मन्त्रैर्घृतेन हुत्वाऽभ्यर्च्य च होमं समाप्य सम्यङ्मन्त्री ॥४३॥

पुनरुद्धृत्य निवेद्यादिकं समभ्यर्च्य गणपतिं सावरणम्।
उद्वास्य स्वे हृदये विहरेदित्यर्चनाक्रमो निर्दिष्टः ॥४४॥

प्रोक्तस्त्वेवं दशभुजमनुः संग्रहेणाऽत्र भक्तो
दीक्षां लब्ध्वा विधिवदभिजप्याथ हुत्वाऽर्चयित्वा।
नत्वा नुत्वा दिनमनु तथा तर्पयित्वा स्वकामान्
लब्ध्वा चान्ते व्रजति मुनिभिः प्रार्थनीयं पदं तत् ॥४५॥

स्मृतिपीठः पिनाकी सानुग्रहो बिन्दुसंयुतः।

बीजमेतत् भुवः प्रोक्तं संस्तम्भनकरं परम् ॥४६॥
च-तुरीयो विलोमेन तारादिर्बिन्दुसंयुतः।
वैघ्नो मन्त्रो हृदन्तोऽर्चाविधौ होमे द्विठान्तकः॥४७॥
गणकः स्यादृषिश्छन्दो निवृद्विघ्नोऽस्य देवता।
बीजेन दीर्घयुक्तेन दण्डिनाऽङ्गक्रियेरिता ॥४८॥
रक्तो रक्ताङ्गरागांशुककुसुमययुतस्तुन्दिल-
श्चन्द्रमौलि र्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो
बीजपूरात्तनासः।
हस्ताग्राक्लृप्तपाशाङ्कुशरदवरदो नागवक्त्रोऽहिभूषो
देवः पद्मासनो वो भवतु सुरनतो भूतये
विघ्नराजः ॥४९॥
दीक्षितः प्रजपेल्लक्षचतुष्कं प्राक्समीरितैः।
जुहुयादष्टभिर्द्रव्यैर्यथापूर्वं दशांशतः॥५०॥
पीठे तीव्रादिभिः पद्मकर्णिकायां विनायकम्।
आवाह्य पूजयेद्दिक्षु चतुर्ष्वपि यजेत् पुनः॥५१॥
गणाधिपं गणेशञ्च गणनायकमेव च।
गणक्रीडं कर्णिकायामङ्गैः किञ्जल्कसंस्थितैः॥५२॥
वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ।
लम्बोदराख्यविकटौ विघ्नराड्धूम्रवर्णकौ ॥५३॥
समर्चयेन्मातृवर्गं बाह्ये लोकेश्वरानपि।
इति प्रोक्ता संग्रहेण गाणेशीयसमर्चना ॥५४॥
नारिकेलान्वितैर्मन्त्री शक्तुलाजतिलैर्हुनेत्।
आरभ्याच्छां प्रतिपदं चतुर्थ्यन्तं चतुःशतम् ॥५५॥
दिनशः सर्ववश्यं स्यात् सर्वकामप्रदं नृणाम्।
तिलतण्डुलकैर्लक्ष्मीवश्यकृच्च यशस्करम् ॥५६॥
मधुरत्रयसिक्ताभिर्लाजाभिः सप्तवासरम्।
जुहुयात् कन्यकार्थी वा कन्यका वा वरार्थिनी
॥५७॥
चतुर्थ्यां नारिकेलैस्तु होमः सद्यः श्रियावहः।
हविषा घृतसिक्तेन सर्वकार्यार्थदो हुतः॥५८॥
दध्यक्तलोणमुद्राभिर्हुनेन्निशि चतुर्दिनम्।
इष्टार्थसिद्ध्यै मतिमान् सद्यः संवादसिद्धये ॥५९॥
ईदृशं गणपं ध्यात्वा मन्त्री तोयैः सुधामयैः।
दिनादौ दिनशस्तस्य तर्पयेन्मस्तके सुधीः ॥६०॥
चत्वारिंशच्चतुःपूर्वं तत्पूर्वं वा चतुःशतम्।
चत्वारिंशद्दिनात्तस्य कांक्षिता सिद्धिरेष्यति
॥६१॥
नवनीते नवे लिख्यादनुलोमविलोमकम्।
उदरस्थितसाध्याख्यं तद्बीजं तत्प्रवेष्टितम् ॥६२॥
समीरणं प्रतिष्ठाप्य जप्त्वाऽष्टशतसंख्यकम्।
तूष्णीं भक्षयेदेतत् सप्तरात्राद्वशीकरम् ॥६३॥
अन्त्यासनोऽथ सूक्ष्मो लोहितगोऽग्निः पुनः स एव
स्यात्।
सादान्ते नायार्णौनत्यन्तो मनुरयं स्वबीजाद्यः
॥६४॥
ऋषिदेवते तु पूर्वे छन्दस्तु विराडमुष्य संप्रोक्तम्।
बीजेन दीर्घभाजा कथितोऽङ्गविधिः क्रमेण
बिन्दुमता ॥६५॥
धृतपाशाङ्कुशकल्पलतिकास्वरदश्च
बीजपूरयुतः।
शशिशकलकलितमौलिस्त्रिलोचनोऽरुणतनुश्च
गजवदनः ॥६६॥
भासुरभूषणदीप्तो वृहदुदरः पद्मविष्टरो ललितः।
ध्येयोऽनायतदोःपत्सरसिरुहः सम्पदे सदा मनुजैः
॥६७॥
दीक्षायुक्तः प्रजपेत्पक्षं मनुमेनमथ तिलैरयुतम्।
त्रिमधुरयुक्तैर्जुहुयात् पूर्वोक्तैर्वाथवाऽष्टभिर्द्रव्यैः
॥६८॥
विघ्नविनायकवीराः सशूरवरदेभवक्त्रैकरदाः।
लम्बोदरश्च मात्रङ्गावृत्त्योरन्तराथ लोकेशाः॥६९॥
पूज्याः सितघृतपायसहवनात्सञ्जायते
महालक्ष्मीः।

केवलघृतहुतमुदितो विघ्नः सद्यो वशीकरोति
जगत् ॥७०॥
एकमपि नारिकेलं सचर्मलोष्ठेन्धनं हुनेन्मन्त्री ।
दिनशश्चत्वारिंशद्दिनतः स तु वाञ्छितार्थमभ्येति
॥७१॥
सपृथुकशक्तुकलाजातिलैरभीष्टार्थसिद्धये
जुहुयात् ।
सापूपनारिकेलेक्षुकदलीभिस्तथा समधुराभिः
॥७२॥
अष्टभिरेतैर्विहितो होमः सर्वार्थसाधको भवति ।
दिनशः सघृतान्नहुतो गृहयात्राप्रापको गृहस्थानाम्
॥७३॥
अन्वहमह्नामादौ गणपं सन्तर्पयेच्चतुःपूर्वम् ।
चत्वारिंशद्वारं सशुद्धजलैरिन्दिरासये मन्त्री ॥७४॥
समहागणपतियुक्तैर्विघ्नाद्यैर्दशभिराह्वयैर्दिनशः
तर्पणपूजाहुतविधिरपि वाञ्छितसिद्धिदायको
भवति ॥७५॥

बिम्बादम्बुदवत् समेत्य सवितुः सोपानकै राजतै-
स्तोयं तोयजविष्टरं धृतलतादन्तं
सपाशाङ्कुशम् ।
नासां साध्यनृके निधाय सुधया तद्रन्ध्रनिर्यातया
सिञ्चन्तं पुनरन्वहं गणपतिं स्मृत्वाऽमृतैस्तर्पयेत्
॥७६॥
आग्भाषितानपि विधीन् विधिवद्विदध्या -
न्मन्त्री विशेषविदथाऽन्वहमादरेण ।
एकत्र वा गणपतौ मनुजाः स्वरुच्या
नामानुरूपमनुमेनममी भजन्तु ॥७७॥
इति जपहुतपूजातर्पणैर्विघ्नराजं
अभजति मनुजो यस्तस्य सिद्धिर्विशाला ।
भवति सधनधान्यैः पुत्रमित्रादियुक्ता
विगतसकलविघ्ना विश्वसंवादिनी च ॥७८॥

EXCERPTS FROM MANTRA-MAHODADHI
(GANESA-TARAÑGA)

गणेशस्य मनून्वक्ष्ये सर्वाभीष्टप्रदायकान् ॥
जलं (व) चक्री (क) वह्नि (र) युतः कण ङ्वाढ्या च कामिका (तुं) ॥१॥
दारको (ड) दीर्घसंयुक्तो (आ) वायुः (य) कवच (हुं) पश्चिमः ॥
षडक्षरो मन्त्रराजो भजतामिष्टसिद्धिदः ॥२॥
भार्गवो मुनिरस्योक्तः छन्दो;नुष्टुबुदाहृतः ॥
विघ्नेशो देवता बीजं वं शक्तिर्यमितीरितम् ॥३॥
षडक्षरैः सुविधुभिः प्रणवाद्यैर्नमोन्तकः ॥
प्रकुर्याज्ञातिसंयुक्तः षडङ्गविधिमुत्तमम् ॥४॥
भ्रूमध्यकण्ठहृदयनाभिलिङ्गपदेषु च ॥
मनोर्वर्णान्क्रमान्न्यस्य व्यापयाथो स्मरेत्प्रभुम् ॥५॥
उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः पाशाङ्कुशा-भयवरान्दधतं गजास्यम् ॥
रक्ताम्बरं सकलदुःखहरं गणेशं
ध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ॥६॥
ऋतुलक्षं जपेन्मन्त्रमष्टद्रव्यैर्दशांशतः ॥
जुहुयान्मन्त्रसंसिध्यै बाडवान्भोजयेच्छुचीन् ॥७॥
इक्षवः सक्तवो रम्भाफलानि चिपिटास्तिलाः ॥
मोदका नारिकेलानि लाजाद्रव्याष्टकं स्मृतम् ॥८॥

पुरश्चरणविधिः ।

पीठमाधारशक्त्यादिपरतत्त्वान्तमर्चयेत् ॥
तत्राष्टदिक्षुमध्ये च सम्पूज्या नवशक्तयः ॥९॥
तीव्रा च चालिनी नन्दा भोगदा कामरूपिणी ॥
उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ॥१०॥
विनायकस्य मन्त्राणामेताः स्युः पीठशक्तयः ॥
सर्वशक्तिक्रमान्ते तुलासनाय हृदन्तिकः ॥११॥
पीठमन्त्रस्तदीयेन बीजेनादौ समन्वितः ॥
प्रदायासनमेतेन मूर्तिं मूलेन कल्पयेत् ॥१२॥
तस्यां गणेशमावाह्य पूजयेदासनादिभिः ॥
अभ्यर्च्य कुसुमैरीशं कुर्यादावरणार्चनम् ॥१३॥
आग्नेयादिषु कोणेषु हृदयं च शिरः शिखाम् ॥
वर्माभ्यर्च्याग्रतो नेत्रं दिक्ष्वस्त्रं पूजयेत्सुधीः ॥१४॥
द्वितीयावरणे पूज्याः प्रागाद्यष्टैव शक्तयः ॥
विद्यादिमा विधात्री च भोगदा विघ्नघातिनी ॥१५॥
निधिप्रदीपा पापघ्नी पुण्या पश्चाच्छशिप्रभा ॥
दलाग्रेषु वक्रतुण्ड एकदंष्ट्रो महोदरः ॥१६॥
गजास्यलम्बोदरकौ विकटो विघ्नराजकः ॥
धूम्रवर्णस्तदग्रेषु शक्राद्या आयुधैर्युताः ॥१७॥
एवमावरणैः पूज्यः पञ्चभिर्गणनायकः ॥

फलोक्तिः ।

पूर्वोक्ता च पुरश्चर्या कार्या मन्त्रस्य सिद्धये॥१८॥
ततः सिद्धे मनौ काम्यान्प्रयोगान्साधयेन्निजान् ॥
ब्रह्मचर्यरतो मन्त्री जपेद्रविसहस्रकम् ॥१९॥

षण्मासमध्याद्दारिद्र्यं नाशयत्येव निश्चितम् ॥
चतुर्थ्यादिचतुर्थ्यन्तं जपेद्दशसहस्रकम् ॥२०॥
प्रत्यहं जुहुयादष्टोत्तरं शतमतन्द्रितः॥
पुर्वोक्तं फलमाप्नोति षण्मासाद्भक्तितत्परः॥२१॥
आज्याक्तान्नस्य होमेन भवेद्धनसमृद्धिमान् ॥
पृथुकैर्नारिकेलैर्वा मरिचैर्वा सहस्रकम् ॥२२॥
प्रत्यहं जुह्वतो मासाज्जायते धनसञ्चयः ॥
जीरसिन्धुमरीचाक्तैरष्टद्रव्यैः सहस्रकम् ॥२३॥
जुह्वन्प्रतिदिनं पक्षात्स्यात्कुबेर इवार्थवान् ॥
चतुःशतं चतुश्चत्वारिंशदाढ्यं दिने दिने ॥२४॥
तर्पयेन्मूलमन्त्रेण मण्डलादिष्टमाप्नुयात् ॥
अथ मन्त्रान्तरं वक्ष्ये साधकानां निधिप्रदम् ॥२५॥
रायस्पोषभृगुर्वाढ्यो ददितामेष सात्वतौ ॥
सद्दशौ दोरत्नधातुमात्रक्षो गगनं रतिः॥ २६॥
स सद्योबलशार्ङ्गी खं नो षडक्षरसंयुतः ॥
एकत्रिंशद्वर्णयुक्तो मन्त्रोऽभीष्टप्रदायकः॥२७॥
सायकैस्त्रिभिरष्टाभिश्चतुर्भिः पञ्चभी रसैः ॥
मन्त्रोत्थितैः क्रमाद्वर्णैः षडङ्गं समुदीरितम् ॥२८॥
ऋष्याद्यर्चाप्रयोगाः स्युः पूर्ववन्निधिदो ह्ययम् ॥
पद्मनाभयुतो भानुर्मेधा सप्तसमन्विता ॥२९॥
लकावनन्तमारूढौ वायुः पावकगेहिनी ॥
षडक्षरोऽयमादिष्टो भजतामिष्टदो मनुः॥३०॥
पूर्ववत्सर्वमेतस्य समाराधनमीरितम् ॥

मन्त्रोद्धारः ।

लकुलीदशमारूढौ भृगुतौ लोहितः सदक् ॥३१॥
वकः सदीर्घश्चः साक्षिर्लिखेन्मन्त्रः शिरोऽन्तिमः ॥
नवाक्षरो मनुश्चास्य कङ्कोलः परिकीर्तितः
॥३२॥
विराट्छन्दो देवता तु स्याद्वै चोच्छिष्टनायकः ॥
द्वाभ्यां त्रिभिर्द्वयेनाथ द्वाभ्यां सकलमन्त्रतः॥३३॥

पञ्चाङ्गन्यासः ।

पञ्चांगान्यस्य कुर्वीत ध्यायेत्तं शशिशेखरम् ॥
चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशाङ्कुशौ
मोदकपात्रदन्तौ ॥
शक्तिब्रह्माखुगः सद्यत्तस्य धारक उच्यते ॥

विकटो नाम विख्यातः कामासुरविदाहकः।
मरूरवाहनश्चायं सौर ब्रह्मधरः स्मृतः ॥

विघ्नराजावतारश्च शेषवाहन उच्यते।
ममतासुरहन्ता स विष्णुब्रह्मेति वाचकः ॥

धूम्रवर्णावतारश्चाभिमानासुरनाशकः।
आखुवाहन एवासौ शिवात्मा तु स उच्यते ॥

While a form of Gaṇapati known as Heraṁba-gaṇapati rides a lion, it is usual to think of rat as the mount of Gaṇapati. Representations of his riding a peacock or horse are not extant although there is a rare reference to his riding a peacock, as in Gaṇeśa- purāṇa (krīḍā-khaṇḍa, 31, 9-10);

मयूरवाहनो देवः शुण्डादण्डविराजितः।

nor are legends explaining how they became the deity's vehicles available. But rat is frequently mentioned even in fairly ancient texts, and the purāṇas contain legendary explanations.

अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजम्।
(Gaṇapatyatharva-śīrsha)

मोषकोत्तममारुह्य देवासुरमहाहवे।
योद्धुकामं महाबाहुं वन्देऽहं गणनायकम् ॥
(Padma-purāṇa, sṛshṭi, 66,4)

युक्तं तु ऋद्धिसिद्धिभ्यां अधस्ता-
न्मूषकान्वितम्।
(Matsya-purāṇa, 260,54)

According to Gaṇeśa-purāṇa, Krauñcha was a gandharva (denizen of the celestial realms) in the court of Indra. Once when the assembly of gods, demi-gods and sages was going on, Krauñcha got up and hurriedly went out; and he stepped on the sage Vāmadeva in his haste. Vāmadeva become angry and cursed the gandharva to be born as a rat on earth. When the frightened gandharva begged the pardon of the sage, the sage relented and assured him that the curse would wear out as soon as Gaṇeśa mounted on him. The gandharva took the form of a giant rat in the hermitage of sage Parāśara, who was a devotee of Gaṇeśa, and began giving endless trouble to the sage. In despair, the sage sought Gaṇeśa's help. Gaṇeśa incarnated himself as the son of Parāśara and threw the 'agni-pāśa' (magic lasso) round the neck of the giant-rat bringing thus the terrible rodent under control. He also mounted on the rat; and immediately the curse was broken. But the grateful gandharva begged Gaṇeśa to accept his services all the time, and the god asked him to remain as his vehicle:

वाहतां मम याहि त्वं यदि सत्यं वचस्तव।
(2,134,38)

Mudgala-purāṇa explains that the expression 'mūshaka' (for rat) as a vehicle of Gaṇeśa signifies the lord who abides in all things and experiences all events, but hidden under the veil of māyā; he is unseen but operates, like a thief:

ईश्वरः सर्वभोक्ता च चोरवत्तत्र संस्थितः।
स एव मूषकः प्रोक्तो मनुजानां प्रचालकः।
मायया गूढरूपः सन् भोगान् भुङ्क्ते हि
चोरवत् ॥

There is also another explanation. Kālīvilāsa-tantra (18, 10-11) describes the rat-mount of Gaṇapati as giant-sized and bull- shaped; it is in fact a bull, and 'vṛsha' (the word for bull in Sanskrit) means dharma:

अधुना संप्रवक्ष्यामि रहस्यं मूषकस्य च।
वृषाकार महाकाय वृषरूप महाबल।
धर्मरूप वृषस्त्वं हि गणेशस्य च वाहनम् ॥

There is a popular notion that the great epic Mahābhārata was composed by sage Vyāsa and set down in writing making his own tusk the quil by Gaṇapati. There is no mention of this in the epic itself, but Bāla-bhārata of the ninth century refers to it. Śāradā-tilaka-tantra (13,141) contains a passing reference to this fact:

येनार्पितं सत्यवतीसुताय पुराणमालिख्य
विषाणकोट्या।

But the purāṇa, and not the epic, is said here to have been written down by Gaṇeśa at Vyāsa's dictation. The story given to explain how Gaṇapati became the scribe (lipi-kāra) is as follows. After Vyāsa composed in his mind the entirety of the epic poem, he wondered how he should communicate it to his disciples ('katham adhyāpayāmi ha śishyān ity anvachintayat').

He found that there was no one on earth who could write down what he had composed. Then Brahmā appeared before him and suggested to think of Gaṇeśa for this job:

काव्यस्य लेखनार्थाय गणेशः स्मर्यतां मुने।

When Vyāsa thought of Gaṇeśa, Gaṇeśa instantly appeared before him. Vyāsa asked him to be the scribe for the epic poem which he had already composed in his mind and which he would dictate:

लेखको भारतस्यास्य भव त्वं गणनायक।
मयैव प्रोच्यमानस्य मनसा कल्पितस्य च ॥

Gaṇeśa agreed but stipulated that his pen should be moving continuously; if there was even a moment's pause in the dictation, he would get up and go away. Vyāsa in turn laid down that he should not write anything without understanding what he was writing ('abuddhvā mā likha kvachit'). Ganesa accepted the challenge and started the scribe's job.



YANTRA



ओमित्युक्त्वा गणेशोऽपि बभूव किल लेखकः ॥

The sequel of the legend is that Vyāsa had to invent many turns in the epic story where the narrative would be deliberately enigmatic and beyond comprehension, so that the speed of Gaṇeśa's writing would slow down and Vyāsa would have time to organize his narrative. Even the ommiscient Gaṇeśa was obliged to stop for a while trying to understand what was being said by Vyāsa, and Vyāsa in the meantime would compose many verses.

ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गुढं कुतूहलात् ।
यस्मिन् प्रतिज्ञया प्राह मुनिर्द्वैपायनस्त्विदम् ॥
अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च ।
अहं वेद्मि शुको वेत्ति सञ्जयो वेत्ति वा न वा ॥
तत्कूटमद्यापि ग्रथितं सुदृढं मुने ।
भेत्तुं न शक्यतेऽर्थस्य गूढत्वात्प्रश्रितस्य च ॥
सर्वज्ञोऽपि गणेशो यत्क्षणमास्ते विचारयन् ।
तावच्चकार व्यासोऽपि श्लोकानन्यान् बहूनपि ॥

This legend has been the theme of many paintings, and has been responsible for transforming the tusk held in the right hand of the god into the stylus in some of the sculptural representations outside India.

Devī-purāṇa (114, 2-4) contains a story which expalins how Gaṇeśa got some of the weapons and ornaments he is usually associated with. Gaṇeśa was prevailed upon by the gods to kill the demon Vighna. Gaṇapati consented and set out, and then Śiva presented him with his crescent-moon (ardhendu), Brahmā gave him the white girdle (mekhalā), Sūrya gifted him with a coral (chintāmaṇi), Varuṇa lent him the noose (pāśa), Vishṇu gave him his conch, Indra his vajra and Yama his cudgel (daṇḍa).

BĀLA-GAṆAPATI

I EXCERPT FROM GAṆEŚA-PURĀṆA

गणेशगीता ।

(1)

क उवाच ॥

एकमेव पुरा पृष्टः शौनकह महात्मना ॥ स सूतः कथयामास गीतां व्यासमुखाच्छुताम् ॥१॥

सूत उवाच ॥

अष्टादशपुराणोक्तममृतं प्राशितं त्वया ॥ ततोऽतिरसवत्पातुमिच्छाम्यमृतमुत्तमम् ॥२॥ येनामृतमयोभूत्वा पुमान्ब्रह्मामृतं यतः ॥ योगामृतं महाभाग तन्मे करुणाया वद ॥३॥

व्यास उवाच ॥

अथ गीतां प्रवक्ष्यामि योगमार्गप्रकाशिनीम् ॥ नियुक्ता पृच्छते सूत राज्ञे गजमुखेन या ॥४॥

वरेण्य उवाच ॥

विघ्नेश्वर महाबाहो सर्वविद्याविशारद ॥ सर्वशास्त्रार्थतत्त्वज्ञ योगं मे वक्तुमर्हसि ॥५॥

श्रीगजानन उवाच ॥

सम्यग्व्यवसिता राजन्मतिस्तेऽनुग्रहान्मम ॥ श्रृणु गीतां प्रवक्ष्यमि योगामृतमयीं नृप ॥६॥ न योगं योगमित्याहुर्योगो योगो न च श्रियः ॥ न योगो विषयैर्योगो न च मात्रादिभिस्तथा॥७॥ योगो यः पितृमात्रादेर्न स योगो नराधिप ॥ यो योगो बन्धूपुत्रादेर्यश्चाष्टभूतिभिः सह ॥८॥ न स योगस्त्रिया योगो जगदुद्भूतरूपया ॥ राज्ययोगश्च नो योगो न योगो गजवाजिभिः ॥९॥ योगो नेन्द्रपदस्यपि योगो योगार्थिनः प्रियः॥ योगो यः सत्यलोकस्य न स योगो मतो मम ॥१०॥

शैवस्य योगो नो योगो वैष्णवस्य पदस्य यः ॥ न योगो भूप सूर्यत्वं चन्द्रत्वं कुबेरता ॥११॥ नानिलत्वं नानलत्वं नामरत्वं न कालता ॥ न वारुण्यं न नैऋत्यं न योगः सार्वभौमता ॥१२॥ योगं नानाविधं भूप युञ्जन्ति ज्ञानिनस्तु तम् ॥ भवन्ति वितृषा लोक जिताहारा विरेतसः ॥१३॥ पावयन्त्यखिलाँल्लोकान्वशीकतजगत्त्रयाः ॥ करुणापूर्णहृदया बोधयन्त्यपि कांश्चन ॥१४॥ जीवन्मुक्ता ह्रदे मग्नाः परमानन्दरूपिणि ॥ निमील्याक्षीणि पश्यन्तः परं ब्रह्म हृदि स्थितम् ॥१५॥

ध्यायन्तः परमं ब्रह्म चित्ते योगवशीकृतम् ॥ भूतानि स्वात्मना तुल्यं सर्वाणि गणयन्ति ते ॥१६॥ येन केनचिदाकृष्टा येन केनचिदाऍश्रिताः ॥१७॥ करुणापूर्णहृदया भ्रमन्ति धरणीतले ॥ अनुग्रहाय कोकानां जितक्रोधा जितेन्द्रियाः ॥१८॥ देहमात्रभृते भूप समलोष्टाश्मकाञ्चनाः ॥ एतादृशा महाभागाः स्युश्चक्षुर्गोचराः प्रिय ॥१९॥ तमिदानीमहं वक्ष्ये श्रृणु योगमनुत्तमम् । श्रुत्वा यं मुच्यते जन्तुः पापेभ्यो भवसागरात् ॥२०॥

शिवे विष्णौ च शक्तौ च सूर्ये मयि नराधिप । याऽभेदबुद्धिर्योगः स सम्यग्योगो मतो मम॥२१॥ अहमेव जगद्यस्मात्सृजामि पालयमि च ॥ कृत्वा नानाविधं वेषं संहरामि स्वलीलया॥२२॥ अहमेव महाविष्णुरहमेव सदाशिवः ॥ अहमेव महाशक्तिरहमेवार्यमा प्रिय ॥२३॥ अहमेको नृणां नाथो जातः पञ्चविधः पुरा ॥ अज्ञानान्मां न जानन्ति जगत्कारणकारणम् ॥२४॥ मत्तोऽग्निरापो धरणी मत्त आकाशमारुतौ ॥ ब्रह्मा विष्णुश्च रुद्रश्च लोकपाला दिशो दशा ॥२५॥

वसवो मनवो गावो मनवः पशवोऽपि च ॥ सरितः सागरा यक्षा वृक्षाः पक्षिगणा अपि ॥२६॥ तथैकविंशतिः स्वर्गा नागाः सप्त वनानि च ॥ मनुष्या पर्वताः साध्याः सिद्धा रक्षो गणास्तथा ॥२७॥ अहं साक्षी जगच्चक्षुरलिप्तः सर्वकर्मभिः ॥ अविकारोऽप्रमेयोऽहमव्यक्तो विश्वगोऽव्ययः ॥२८॥ अहमेव परं ब्रह्माव्ययानन्दात्मकं नृप ॥ मोहयत्यखिलान्माया श्रेष्ठान्मम नरानमून् ॥२९॥ सर्वदा षड्विकारेषु तानियं यो जयेद्भृशम् ॥ हित्वाजापटलं जन्तुरनेकैर्जन्मभिः शनैः ॥३०॥

विरज्य विन्दति ब्रह्म विषयेषु सुबोधतः॥ अच्छेद्यं शस्त्रसङ्घातैरदाह्यमनलेन च ॥३१॥ अक्लेद्यं भूप भुवनैरशोष्यं मारुतेन च ॥ अवध्यं वध्यमानेऽपि शरीरेऽस्मिन्नराधिप ॥३२॥ यामिमां पुष्पितां वाचं प्रशंसन्ति श्रुतीरिताम् ॥ त्रयीवादरता मूढास्ततोऽन्यन्मन्वतेऽपि न॥३३॥ कुर्वन्ति सततं कर्म जन्ममृत्युफलप्रदम् ॥ स्वर्गैश्वर्यरता ध्वस्तचेतना भोगबुद्धयः ॥३४॥ संपादयन्ति ते भूप स्वात्मना निजबन्धनम् ॥ संसारचक्रं युञ्जन्ति जडाः कर्मपरा नराः॥३५॥

यस्य यद्विहितं कर्म तत्कर्तव्यं मदर्पणम् ॥ ततोऽस्य कर्मबीजानामुनुद्भिन्नाः स्युर्महाऍङ्कुराः ॥३६॥ चित्तशुद्धिश्च महती विज्ञानसाधिका भवेत्॥ विज्ञानेन हि विज्ञातं परं ब्रह्म मुनीश्वरैः ॥३७॥ तस्मात्कर्माणि कुर्वीत बुद्धियुक्तो नराधिप ॥ न त्वकर्माः भवेत्कोऽपि स्वधर्मत्यागवांस्तथा ॥३८॥ जहाति यदि कर्मणि ततः सिद्धिं न विन्दति ॥ आदौ ज्ञाने नाधिकारः कर्मण्येव स युज्यते ॥३९॥ कर्मणा शुद्धहृदयोऽभेदबुद्धिमुपैष्यति ॥ स च योगः समाख्यातोऽमृतत्वाय हि कल्पते ॥४०॥

योगमन्यं प्रवक्ष्यामि श्रुणु भूप तमुत्तमम् । पशौ पुत्रे तथा मित्रे शत्रौ बन्धौ सुहृज्जने ॥४१॥ बहिर्दृष्ट्या च समया हृस्थया लोकयेत्पुमान् ॥ सुखे दुःखे तथाऽमर्षे हर्षे भीतौ समो भवेत् ॥४२॥ रोगाप्तौ चैव भोगाप्तौ जये वा विजयेऽपि च ॥ श्रियोऽयोगे च योगे च लाभालाभे मृतावपि ॥४३॥ समो मां वस्तुजातेषु पश्यन्नन्तर्बहिः स्थितम् ॥सूर्ये सोमे जले वह्नौ शिवे शक्तौ तथानिले ॥४४॥ द्विजे हृदि महानद्यां तीर्थे क्षेत्रेऽवनाशिनि ॥ विष्णौ च सर्वदेवेषु तथा यक्षोरगेषु च ॥४५॥

गन्धर्वेषु मनुष्येसु तथा तिर्यग्भवेषु च॥ सततं मां हि यः पश्येत्सोऽयं योगविदुच्यते ॥४६॥ संपराहृत्य स्वार्थेभ्य इन्द्रियाणि विवेकतः॥ सर्वत्र समताबुद्धिः स योगो भूप मे मतः ॥४७॥ आत्मानात्मविवेकेन या बुद्धिर्दैवयोगतः ॥ स्वधर्मासक्तचित्तस्य तद्योगो योग उच्यते ॥४८॥ धर्माधर्मौ जहातीह तया त्यक्त उभावपि ॥ अतो

योगाय युञ्जीत योगो वैधेषु कौशलम् ॥४९॥ धर्माधर्मफले त्यक्त्वा मनीषी विजितेन्द्रियः ॥ जन्मबन्धविनिर्मुक्तः स्थानं संयात्यनामयम् ॥५०॥

यदा ह्याज्ञानकालुष्यं जन्तोर्बुद्धिः क्रमिष्यति ॥ तदासौ याति वैराग्यं वेदवाक्यादिषु क्रमात् ॥५१॥ त्रयी विप्रतिपन्नस्य स्थाणुत्वं यास्यते यदा ॥ परात्मन्यचला बुद्धिस्तदासौ योगमाप्नुयात् ॥५२॥ मानसानखिलान्कामान्यदा धीमांस्त्यजेत्प्रिय । स्वात्मनि स्वेन संतुष्टः स्थिरबुद्धिस्तदोच्यते ॥५३॥ वितृष्णाः सर्वसौख्येषु नोद्विग्नो दुःखसंगमे ॥ गतसाध्वसरुद्रागः स्थिरबुद्धिस्तदोच्यते ॥५४॥ यथाऽयं कमठोङ्गानि सङ्कोचयति सर्वतः ॥ विषयेभ्यस्तथा खानि संकर्षेद्योगतत्परः ॥५५॥

व्यावर्तन्तेऽस्य विषयास्त्यक्ताहारस्य वर्ष्मिणः ॥ विना रागं च रागोऽपिदृष्ट्वा ब्रह्म विनश्यति ॥५६॥ विपश्चिद्यतते भूप स्थितिमास्थाय योगिनः ॥ मन्थयित्वेन्द्रियाण्यस्य हरन्ति बलतो मनः ॥ ५७॥ युक्तस्तानि वशे कत्वा सर्वदा मत्परो भवेत्॥ संयतानिन्द्रियाणीह यस्यासौ कतधीर्मतः ॥५८॥ चिन्तयानस्य विषयान्संगस्तेषूपजायते ॥ कामः संजायते तस्मात्ततः क्रोधोऽभिवर्धते ॥५९॥ क्रोधादज्ञानसम्भूतिर्विभ्रमस्तु ततः स्मृते ॥ भ्रंशात्स्मृतेर्मतेध्वसस्तद्ध्वंसात्सोऽपि नश्यति ॥६०॥

विना द्वेषं च रागं च गोचरान्यस्तु खैश्चरेत् ॥ स्वाधीनहृदयोवश्यैः सन्तोषे विलयो भवेत्। प्रज्ञया संस्थितश्चायं प्रसन्नहृदयो भवेत् ॥६२॥ विना प्रसादं न मतिर्विना मत्या न भावना ॥ विना तां न शमो भूप विना तेन कुतः सुखम् ॥६३॥ इन्द्रियाश्वान्विचरतो विषयाननुवर्तते ॥ यन्मनस्तन्मतिं हन्यादप्सु नावं मरुद्यथा ॥६४ ॥ या रात्रिः सर्वभूतानां तस्यां निद्राति नैव सः ॥ न स्वपन्तीह ते यत्र सा रात्रिस्तस्य भूमिप ॥६५॥ सरितां पतिमायान्ति वनानि सर्वतो यथा ॥ आयान्ति यं तथा कामा न स शान्तिं क्वचिल्लभेत् ॥ ६६॥ अतस्तानीह संरुध्य सर्वतः खानि मानवः ॥ स्वस्वार्थेभ्यः प्रधावन्ति बुद्धिरस्य स्थिरा तदा ॥६७॥ ममतांहकृती त्यक्त्वा सर्वान्कामांश्च यस्त्यजेत् ॥ नित्यं ज्ञानरतो भूत्वा ज्ञानान्मुक्तिं स यास्यति ॥६८॥ एवं ब्रह्मधियं भूप यो विजानाति दैवतः ॥ तुर्यामवस्थां प्राप्यापि जीवन्मुक्तिं स यास्यति ॥६९॥

ॐ तत्सदिति श्रीमद्गणेशगीता सूपनिषदर्थगर्भासु योगामृतार्थशास्त्रे श्रीमन्महागणेशपुराणे उत्तरखण्डे बालचरिते गजाननवरेण्यंसंवादे० साख्यसारार्थयोगो नाम प्रथमोऽध्यायः ॥१॥

(2)

वरेण्य उवाच ॥

ज्ञाननिष्ठा कर्मनिष्ठा द्वयं प्रोक्तं त्वया विभो ॥ अवधार्य वदैकं मे निःश्रेयसकरं नु किम् ॥१॥

गजानन उवाच ॥

अस्मिंश्चराचरे स्थित्यौ पुरोक्ते द्वे मया प्रिय ॥ सांख्यानां बुद्धियोगेन वैधयोगेन कर्मणाम् ॥२॥ अनारम्भेण वैधानां निष्क्रियः पुरुषो भवेत् ॥ न सिद्धिं याति संत्यागात्केवलात्कर्मणो नृप ॥३॥ कदाचिदक्रियः कोऽपि क्षणं नैवावतिष्ठते ॥

अस्वतन्त्रः प्रकृतिजैर्गुणैः कर्म च कार्यते ॥४॥
कर्मकारीन्द्रियग्रामं नियम्यास्ते स्मरन्पुमान्
तद्गोचरान्मन्दचित्तो धिगाचारः स भाष्यते ॥५॥
तद् ग्रामं संनियम्यादौ मनसा कर्म चारभेत् ॥
इन्द्रियैः कर्मयोगं यो वितृष्णः स परो नृप ॥६॥
अकर्मणः श्रेष्ठतमं कर्मानीहाकृतं तु यत् ॥ वर्ष्मणः
स्थितिरप्यस्याकर्मणो नैव सेत्स्यति ॥७॥
असमर्प्य निबध्यन्ते कर्म तेन जना मयि ॥ कुर्वीत
सततं कर्मानाशोऽसङ्गो मदर्पणम् ॥८॥ मदर्थे
यानि कर्माणि तानि बध्नन्ति न क्वचित् ॥
सवासनमिदं कर्म बध्नाति देहिनं बलात् ॥९॥
वर्णान्सृष्ट्वावदं चाहं सयज्ञांस्तान्पुरा प्रिय ॥ यज्ञेन
ऋद्ध्य तामेष कामदः कल्पवृक्षवत् ॥१०॥
सुरांश्चान्नेन प्रीणध्वं सुरास्ते प्रीणयन्तु वः ॥ लभध्वं
परमं स्थानमन्योन्यप्रीणनात्स्थिरम् ॥११॥ इष्टा
देवाः प्रदास्यन्ति भोगानिष्टान्सुतर्पिताः ॥
तैर्दत्तांस्तान्नरस्तेभ्योऽदत्वा भुङ्क्ते स
तस्करः ॥१२॥ हुतावशिष्टभोक्तारो मुक्ताः स्युः
सर्वपापतः ॥ अदन्त्येनो महापापा आत्महेतोः
पचन्ति ये ॥१३॥ ऊर्जो भवन्ति भूतानि देवादन्नस्य
सम्भवः ॥ यज्ञाच्चदेवसम्भूतिस्तदुत्पत्तिश्च
वैधतः ॥१४॥ ब्रह्मणो वैधमुत्पन्नं मत्तो
ब्रह्मसमुद्भवः ॥ अतो यज्ञे च विश्वस्मिन् स्थितं मां
विद्धि भूमिप ॥१५॥
संसृतीनां महाचक्रं क्रामितव्यं विचक्षणैः ॥ स मुदा
प्रीणते भूपेन्द्रियक्रीडोऽधमो जनः ॥१६॥
अन्तरात्मनि यः प्रीत आत्मारामोऽखिलप्रियः ॥
आत्मतृप्तो नरोः यः स्यात्तस्यार्थो नैव विद्यते ॥१७॥
कार्याकार्यकृतीनां स नैवाप्नोति शुभाशुभे ॥
किञ्चिदस्य न साध्यं स्यात्सर्वजन्तुषु सर्वदा ॥१८॥
अतोऽसक्ततया भूप कर्तव्यं कर्म जन्तुभिः ॥
सक्तोऽगतिमवाप्नोति मामवाप्नोति तादृशः ॥१९॥
परमां सिद्धिमापन्नाः पुरा राजर्षयो द्विजाः ॥
संग्रहाय हि लोकानां तादृशं कर्म चारभेत् ॥२०॥

श्रेयान्यत्कुरुते कर्म तत्करोत्यखिलो जनः ॥ मनुते
यत्प्रमाणं स तदेवानुसरत्यसौ ॥२१॥ विष्टपे मे न
साध्योऽस्ति कश्चिदर्थो नराधिप ॥ अनलब्धश्च
लब्धव्यः कुर्वे कर्म तथाप्यहम् ॥२२॥ न कुर्वेऽहं
यदा कर्म स्वतन्त्रोऽलसभावितः ॥ करिष्यन्ति मम
ध्यानं सर्वे वर्णा महामते ॥२३॥ भविष्यन्ति ततो
लोका उच्छिन्नाः संप्रदायिनः ॥ हन्ता स्यामस्य
लोकस्य विधाता सङ्करस्य च ॥२४॥ कामिनो हि
सदा कामैरज्ञानात्कर्मकारिणः ॥ लोकानां
संग्रहायैतद्विद्वान् कुर्यादसक्तधीः ॥२५ ॥
विभिन्नत्वमतिं जह्यदज्ञानां कर्मचारिणाम् ॥
योगयुक्तः सर्वकर्माण्यर्पयेन्मयि कर्मकृत् ॥२६॥
अविद्या गुणसाचिव्यात्कुर्वन्कर्माण्यतन्द्रितः ॥
अहङ्काराद्भिन्नबुद्धिरहं कर्तेति योऽब्रवीत् ॥२७॥
यस्तु वेत्त्यात्मनस्तत्त्वं विभागाद्गुणकर्मणोः ॥
करणं विषये वृत्तमिति मत्वा न सज्जते ॥२८॥
कुर्वन्ति सफलं कर्म गुणैस्त्रिभिर्विमोहिताः ॥
अविश्वस्तः स्वात्मद्रुहो विश्वविन्नैव लङ्घयेत्
॥२९॥ नित्यं नैमित्तिकं तस्मान्मयि
कर्मार्पयेद्बुधः ॥ त्यक्त्वाहंममताबुद्धिं परां
गतिमवाप्नुयात् ॥३०॥
अनीर्ष्यन्तो भक्तिमन्तो ये मयोक्तमिदं शुभम् ॥
अनुतिष्ठन्ति ये सर्वे मुक्तास्तेऽखिलकर्मभिः ॥३१॥
ये चैव नानुतिष्ठन्ति त्वशुभाहतचेतसः ॥ ईर्ष्य
माणान्महामूढान्नष्टांस्तान्विद्धि मे रिपून् ॥३२॥

तुल्यं प्रकृत्या कुरुते कर्म यज्ज्ञानवानपि ॥
अनुयाति च तामेवाग्रहस्तत्र मुधा मतः ॥३३॥
कामश्चैव तथा क्रोधः स्वानामर्थेषु जायते ॥
नैतयोर्वश्यतां यायादस्य विध्वंसकौ यथा ॥३४॥
शस्तोऽगुणो निजो धर्मः साङ्गादन्यस्य धर्मतः ॥
निजे तस्मिन्मृतिः श्रेयोऽपरत्र भयदः परः ॥३५॥
वरेण्य उवाच ॥ ॥ पुमान्यत्कुरुते पापं स हि केन
नियुज्यते ॥ अकाङ्क्षन्नपि हेरम्ब प्रेरितः
प्रबलादिव ॥३६॥ श्रीगजानन उवाच ॥
कामक्रोधौ महापापौ गुणद्वयसमुद्भवौ ॥ नयन्तौ
वश्यतां लोकान् विद्ध्येतौ द्वेषिणौ वरौ ॥३७॥
आवृणोति यथा माया जगद्बाष्पो जलं यथा ॥
वर्षामेघो यथा भानुं तद्वत्कामोऽखिलांश्च
रुट् ॥३८॥ प्रतिपत्तिमतो ज्ञानं छादितं सततं
द्विषा ॥ इच्छात्मकेन तरसा दुष्पोष्येण च
शुष्मिणा ॥३,॥ आश्रित्य बुद्धिमहसी इन्द्रियाणि
स तिष्ठति ॥ तैरेवाच्छादितप्रज्ञो ज्ञानिनं
मोहयत्यसौ ॥४०॥

तस्मान्नियम्य तान्यादौ स मनांसि नियोजयेत् ॥
ज्ञानविज्ञानयोः शान्तिकरं पापं मनौभवम् ॥४१॥
यतस्तानि पराण्याहुस्तेभ्यश्च परमं मनः ॥
ततोऽपि हि परा बुद्धिरात्मा बुद्धेः परो मतः ॥४२॥
बुद्ध्वैवमात्मनात्मानं संस्तभ्यात्मानमात्मना ॥
हत्वा शत्रुं कामरूपं परं पदमवाप्नुयात् ॥४३॥

ॐ तत्सदिति श्रीमद्गणेशगीता-
सूपनिषदर्थगर्भासु योगामृतार्थशास्त्रे श्रीगणेशपु-
राणे उत्तरखण्डे गजाननवरेण्यसंवादे कर्मयोगो
नाम द्वितीयोऽध्यायः ॥२॥

(3)

श्रीगजानन उवाच ॥
पुरा सर्गादिसमये त्रैगुण्यं त्रितनूरहम् ॥ निर्माय
चैनमवदं विष्णवे योगमुत्तमम् ॥१॥ अर्यम्णे
सोऽब्रवीत्सोऽपि मनवे निजसूनवे ॥ ततः
परम्परायातं विदुरेनं महर्षयः ॥२॥ कालेन बहुना
चायं नष्टः स्याच्चरमे युगे ॥ अश्रद्धेयो ह्यविश्वास्यो
विगीतव्यश्च भूमिप ॥३॥ एवं पुरातनं योगं
श्रुतवानसि मन्मुखात् ॥ गुह्याद्गुह्यतरं वेदरहस्यं
परमं शुभम् ॥४॥ वरेण्य उवाच ॥ साम्प्रतं
चावतीर्णेऽसि गर्भतस्त्वं गजानन ॥
प्रोक्तवान्कथमेतं त्वं विष्णवे योगमुत्तमम् ॥५॥
गणेश उवाच ॥ अनेकानि च ते जन्मान्यतीतानि
ममापि च ॥ संस्मरे तानि सर्वाणि न स्मृतिस्तव
वर्तते ॥६॥ मत्त एव महाबाहो जाता विष्ण्विदयः
सुराः ॥ मय्येव च लयं यान्ति प्रलयेषु युगे
युगे ॥७॥ अहमेव परो ब्रह्मा महारुद्रोऽहमेव च ॥
अहमेव जगत्सर्वे स्थावरं जङ्गमं च यत् ॥८॥
अजोऽव्ययोऽहं भूतात्माऽनादिरीश्वर एव च ॥
आस्थाय त्रिगुणां मायां भवामि बहुयोनिषु ॥९॥
अधर्मोपचयो धर्माचयो हि यदा भवेत् ॥
साधून्संरक्षितुं दुष्टांस्ताडितुं सम्भवाम्यहम् ॥१०॥
उच्छिद्याधर्मनिचयं धर्मं संस्थापयामि च ॥ हन्मि
दुष्टांश्च दैत्यांश्च नानालीलीकरो मुदा ॥११॥
वर्णाश्रमान्मुनीन्साधून्पालये बहुरूपधृक् ॥ एवं यो
वेत्ति सम्भूतीर्मम दिव्या युगे युगे ॥१२॥ तत्तत्कर्म
च वीर्यं च मम रूपं समासतः ॥
त्यक्त्वाहंममताबुद्धिं न पुनर्भूः स जायते ॥१३॥
निरीहा निर्भयारोषा मत्परा मद्व्यपाश्रयाः ॥

विज्ञानतपसा शुद्धा अनैके मामुपागता: ॥१४॥ येन येन हि भावेन संसेवन्ते नरोत्तमा:॥ तथा तथा फलं तेभ्य: प्रयच्छाम्यव्यय: स्फुटम् ॥१५॥

जना: स्युरितरे राजन्मम मार्गानुयायिन:॥ तथैव व्यवहारं ते स्वेषु चान्येषु कुर्वते ॥१६॥ कुर्वन्ति देवताप्रीतिं काङ्क्षन्त: कर्मणां फलम्॥ प्राप्नुवन्तीह ते लोके शीघ्रं सिद्धिं हि कर्मजाम् ॥१७॥ चत्वारो हि मया वर्णा रज:सत्त्वतमोंऽशत:॥ कर्मांतशतश्च संसृष्टा मृत्युलोके मयानघ ॥१८॥ कर्तारमपि तेषां मामकर्तारं विदुर्बुधा: ॥ अनादिमीश्वरं नित्यमलिप्तं कर्मजैर्गुणै: ॥१९॥ निरीहं योऽभि जानाति कर्म बध्नाति नैव तम् ॥ चक्रु: कर्माणि बुद्ध्वैवं पूर्वं मुमुक्षव:॥२०॥ वासना सहितादा-द्यात्संसारकारणाद्दृढात् ॥ अज्ञान बन्धनाज्जन्तुर्बुद्ध्वायं मुच्यतेऽखिलात् ॥२१॥ तदकर्म च कर्मापि कथयाम्यधुना तव॥ यत्र मौनं गता मोहाद्दषयो बुद्धिशालिन: ॥२२॥ तत्त्वं मु-मुक्षुणा ज्ञेयं कर्माकर्मविकर्मणाम् ॥ त्रिविधानीह कर्माणि सुनिम्नैषां गति: प्रिय ॥२३॥ क्रियायामक्रियाज्ञानमक्रियायां क्रियामति: ॥ यस्य स्यात्स हि मर्त्येऽस्मिँल्लोके मुक्तोऽखिलार्थकृत् ॥१४॥ कर्माङ्कुरवियोगेन य: कर्माण्यारभेन्नर: ॥ तत्त्वदर्शननिर्दग्ध-क्रियामाहुर्बुधा बुधम्॥२५॥

फलतृष्णा विहाय स्यात्सदा तृप्तो विसाधन: ॥ उद्युक्तोऽपि क्रिया कर्तुं किंचिन्नैव करोति स:॥२६॥ निरीहो निगृहीतात्मा परित्यक्तपरिग्रह: ॥ केवलं वै गृहं कर्माचरन्नायाति पातकम्॥२७॥ अद्वन्द्वोऽमत्सरो भूत्वा सिध्द्यसिध्द्यो: समश्च य: ॥ यथाप्राप्त्येह सन्तुष्ट: कुर्वन्कर्म न बध्यते ॥२८॥ अखिलैर्विषयैर्मुक्तो ज्ञानविज्ञानवानपि ॥ यज्ञार्थं तस्य सकलं कृतं कर्म विलीयते ॥२९॥ अहमग्निर्हविर्होता हुतं यन्मयि चार्पितम् ॥ ब्रह्माप्तव्यं च तेनाथ ब्रह्मण्येव यतो रत:॥३०॥

योगिन: केचिदपरे दिष्टं यज्ञं वदन्ति च ॥ ब्रह्माग्निरेव यज्ञो वै इति केचन मेनिरे ॥३२॥ संयमाग्नौ परे भूप इन्द्रियाण्युपजुह्वति ॥ खाग्निष्वन्ये तद्विषयाञ्छब्दादीनुपजुह्वति ॥३२॥ प्राणानामिन्द्रियाणां च परे कर्माणि कृत्स्नश: ॥ निजात्मरतिरूपेऽग्नौ ज्ञानदीप्ते प्रजुह्वति ॥३३॥ द्रव्येण तपसा वापि स्वाध्यायेनापि केचन ॥ तीव्रव्रतेन यतिनो ज्ञानेनापि यजन्ति माम्॥३४॥ प्राणेऽपानं तथा प्राणमपाने प्रक्षिपन्ति ये॥ रुद्ध्वा गतीश्चोभयोस्ते प्राणायामपरायणा:॥३५॥

जित्वा प्राणान्प्राणगतीरुपजुह्वति तेषु च ॥ एवं नाना यज्ञरता यज्ञध्वं सितपातका:॥३६॥ नित्यं ब्रह्म प्रयान्त्येते यज्ञशिष्टामृताशिन: ॥ अयज्ञकारिणो लोको नायमन्य: कुतो भवेत् ॥३७॥ कायिका दित्रिधाभूतान्यज्ञान्वेदे प्रतिष्ठितान् ॥ ज्ञात्वा तानखिलान्भूप मोक्ष्यसेऽखिलबन्धनात् ॥३८॥ सर्वेषां भूप यज्ञानां ज्ञानयज्ञ: परो मत:॥ अखिलं लीयते कर्म ज्ञाने मोक्षस्य साधने ॥३९॥ तज्ज्ञेयं पुरुषव्याघ्र प्रश्नेन नतित: सताम् । शुश्रूषया वदिष्यन्ति सन्तस्तत्त्वविशारदा:॥४०॥

नानासङ्गाज्जन: कुर्वन्नेकं साधुसमागमम्॥ करोति तेन संसारे बन्धनं समुपैति स: ॥४१॥ सत्संगाद्गुणसम्भूतिरापदां लय एव च ॥४२॥ इतरत्सुलभं राजन्सत्संगोऽतीवदुर्लभ:॥ यज्ज्ञात्वा न पुनर्बन्धमेति ज्ञेयं ततस्तत:॥४३॥ तत: सर्वाणि भूतानि स्वात्मन्येवाभिपश्यति ॥ अतिपापरतो

जन्तुस्ततस्तस्मात्प्रमुच्यते ॥४४॥ द्विविधान्यपि कर्माणि ज्ञानाग्निर्दहति क्षणात् ॥४५॥

न ज्ञानसमतामेति पवित्रमितरन्नृप ॥ आत्मन्येवावगच्छन्ति योगात्कालेन योगिनः ॥४६॥ भक्तिमानिन्द्रियजयी तत्परो ज्ञानमाप्नुयात् ॥ लब्ध्वा तत्परमं मोक्षं स्वल्पकालेन यात्यसौ ॥४७॥ भक्तिहीनोऽश्रद्दधानः सर्वत्र संशयी तु यः ॥ तस्य शं नापि विज्ञानमिह लोकोऽथ वा परः ॥४८॥ आत्मज्ञानरतं ज्ञाननाशिताऍखिलसंशायम् ॥ योगास्ताखिलकर्माणं बध्नन्ति भूप तानि न ॥४९॥ ज्ञानखड्गप्रहारेण सम्भूतामज्ञतां बलात् ॥ छित्वान्तः संशयं तस्माद्य ोगयुक्तो भवेन्नरः ॥५०॥

ॐ तत्सदिति श्रीमद्गणेशगीतासूपनिषदर्थगर्भासु योगामृतार्थशास्त्रे श्रीगणेशपुराणे उत्तरखण्डे श्रीमद्गजाननवरेण्यसंवादे विज्ञानप्रतिपादनो नाम तृतीयोऽध्यायः ॥३॥

(4)

वरेण्य उवाच ॥

संन्यस्तिश्चैव योगश्च कर्मणां वर्ण्यते त्वया ॥ उभयोर्निश्चितं त्वेकं श्रेयो यद्वद मे प्रभो ॥१॥

श्रीगजानन उवाच ॥

क्रियायोगो वियोगश्चाप्युभौ मोक्षस्य साधने ॥ तयोर्मध्ये क्रियायोगस्त्यागात्तस्य विशिष्यते ॥२॥ द्वन्द्वदुःखसहोऽद्वेष्टा यो न काङ्क्षति किञ्चन ॥ मुच्यते बन्धनात्सद्यो नित्यं संन्यासवान्सुखम् ॥३॥ वदन्ति भिन्नफलकौ कर्मणस्त्यागसंग्रहौ ॥ मूढाल्पज्ञास्तयोरेकं संयुञ्जीत विचक्षणः ॥४॥ यदेव प्राप्यते त्यागात्तदेव योगतः फलम् ॥ संग्रहं कर्मणो योगं यो विन्दति स विन्दति ॥५॥

केवलं कर्मणां न्यासं संन्यासं न विदुर्बुधाः ॥ कुर्वन्ननिच्छया कर्म योगी ब्रह्मैव जायते ॥६॥ निर्मलो यतचित्तात्मा जितखो योगतत्परः ॥ आत्मानं सर्वभूतस्थं पश्यन्कुर्वन्न लिप्यते ॥७॥ तत्त्वविद्योगयुक्तात्मा करोमीति न मन्यते ॥ एकादशानीन्द्रियाणि कुर्वन्ति कर्मसंख्यया ॥८॥ तत्सर्वमर्पयेद्ब्रह्मण्यपि कर्म करोति यः ॥ न लिप्यते पुण्यपापैर्भानुर्जलगतो यथा ॥९॥ कायिकं वाचिकं बौद्धमैन्द्रियं मानसं तथा ॥ त्यक्त्वाशां कर्म कुर्वन्ति योगज्ञाश्चित्तशुद्धये ॥१०॥

योगहीनो नरः कर्म फलेहया करोत्यलम् ॥ बध्यते कर्मबीजैः स ततो दुःखं समश्नुते ॥११॥ मनसा सकलं कर्म त्यक्त्वा योगी सुखं वसेत् ॥ न कुर्वन्कारयन्वापि नन्दन्श्वभ्रे सुपत्तने ॥१२॥ न क्रिया न च कर्तृत्वं कस्यचित्सृज्यते मया ॥ न क्रियाबीजसम्पर्कः शक्त्या तत्क्रियतेऽखिलम् ॥१३॥ कस्यचित्पुण्यपापानि न स्पृशामि विभुर्नृप ॥ ज्ञानमूढा विमुह्यन्ति मोहेनावृतबुद्धयः ॥१४॥ विवेकेनात्मनोऽज्ञानं येषां नाशितमात्मना ॥ तेषां विकाशमायाति ज्ञानमादित्यवत्परम् ॥१५॥

मन्निष्ठा मद्धियोऽत्यन्तं मच्चित्ता मयि तत्पराः ॥ अपुनर्भवमायान्ति विज्ञानान्नाशितैनसः ॥१६॥ ज्ञानविज्ञानसंयुक्ते द्विजे गवि गजादिषु ॥ समेक्षणा महात्मानः पण्डिताः श्वपचे शुनि ॥१७॥ वश्यः स्वर्गो जगत्तेषां जीवन्मुक्ताः समेक्षणाः ॥

यतोऽदोषं ब्रह्म समं तस्मात्तैर्विषयीकृतम् ॥१८॥
प्रियाप्रिये प्राप्य हर्षद्वेषौ ये प्राप्नुवन्ति न ॥
ब्रह्माश्रिता असंमूढा ब्रह्मज्ञाः समबुद्धयः ॥१९॥
वरेण्य उवाच ॥
किं सुखं त्रिषु लोकेषु देवगन्धर्वयोनिषु ॥
भगवन्कृपया तन्मे वद विद्याविशारद ॥२०॥
श्रीगजानन उवाच ॥
आनन्दमश्नुतेऽसक्तः स्वात्मारामो निजात्मनि ॥
अविनाशि सुखं तद्धि न सुखं विषयादिषु ॥२१॥
विषयोत्थानि सौख्यानि दुःखानां तानि हेतवः
॥उत्पत्तिनाशयुक्तानि तत्रासक्तो न तत्त्ववित्
॥२॥ कारणे सति कामस्य क्रोधस्य सहते च यः ॥
तौ जेतुं वर्ष्मविरहात्स सुखं चिरमश्नुते ॥२३॥
अन्तर्निष्ठोऽन्तःप्रकाशोऽन्तःसुखोऽन्तरतिर्लभेत् ॥
असन्दिग्धोऽक्षयं ब्रह्म सर्वभूतहितार्थकृत् ॥२४॥
जेतारः षड्रिपूणां ये शमिनो दमिनस्तथा ॥ तेषां
समन्ततो ब्रह्म स्वात्मज्ञानां विभात्यहो ॥२५॥
आसनेषु समासीनस्त्यक्त्वेमान्विषयान्बहिः ॥
संस्तभ्य भृकुटीमास्ते प्राणायामपरायणः ॥२६॥
प्राणायामं तु संरोधं प्राणापानसमुद्भवम् ॥ वदन्ति
मुनयस्तं च त्रिधाभूतं विपश्चितः ॥२७॥ प्रमाणं
भेदतो विद्धि लघुमध्यममुत्तमम् ॥ दशभिर्यद्य
धिकैर्वर्णैः प्राणायामो लघुः स्मृतः ॥२८॥
चतुर्विंशत्यक्षरो यो मध्यमः स उदाहृतः ॥
षट्त्रिंशल्लघुवर्णो य उत्तमः सोऽभिधीयते ॥२९॥
सिंहं शार्दूलकं वापि मत्तेभं मृदुतां यथा ॥ नयन्ति
प्राणिनस्तद्वत्प्राणापानौ सुसाधयेत् ॥३०॥
पीडयन्ति मृगांस्तेन लोकान्वश्यंगतान्नृप ॥
दहत्येनस्तथा वायुः संस्तब्धो न च तत्तनुम् ॥३१॥
यथा यथा नरः कश्चित्सोपानावलिमाक्रमेत् ॥
तथा तथा वशीकुर्यात्प्राणापानौ हि योगवित्
॥३२॥ पूरकं कुम्भकं चैव रेचकं च ततोऽभ्यसेत्
॥ अतीतानागतज्ञानी ततः स्याज्जगतीतले ॥३३॥
प्राणायामैर्द्वादशभिरुत्तमैर्धारणा मता ॥ योगस्तु
धारणे द्वे स्याद्योगीशस्ते सदाभ्यसेत् ॥३४॥ एवं यः
कुरुते राजंस्त्रिकालज्ञः स जायते ॥ अनायासेन
तस्य स्याद्वश्यं लोकत्रयं नृप ॥३५॥
ब्रह्मरूपं जगत्सर्वं पश्यति स्वान्तरात्मनि ॥ एवं
योगश्च संन्यासः समानफलदायिनौ ॥३६॥ जन्तूनां
हितकर्तारं कर्मणां फलदायिनम् ॥ मां ज्ञात्वा
मुक्तिमाप्नोति त्रैलोक्यस्येश्वरं विभुम् ॥३७॥
ॐ तत्सदिति श्रीमद्गणेशगीता-
सूपनिषदर्थगर्भासु योगामृतार्थशास्त्र
श्रीगणेशपुराणे उत्तरखण्डे गजानन- वरेण्यसंवादे
वैधसंन्यासयोगो नाम चतुर्थाऽध्यायः ॥४॥

(5)

श्रीगजानन उवाच ॥
श्रौतस्मार्तानि कर्माणि फलं नेच्छन्समाचरेत् ॥
शस्तः स योगी राजेन्द्र अक्रियाद्योगमाश्रितात्
॥१॥ योगप्राप्त्यै महाबाहो हेतुः कर्मैव मे मतम् ॥
सिद्धियोगस्य संसिध्द्यै हेतू शमदमौ मतौ ॥२॥
इन्द्रियार्थांश्च संकल्प्य कुर्वन्स्वस्य रिपुर्भवेत् ॥
एताननिच्छन्यः कुर्वन् सिद्धिं योगी स सिध्यति
॥३॥ सुहृत्त्वे च रिपुत्वे च उद्धारे चैव बन्धने ॥
आत्मनैवात्मानो ह्यात्मा नात्मा भवति कश्चन
॥४॥ मानेऽपमाने दुःखे च सुखे सुहृदि साधुषु ॥
मित्रेऽमित्रेऽप्युदासीने द्वेष्ये लोष्टे च काञ्चने ॥५॥
समो जितात्मा विज्ञानी ज्ञानीन्द्रियजयावहः ॥
अभ्यसेत्सततं योगं यदा युक्ततमो हि सः ॥६॥ तसः
श्रान्तो व्याकुलो वा क्षुधितो व्यग्रचित्तकः ॥ कालेऽ
तिशीतेऽत्युष्णे वानिलाग्न्यम्बुसमाकुले ॥७॥

सध्वनावतिजीर्णे गोःस्थाने साग्नौ जलान्तिके ॥ कूपकूले श्मशाने च नद्यां भित्तौ च मर्मरे ॥८॥ चैत्ये सवल्मिके देशे पिशाचादिसमावृते ॥ नाभ्यसेद्योगविद्योगं योगध्यानपरायणः ॥९॥ स्मृतिलोपश्च मूकत्वं बाधिर्यं मन्दताज्वरः ॥ जडता जायते सद्यो दोषाज्ञानाद्धि योगिनः॥१०॥ एते दोषाः परित्याज्या योगाभ्यसनशालिना ॥ अनादरे हि चैतेषां स्मृतिलोपादयो ध्रुवम् ॥११॥ नातिजाग्रत्सिद्धिमेति भूप योगं सदा-भ्यसन् ॥१२॥ संकल्पजांस्त्यजेत्कामान्नियताहारजागरः॥ नियम्य खगणं बुद्ध्या विरमेत शनैः शनैः ॥१३॥ ततस्ततः कृषेदेतद्यत्र यत्रानुगच्छति ॥ धृत्यात्मवशगं कुर्याच्चितं चञ्चलमादृतः॥१४॥ एवं कुर्वन्सदा योगी परां निर्वृतिमृच्छति ॥ विश्वस्मिन्निजमात्मानं विश्वं च स्वात्मनीक्षते ॥२५॥

योगेन यो मामुपैति तमुपैम्यहमादरात् ॥ मोचयामि न मुञ्चामि तमहं मा स ह त्यजेत् ॥१६॥ सुखेऽसुखेतरे द्वेषे क्षुधि तोषे समस्तृषि ॥ आत्मसाम्येन भूतानि सर्वगं मां च वेत्ति यः॥१७॥ जीवन्मुक्तः स योगीन्द्रः केवलं मयि सङ्गतः॥ ब्रह्मादीनां च देवानां स वन्द्यः स्याज्जगत्रये ॥१८॥

वरेण्य उवाच ॥

द्विविधोऽपि हि योगोऽयमसम्भाव्यो हि मे मतः॥ यतोऽन्तःकरणं दुष्टं चञ्चलं दुर्ग्रहं विभो ॥१९॥

श्रीगजानन उवाच ॥

यो निग्रहं दुर्ग्रहस्य मनसः सम्प्रकल्पयेत् ॥ घटीयन्त्रसमादस्मान्मुक्तः संसृतिचक्रकात् ॥२०॥ विषयैः क्रकचैरेतत्संसृष्टं चक्रकं दृढम् ॥ जनश्छेत्तुं न शक्नोति कर्मकीलैः सुसंवृतम् ॥२१॥ अतिदुःखं च वैराग्यं भोगाद्वैतृष्णमेव च ॥ गुरुप्रसादः सत्सङ्ग उपायास्तज्जये अमी ॥२२॥ अभ्यासाद्वा वशीकुर्यान्मनो योगस्य सिद्धये ॥ वरेण्य दुर्लभो योगो विहास्य मनसो जयात् ॥२३॥

वरेण्य उवाच ॥

योगभ्रष्टस्य को लोकः का गतिः किं फलं भवेत् ॥ विभो सर्वज्ञ मे छिन्धि संशयं बुद्धिचक्रभृत् ॥२४॥

श्रीगजानन उवाच ॥

दिव्यदेहधरो योगाद्भ्रष्टः स्वर्भोगमुत्तमम् ॥ भुक्त्वा योगिकुले जन्म लभेच्छुद्धिमतां कुले ॥२५॥

पुनर्योगी भवत्येष संस्कारात्पूर्वकर्मजात् ॥ न हि पुण्यकृतां कश्चिन्नरकं प्रतिपद्यते ॥२६॥ ज्ञाननिष्ठात्तपोनिष्ठात्कर्मनिष्ठान्नराधिप ॥ श्रेष्ठो योगी श्रेष्ठतमो भक्तिमान्मयि तेषु यः॥२७॥

ॐ तत्सदिति श्रीमद्गणेशगीता-सूपनिषदर्थगर्भासु योगामृतार्थशास्त्र श्रीगणेशपुराणे उत्तरखण्डे गजानन- वरेण्यसंवादे योगावृत्तिप्रशंसनो नाम पञ्चमोऽध्यायः॥५॥

(6)

श्रीगजानन उवाच ॥

ईदृशं विद्धि मे तत्त्वं मद्गतेनान्तरात्मना ॥ यज्ज्ञात्वा मामसंदिग्धं वेत्सि मोक्ष्यसि सर्वगम् ॥१॥ तत्तेऽहं श्रुणु वक्ष्यामि लोकानां हितकाम्यया ॥ अस्ति ज्ञेयं यतो नान्यन्मुक्तोश्च साधनं नृप ॥२॥ ज्ञेया मत्प्रकृतिः पूर्वं ततः स्याज्ज्ञानगोचरः॥ ततो विज्ञानसम्पत्तिर्मयि ज्ञाते नृणां भवेत् ॥३॥ क्नलौ खमहङ्कारः कं चित्तं धीसमीरणौ ॥ रवीन्दू यागकृच्चैकादशधा प्रकृतिर्मम ॥४॥

अन्यां मत्प्रकृतिं वृद्धा मुनयः सङ्गिरन्ति च ॥ तथा त्रिविष्टपं व्याप्तं जीवत्वं गतयानया ॥५॥ आभ्यामुत्पाद्यते सर्वं चराचरमयं जगत् ॥ संगाद्विश्वस्य सम्भूतिः परित्राणं लयोऽप्यहम् ॥६॥ तत्त्वमेतन्निबोद्धुं मे यतते कश्चिदेव हि ॥ वर्णाश्रमवतां पुंसां पुरा चीर्णेन कर्मणा ॥७॥ साक्षात्करोति मां कश्चिद्यत्नवत्स्वपितेषु च ॥ मत्तोऽन्यन्नेक्षते किञ्चिन्मयि सर्वं च वीक्षते ॥८॥ क्षितौ सुगन्धरूपेण तेजोरूपेण चाग्निषु ॥ प्रभारूपेण पूष्ण्यब्जे रसरूपेण चाप्सु च ॥९॥ धीतपोबलिनां चाहं धीस्तपोबलमेव च ॥ त्रिविधेषु विकारेषु मदुत्पन्नेष्वहं स्थितः ॥१०॥ न मां विन्दति पापीयान्मायामोहितचेतनः ॥ त्रिविकारा मोहयति प्रकतिर्मे जगत्रयम् ॥११॥ यो मे तत्त्वं विजानाति मोहं त्यजति सोऽखिलम् ॥ अनेकैर्जन्मभिश्चैवं ज्ञात्वा मां मुच्यते ततः ॥१२॥ अन्ये नानाविधान्देवान्भजन्त तान्व्रजन्ति ते ॥ यथा यथा मतिं कृत्वा भजते मां जनोऽखिलः ॥१३॥ तथा तथास्य तं भावं पूरयाम्यहमेव तम् ॥ अहं सर्वं विजानामि मां न कश्चिद्विबुध्यते ॥१४॥ अव्यक्तं व्यक्तिमापन्नं न विदुः काममोहिताः ॥ नाहं प्रकाशतां यामि अज्ञानां पापकर्मणाम् ॥१५॥

यः स्मृत्वा त्यजति प्राणमन्ते मां श्रद्धयान्वितः ॥ स यात्यपुनरावृत्तिं प्रसादान्मम भूभुज ॥१६॥ यं यं देवं स्मरन्भक्त्या त्यजति स्वं कलेवरम् ॥ तत्तत्सालोक्यमायाति तत्तद्भक्त्या नराधिप ॥१७॥ अतश्चाहर्निशं भूप स्मर्तव्योऽनेकरूपवान् ॥ सर्वेषामप्यहं गम्यः स्रोतसामर्णवो यथा ॥१८॥ ब्रह्मविष्णुशिवेन्द्राद्याँल्लोकान्प्राप्य पुनः पतेत् ॥ यो मामुपैत्यसंदिग्धः पतनं तस्य न क्वचित् ॥१९॥ अनन्यशरणो यो मां भक्त्या भजति भूमिप ॥ योगक्षेमौ च तस्याहं सर्वदा प्रतिपादये ॥२०॥ द्विविधा गतिरुद्दिष्टा शुक्ला कृष्णा नृणां नृप ॥ एकया परमं ब्रह्म परया याति संसृतिम् ॥२१॥

ॐ तत्सदिति श्रीमद्गणेशगीतासूपनिषदर्थगर्भासु योगामृतार्थशास्त्रे श्रीगणेशपुराणे उत्तरखण्डे श्रीगजाननवरेण्यसंवादे बुद्धियोगो नाम षष्ठोऽध्यायः ॥६॥

(7)

वरेण्य उवाच ॥

का शुक्ला गतिरुद्दिष्टा का च कृष्णा गजानन ॥ किं ब्रह्म संसृतिः का मे वक्तुमर्हस्यनुग्रहात् ॥१॥

श्रीगजानन उवाच ॥

अग्निर्ज्योतिरहः शुक्ला कर्मार्हमयनं गतिः ॥ चान्द्र ज्योतिस्तथा धूमो रात्रिश्च दक्षिणायनम् ॥२॥ कृष्णैते ब्रह्मसंसृत्योरवाप्ते कारणं गती ॥ दृश्यादृश्यमिदं सर्वं ब्रह्मैवेत्यवधारय ॥३॥ क्षरं पञ्चात्मकं विद्धि तदन्तरक्षरं स्मृतम् ॥ उभाभ्यां यदतिक्रान्तं शुद्धं विद्धि सनातनम् ॥४॥ अनेकजन्मसम्भूतिः संसृतिः परिकिर्तिता ॥ संसृतिः प्राप्नुवन्त्येते ये तु मां गणयन्ति न ॥५॥ ये मां सम्यगुपासन्ते परं ब्रह्म प्रयन्ति ते ॥ ध्यानाद्यैरुपचारैर्मा तथा पञ्चामृतादिभिः ॥६॥ स्नानवस्त्राद्यलङ्कारसुगन्धधूपदीपकः ॥ नैवेद्यैः फलताम्बूलैर्दक्षिणाभिश्च योऽर्चयेत् ॥७॥ भक्त्यैकचेतसा चैव तस्येष्टं पूरयाम्यहम् ॥ एवं प्रतिदिनं भक्त्या मद्भक्तो मां समर्चयेत् ॥८॥ अथवा मानसीं पूजां कुर्वीत स्थिरचेतसा ॥ अथवा

फलपत्राद्यैः पुष्पमूलजलदिभिः ॥९॥ पूजयेन्मां प्रयत्नेन तत्तदिष्टं फलं लभेत् ॥ त्रिविधास्वपि पूजासु श्रेयसी मानसी मता ॥१०॥
साप्युत्तमा मता पूजाऽनिच्छया या कृता मम ॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिश्च यः ॥११॥
एकां पूजां प्रकुर्वाणोऽप्यन्यो वा सिद्धिमृच्छति ॥
मदन्यदेवं यो भक्त्या द्विषन्मामन्यदेवताम् ॥१२॥
सोऽपि मामेव यजते परं त्वविधितो नृप ॥ यो ह्यन्यदेवतां मां च द्विषन्नन्यां समर्चयेत् ॥१३॥
याति कल्पसहस्रं स निरयान्दुःखभाक् सदा ॥
भूतशुद्धिं विधायादौ प्राणानां स्थापनं ततः ॥१४॥
आकृष्य चेतसो वृत्तिं ततो न्यासमुपक्रमेत् ॥
कृत्वान्तर्मातृकान्यासं बहिश्चाथ षडङ्गकम् ॥१५॥
न्यासं च मूलमन्त्रस्य ततो ध्यात्वा जपेन्मनुम् ॥
स्थिरचित्तो जपेन्मन्त्रं यथा गुरुमुखागतम् ॥१६॥
जपं निवेद्य देवाय स्तुत्वा स्तोत्रैरनेकधा ॥ एवं मां य उपासीत स लभेन्मोक्षमव्ययम् ॥१७॥ य उपासनया हीनो धिङ्नरो व्यर्थजन्मभाक् ॥
यज्ञोऽहमौषधं मन्त्रोऽग्निराज्यं च हविर्हुतम् ॥१८॥
ध्यानं ध्येयं स्तुतिं स्तोत्रं नतिर्भक्तिरुपासना ॥
त्रयी ज्ञेयं पवित्रं च पितामहपितामहः ॥१९॥
ॐकारः पावनः साक्षी प्रभुर्मित्रं गतिर्लयः ॥ उत्पत्तिः पोषको बीजं शरणं वास एव च ॥२०॥
असन्मृत्युः सदमृतमात्मा ब्रह्माहमेव च ॥ दानं होमस्तपो भक्तिर्जपः स्वाध्याय एव च ॥२१॥ यद्य त्करोति तत्सर्वं स मे मयि निवेदयेत् ॥ योषितोऽथ दुराचाराः पापास्त्रैवर्णिका-स्तथा ॥२२॥ मदाश्रया विमुच्यन्ते किं मद्भक्त्या द्विजादयः ॥ न विनश्यति मद्भक्तो ज्ञात्वेमा मद्विभूतयः ॥२३॥ प्रभवं मे विभूतीश्च न देवा ऋषयो विदुः ॥ नानाविभूतिभिरहं व्याप्य विश्वं प्रतिष्ठितः ॥२४॥ यद्यच्छ्रेष्ठतमं लोके सा विभूतिर्निबोध मे ॥२५॥

ॐ तत्सदिति श्रीमद्गणेशगीतासूपनिषदर्थगर्भासु योगामृतार्थशास्त्रे श्रीगणेशपुराणे उत्तरखण्डे श्रीगजाननवरेण्यसंवादे उपासनायोगो नाम सप्तमोऽध्यायः ॥७॥

(8)

वरेण्य उवाच ॥
भगवन्नारदे मह्यं तव नानाविभूतयः ॥ उक्तवांस्ता अहं वेद न सर्वाः सोऽपि वेत्ति ताः ॥१॥ त्वमेव तत्त्वतः सर्वा वेत्सि ता द्विरदानन ॥ निजं रूपमिदानीं मे व्यापकं चारु दर्शय ॥२॥
श्रीगजानन उवाच ॥
एकस्मिन्मयि पश्य त्वं विश्वमेतच्चराचरम् ॥
नानाश्चर्याणि दिव्यानि पुराद्दष्टानि कनचित् ॥३॥ ज्ञानचक्षुरहं तेऽद्य सृजामि स्वप्रभावतः ॥ चर्मचक्षुः कथं पश्ये न्मां विभुं ह्यजमव्ययम् ॥४॥ क उवाच ॥ ततो राजा वरेण्यः स दिव्यचक्षुरवैक्षत ॥ ईशितुः परमं रूपं गजास्यस्य महाद्भुतम् ॥५॥
असंख्यवक्त्रं ललितमसंख्याङ्घ्रिकरं महत् ॥
अनुलिप्तं सुगन्धेन दिव्यभूषाम्बरस्रजम् ॥६॥
असंख्यनयनं कोटिसूर्यरश्मिधृतायुधम् ॥
तद्वर्ष्मणि त्रयो लोका दृष्टास्तेन पृथग्विधाः ॥७॥
दृष्ट्वैश्वरं परं रूपं प्रणम्य स नृपोऽब्रवीत् ॥
वरेण्य उवाच ॥
वीक्षेऽहं तव देहेऽस्मिन्देवानृषिगणान्पितृन् ॥८॥
पातालानां समुद्राणां द्वीपानां चैव भूभृताम् ॥

महर्षीणां सप्तकं च नानाथः सङ्कुलं विभो ॥९॥
भुवोऽन्तरिक्षं स्वर्गांश्च मनुष्योरगराक्षसान् ॥
ब्रह्मविष्णुमहेशेन्द्रान्देवान्जन्तूननेकधा ॥१०॥
अनाद्यनन्तं लोकादिमनन्तभुजशीर्षकम् ॥
प्रदीप्तानलसङ्काशमप्रमेयं पुरातनम् ॥११॥
किरीटकुण्डलधरं दुर्निरीक्ष्यं मुदावहम् ॥ एतादृशं
च वीक्षे त्वां विशालवक्षसंप्रभुम् ॥१२॥
सुरविद्याधरैर्यक्षैः किन्नरैर्मुनिमानुषैः ॥
नृत्यद्भिरप्सरोभिश्च गन्धर्वैर्गानतत्परैः ॥१३॥
वसुरुद्रादित्यगणैः सिद्धैः साध्यैर्मुदा युतैः ॥
सेव्यमानं महाभक्त्या वीक्ष्यमाणं सुविस्मितैः
॥१४॥ वेत्तारमक्षरं वेद्यं धर्मगोप्तारमीश्वरम् ॥
पातालानि दिशः स्वर्गान्भुवं व्याप्याखिलं स्थितम्
॥१५॥

भीता लोकास्तथा चाहमेवं त्वां वीक्ष्य रूपिणम् ॥
नानादंष्ट्राकरालं च नानाविद्याविशारदम् ॥१६॥
प्रलयानलदीप्तास्यं जटिलं च नभःस्पृशम् ॥ दृष्ट्वा
गणेश ते रूपमहं भ्रान्त इवाभवम्॥१७॥ देवा
मनुष्या नागाद्याः खलास्त्वदुदरेशयाः ॥
नानायोनिभुजश्चान्ते त्वय्येव प्रविशन्ति च ॥१८॥
अब्धेरुत्पद्यमानास्ते यथा जीमूतबिन्दवः ॥
त्वमिन्द्रोऽग्निर्यमश्चैव निरृतिर्वरुणो मरुत् ॥१९॥
गुडाकेशस्तथेशानः सोमः सूर्योऽखिलं जगत् ॥
नमामि त्वामतः स्वामिन्प्रसादं कुरु मेऽधुना ॥२०॥

दर्शयस्व निजं रूपं सौम्यं यत्पूर्वमीक्षितम् ॥ को
वेद लीलास्ते भूमन् क्रियमाणा निजेच्छया ॥२१॥
अनुग्रहान्मया दृष्टमैश्वरं रूपमीदृशम् ॥
ज्ञानचक्षुर्यतो दत्तं प्रसन्नेन त्वया मम ॥२२॥

श्रीगजानन उवाच ॥
नेदं रूपं महाबाहो मम पश्यन्त्ययोगिनः॥ सनकाद्या
नारदाद्याः पश्यन्ति मदनुग्रहात् ॥२३॥
चतुर्वेदार्थतत्त्वज्ञाश्चतुःशास्त्रविशारदाः ॥
यज्ञदानतपोनिष्ठा न मे रूपं विदन्ति ते ॥२४॥
शक्योऽहं वीक्षितुं ज्ञातं प्रवेष्टुं भक्तिभावतः॥ त्यज
भीतिं च मोहं च पश्य मां सौम्यरूपिणम् ॥२५॥
मद्भक्तो मत्परः सर्वसङ्गहीनो मदर्थकृत् ॥ निष्क्रोधः
सर्वभूतेषु समो ममिति भूभुज ॥२६॥

ॐ तत्सदिति श्रीमद्गणेशगीतासूपनिषदर्थगर्भासु
योगामृतार्थशास्त्रे श्रीगणेशपुराणे उत्तरखण्डे
श्रीगजानन- वरेण्यसंवादे विश्वरूपदर्शनो
नामाष्टमोऽध्यायः॥८॥

(9)

वरेण्य उवाच ॥
अनन्यभावस्त्वां सम्यङ्मूर्तिमन्तमुपासते ॥
योऽक्षरं परमं व्यक्तं तयोः कस्ते मतोऽधिकः ॥१॥
असि त्वं सर्ववित्साक्षी भूतभावन ईश्वरः ॥
अतस्त्वां परिपृच्छामि वद मे कृपया विभो ॥२॥
श्रीगजानन उवाच ॥
यो मां मूर्तिधरं भक्त्या मद्भक्तः परिसेवते ॥ स मे
मान्योऽनन्यभक्तिर्नियुज्य हृदयं मयि ॥३॥ खगणं
स्ववशं कृत्वाखिलभूतहितार्थकत् ॥
ध्येयमक्षरमव्यक्तं सर्वगं कूटगं स्थिरम् ॥४॥
सोऽपि मामेत्य निर्देश्यं मत्परो य उपासते ॥
संसारसागरादस्मादुद्धरामि तमप्यहम् ॥५॥
अव्यक्तोपासनादुःखमधिकं तेन लभ्यते ॥
व्यक्तस्योपासनासाध्यं तदेवाव्यक्तभक्तितः ॥६॥
भक्तिश्चैवादरश्चात्र कारणं परमं मतम् ॥ सर्वेषां

विदुषां श्रेष्ठो ह्यकिञ्चिज्ज्ञोऽपि भक्तिमान् ॥७॥
भजन्भक्त्या विहीनो यः स चाण्डालोऽभिधीयते ॥
चाण्डालोऽपि भजन्भक्त्या ब्राह्मणेभ्योऽधिको
मम ॥८॥ शुकाद्याः सनकाद्याश्च पुरा मुक्ता हि
भक्तितः॥ भक्त्यैव मामनुप्राप्ता नारदाद्या-
श्चिरायुषः॥९। अतो भक्त्या मयि मनो विधोहि
बुद्धिमेव च॥ भक्त्या यजस्व मां राजंस्ततो मामेव
यास्यसि ॥१०॥

असमथाऽर्पितुं स्वान्तमेवं मयि नराधिप ॥
अभ्यासेन च योगेन ततो गन्तुं यतस्व माम्॥११॥
तत्रापि त्वमशक्तश्चेत्कुरु कर्म मदर्पणम्॥
ममानुग्रहतश्चैवं परां निर्वृतिमेष्यसि ॥१२॥
अथैतदप्यनुष्ठातुं न शक्तोऽसि तदा कुरु॥ प्रयत्नतः
फलत्यागं त्रिविधानां हि कर्मणाम् ॥१३॥ श्रेयसी
बुद्धिरावृत्तेस्ततो ध्यानं परं मतम् ॥
ततोऽखिलपरित्यागस्ततः शान्तिर्गरीयसी ॥१४॥
निरहंममताबुद्धिरद्वेषः करुणासखः॥ लाभालाभे
सुखे दुःखे मानामाने स मे प्रियः॥१५॥
यं वीक्ष्य न भयं याति जनस्तस्मान्न च स्वयम्॥
उद्वेगभीकोपमुद्भीरहितो यः स मे प्रियः ॥१६॥
रिपौ मित्रेऽथ गर्हायां स्तुतौ शोक समःसमुत्॥
मौनी निश्चलधीभक्तिरसङ्गः स च मे प्रियः॥१७॥
संशीलयति यश्चैनमुपदेशं मया कुतम्॥ स वन्द्यः
सर्वलोकषु मुक्तात्मा मे प्रियः सदा ॥१८॥
अनिष्टाप्तौ च न द्वेष्टीष्टप्राप्तौ न च तुष्यति ॥
क्षेत्रतज्ज्ञौ च यो वेत्ति स मे प्रियतमो भवेत्॥१९॥
वरेण्य उवाच॥

किं क्षेत्रं कश्च तद्वेत्ति किं तज्ज्ञानं गजानन ॥
एतदाचक्ष्व मह्यं त्वं पृच्छते करुणाम्बुधे॥२०॥

श्रीगजानन उवाच॥

पञ्च भूतानि तन्मात्राः पञ्च कर्मेन्द्रियाणि च ॥
अहङ्कारो मनोबुद्धिः पञ्च ज्ञानेन्द्रियाणि च॥२१॥
इच्छाव्यक्त धृतिद्वेषौ सुखदुःखे तथैव च ॥
चेतनासहितश्चायं समूहः क्षेत्रमुच्यते॥२२॥ तज्ज्ञं
त्वं विद्धि मां भूप सर्वान्तर्यामिणं विभुम्॥ अयं
समूहोऽहं चापि यज्ज्ञानविषयौ नृप॥२३॥ आर्जवं
गुरुशुश्रूषा विरक्तिश्चेन्द्रियार्थतः ॥ शौचं
क्षान्तिरदम्भश्च जन्मादिदोषवीक्षणम् ॥२४॥
समदृष्टिर्दृढा भक्तिरेकान्तित्वं शमो दमः॥ एतैर्यच्च
युतं ज्ञानं तज्ज्ञानं विद्धि बाहुज॥२५॥

तज्ज्ञानविषयं राजन्ब्रवीमि त्वं श्रुणुष्व मे ॥
यज्ज्ञात्वैति च निर्वाणं मुक्त्वा संसृति-
सागरम् ॥२६॥ यदनादीन्द्रियैर्हीनं
गुणभुग्गुणवर्जितम् अव्यक्त सदसद्भिन्नमिन्द्रिया-
र्थावभासकम्॥१७॥ विश्वभृच्चाखिलव्यापि त्वेकं
नानेव भासते॥ बाह्याभ्यन्तरतः पूर्णमसङ्गं तमसः
परम् ॥२८॥ दुर्ज्ञेयं चातिसूक्ष्मत्वाद्दीप्तानामपि
भासकम्॥ ज्ञेयमेतादृशं विद्धि ज्ञानगम्यं पुरातनम्
॥२९॥ एतदेव परं ब्रह्म ज्ञेयमात्मा परोऽव्ययः॥
गुणान्प्रकतिजान्भुङ्क्ते पुरुषः प्रकृतेः परः॥३०॥

गुणैस्त्रिभिरियं देहे बध्नाति पुरुषं दृढम्॥ यदा
प्रकाशः शान्तिश्च वृद्धे सत्त्वे तदाधिकम् ॥३१॥
लोभोऽशमः स्पृहारम्भः कर्मणां रजसो गुणः॥३२॥
सत्त्वाधिकः सुखं ज्ञानं कर्मसङ्गो रजोऽधिकः ॥
तमोऽधिकश्च लभते निद्रालस्यं सुखेतरत्॥३३॥
एषु त्रिषु प्रवृद्धेषु मुक्तिसंसृतिदुर्गतीः॥ प्रयान्ति
मानवा राजंस्तस्मात्सत्त्वयुतो भव॥३४॥ ततश्च

सर्वभावेन भज त्वं मां नरेश्वर ॥ भक्त्या चाव्यभिचारिण्या सर्वत्रैव च संस्थितम् ॥३५॥
अग्नौ सूर्ये तथा सोमे यच्च तारासु संस्थितम् ॥ विदुषि ब्राह्मणे तेजो विद्धि तन्मामकं नृप ॥३६॥
अहमेवाखिलं विश्वं सृजामि विसृजामि च ॥ ओषधीस्तेजसा सर्वा विश्वं चाप्याययाम्यहम् ॥३७॥ सर्वेन्द्रियाण्यधिष्ठाय जाठरं च धनंजयम् ॥ भुनज्मि चाखिलान्भोगान्पुण्यपाप विवर्जितः ॥३८॥ अहं विष्णुश्च रुद्रश्च ब्रह्मा गौरी गणेश्वरः ॥ इन्द्राद्या लोकपालाश्च ममैवांशसमुद्भवाः ॥३९॥ येन येन हि रूपेण जनो मां पर्युपासते ॥ तथा तथा दर्शयामि तस्मै रूपं सुभक्तितः ॥४०॥ इति क्षेत्रं तथा ज्ञाता ज्ञानं ज्ञेयं मयेरितम् ॥ अखिलं भूपते सम्यगुपपन्नाय पृच्छते ॥४१॥

ॐ तत्सदिति श्रीमद्गणेशगीतासूपनिषदर्थगर्भासु योगामृतार्थशास्त्र श्रीगणेशपुराणे उत्तरखण्डे गजानन- वरेण्यसंवादे क्षेत्रज्ञातृज्ञेयविवेकयोगो नाम नवमोऽध्यायः ॥९॥

(10)

श्रीगजानन उवाच ॥

देव्यासुरी राक्षसी च प्रकृतिस्त्रिविधा नृणाम् ॥ तासां फलानि चिह्नानि संक्षेपात्तेऽधुना ब्रुवे ॥१॥ आद्या संसाधयेन्मुक्तिं द्वे परे बन्धनं नृप ॥ चिह्नं ब्रवीमि चाद्यायास्तन्मे निगदतः श्रुणु ॥२॥ अपैशुन्यं दया क्रोधश्चापल्यं धृतिरार्जवम् ॥ तेजोऽभयमहिंसा च क्षमाशौचममानिता ॥३॥ इत्यादिचिह्नमाद्याया आसुर्याः श्रुणु सांप्रतम् ॥ अतिवादोऽभिमानश्च दर्पाऽज्ञानं सकोपता ॥४॥ आसुर्या एवमाद्यानि चिह्नानि प्रकृतेर्नृप ॥ निष्ठुरत्वं मदो मोहोऽहङ्कारो गर्व एव च ॥५॥
द्वेषो हिंसाऽदया क्रोध औद्धत्यं दुर्विनीतता ॥ आभिचारिककर्तृत्वं क्रूरकर्मरतिस्तथा ॥६॥ अविश्वासः सतां वाक्येऽशुचित्वं कर्महीनता ॥ निन्दकत्वं च वेदानां भक्तानामसुरद्विषाम् ॥७॥ मुनिश्रोत्रियविप्राणां तथा स्मृतिपुराणयोः ॥ पाखण्डवाक्ये विश्वासः सङ्गतिर्मलिनात्मनाम् ॥८॥ सदम्भमकर्मकर्तृत्वं स्पृहा च परवस्तुषु ॥ अनेककामनावत्वं सर्वदाऽनृतभाषणम् ॥९॥ परोत्कर्षासहिष्णुत्वं परकृत्यपराहतिः ॥ इत्याद्या बहवश्चान्ये राक्षस्याः प्रकृतेर्गुणाः ॥१०॥
पृथिव्यां स्वर्गलोके च परिवृत्य वसन्ति ते ॥ मद्भक्तिरहिता लोका राक्षसीं प्रकृतिं श्रिताः ॥११॥ तामसीं ये श्रिता राजन्यान्ति ते रौरवं ध्रुवम् ॥ अनिर्वाच्यं च ते दुःखं भुञ्जते नात्र संस्थिताः ॥१२॥ देवान्निसृत्य नरकाज्जायन्ते भुवि कुब्जकाः ॥ जात्यन्धाः पङ्गवो दीना हीनजातिषु ते नृप ॥१३॥ पुनः पापसमाचारा मय्यभक्ताः पतन्ति ते ॥ उत्पतन्ति हि मद्भक्ता यांगे काञ्चिद्यो निमाश्रिताः॥१४॥ लभन्ते स्वर्गतिं यज्ञैरन्यैर्धर्मैश्च भूमिप ॥ सुलभास्ताः सकामानां मयि भक्तिः सुदुर्लभा ॥१५॥
विमूढा मोहजालेन बद्धाः स्वेहे च कर्मणः ॥ अहं हन्ता अहं कर्ता अहं भोक्तोतिवादिनः ॥१६॥ अहमेवेश्वरः शास्ता अहं वेत्ता अहं सुखी ॥ एतादृशी मतिर्नृणामधः पातयती ह तान् ॥१७॥ तस्मादेतत्समुत्सृज्य दैवीं प्रकृतिमाश्रय ॥ भक्तिं

कुरु मदीयां त्वमनिशं दृढचेतसा ॥१८॥ सापि भक्तिस्त्रिधा राजन् सात्त्विकी राजसीतरा ॥ यद्देवान्भजते भक्त्या सात्त्विकी सा मता शुभा ॥१९॥ राजसी सा तु विद्येया भक्तिर्जन्ममृतिप्रदा ॥ यद्यक्षांश्चैव रक्षांसि यजन्ते सर्वभावतः ॥२०॥

वेदेनाविहितं क्रूरं साहङ्कारं सदम्भकम् ॥ भजन्त प्रेतभूतादीन्कर्म कुर्वन्ति कामुकम् ॥२१॥ शोषयन्तो निजं देहमन्तःस्थं मां दृढाग्रहाः ॥ तामस्येतादृशी भक्तिर्नृणां सा निरयप्रदा ॥२२॥ कामो लोभस्तथा क्रोधो दम्भश्चत्वार इत्यमी ॥ महाद्वाराणि वीचीनां तस्मादेतांस्तु वर्जयेत् ॥२३॥

ॐ तत्सदिति श्रीमद्गणेशगीतासूपनिषदर्थगर्भासु योगामृतार्थशास्त्रे श्रीगणेशपुराणे उत्तरखण्डे श्रीगजानन- वरेण्यसंवादे उपदेशयोगो नाम दशमोऽध्यायः ॥१०॥

(11)

श्रीगजानन उवाच ॥

तपोऽपि त्रिविधं राजन्कायिकादिप्रभेदतः ॥ ऋजुतार्जवशौचानि ब्रह्मचर्यमहिंसनम् ॥१॥ गुरुविज्ञद्विजातीनां पूजनं चासुरद्विषाम् ॥ स्वधर्मपालनं नित्यं कायिकं तप ईदृशम् ॥२॥ मर्मास्पृक्च प्रियं वाक्यमनुद्वेगं हितं ऋतम् ॥ अधीतिर्वेदशास्त्राणां वाचिकं तप ईदृशम् ॥४॥ अकामतः श्रद्धया च तपः सात्त्विकं च तत् ॥ ऋध्द्यै सत्कारपूजार्थं सदम्भं राजसं तपः ॥५॥ तदस्थिरं जन्ममृती प्रयच्छति न संशयः ॥ परात्मपीडकं यच्च तपस्तामसमुच्यते ॥६॥ विधिवाक्यप्रमाणार्थं सत्पात्रे देशकालतः ॥ श्रद्धया दीयमानं यद्दानं तत्सात्त्विकं मतम् ॥७॥ उपकारं फलं वापि काङ्क्षद्भिर्दीयते नरैः ॥ क्लेशतो दीयमानं वा भक्त्या राजसमुच्यते ॥८॥ अकालदेशतोऽपात्रेऽवज्ञा दीयते तु यत् ॥ असत्काराच्च यद्दत्तं तद्दानं तामसं स्मृतम् ॥९॥ ज्ञानं च त्रिविधं राजन् श्रुणुष्व स्थिरचेतसा ॥ त्रिधा कर्म च कर्तारं ब्रवीमि ते प्रसङ्गतः ॥१०॥

नानाविधेषु भूतेषु मामेकं वीक्षते तु यः ॥ नाशवत्सु च नित्यं मां तज्ज्ञानं सात्त्विकं नृप ॥११॥ तेषु वेत्ति पृथग्भूतं विविधं भावमाश्रितः ॥ मामव्ययं च तज्ज्ञानं राजसं परिकीर्तितम् ॥१२॥ हेतुहीनमसत्यं च देहात्मविषयं च यत् ॥ असदल्पार्थविषयं तामसं ज्ञानमुच्यते ॥१३॥ भेदतस्त्रिविधं कर्म विद्धि राजन्मयेरितम् ॥ कामनाद्वेषदम्भैर्यद्रहितं नित्यकर्म यत् ॥१४॥ कृतं विना फलेच्छां यत्कर्म सत्त्विकमुच्यते ॥ यद्बहुक्लेशतः कर्म कृतं यच्च फलेच्छया ॥१५॥

क्रियमाणं नृभिर्दम्भात्कर्म राजसमुच्यते ॥ अनपेक्ष्य स्वशक्तिं यदर्थक्षयकरं च यत् ॥१६॥ अज्ञानात्क्रियमाणं यत्कर्म तामसमीरितम् ॥ कर्तारं त्रिविधं विद्धि कथ्यमानं मया नृप ॥१७॥ धैर्योत्साही समोऽसिद्धौ सिद्धौ चाविक्रियस्तु यः ॥ अहङ्कारविमुक्तो यः स कर्ता सात्त्विको नृप ॥१८॥ कुर्वन्हर्षं च शोकं च हिंसां फलस्पृहां च यः ॥ अशुचिर्लुब्धको यश्च राजसोऽसौ निगद्यते ॥१९॥ प्रमादाज्ञानसहितः परोच्छेदपरः शठः ॥ अलसस्तर्कवान्यस्तु कर्ताऽसौ तामसो मतः ॥२०॥

सुखं च त्रिविधं राजन्दुःखं च क्रमतः श्रुणु ॥ सात्त्विकं राजसं चैव तामसं च मयोच्यते ॥२१॥

विषवद्भासते पूर्वं दुःखस्यान्तकरं च यत् ॥
इच्छ्यमानं तथा वृत्त्या यदन्तेऽमृतवद्भवेत् ॥२२॥
प्रसादात्स्वस्य बुद्धेर्यत्सात्त्विकं सुखमीरितम् ॥
विषयाणां तु यो भोगो भासतेऽमृतवत्पुरा ॥२३॥
हालाहलमिवान्ते यद्राजसं सुखमीरितम् ॥
तन्द्रिप्रमादसम्भूतमालस्यप्रभवं च यत् ॥२४॥
सर्वदा मोहकं स्वस्य सुखं तामसमीदृशम् ॥ न
तदस्ति यदेतैर्यन्मुक्त स्यात्त्रिविधैर्गुणैः ॥२५॥
राजन्ब्रह्मापि त्रिविधमातत्सदिति भेदतः॥
त्रिलोकेषु त्रिधा भूतमखिलं भूप वर्तते ॥२६ ॥
ब्रह्मक्षत्रियविट्शूद्राः स्वभावाद्भिन्नकर्मिर्णः ॥
तानि तेषां तु कर्माणि संक्षेपात्तेऽधुना वदे ॥२७॥
अन्तर्बाह्येन्द्रियाणां च वश्यत्वमार्जवं क्षमा ॥
नानातपांसि शौचं च द्विविधं ज्ञानमात्मनः ॥२८॥
वेदशास्त्रपुराणानां स्मृतीनां ज्ञानमेव च ॥ अनुष्ठानं
तदर्थानां कर्म ब्राह्ममुदाहृतम् ॥२९॥ दार्ढ्यं शौर्यं
च दाक्ष्यं च युद्धे पृष्ठाप्रदर्शनम् ॥ शरण्यपालनं दानं
धृतिस्तेजः स्वभावजम् ॥३०॥
प्रभुता मन औन्नत्यं सुनीतिर्लोकपालनम् ॥
पञ्चकर्माधिकारित्वं क्षात्रं कर्म समीरितम् ॥३१॥
नानावस्तुक्रयो भूमेः कर्षणं रक्षणं गवाम् ॥ त्रिधा
कर्माधिकारित्वं वैश्यकर्म समीरितम् ॥३२॥ दानं
द्विजानां शुश्रूषा सर्वदा शिवसेवनम् ॥ एतादृशं
नरव्याघ्र कर्म शौद्रमुदीरितम् ॥३३॥
स्वस्वकर्मरता एते मय्यर्प्याखिलकारिणः ॥
मत्प्रसादात्स्थिरं स्थानं यान्ति ते परमं नृप ॥३४॥
इति ते कथितो राजन्प्रसादाद्योग उत्तमः ॥
साङ्गोपाङ्गः सविस्तारोऽनादिसिद्धो मया
प्रिय ॥३५॥
युङ्क्ष्व योगं मयाख्यातं नाख्यातं कस्यचिन्नृप ॥
गोपयैनं ततः सिद्धिं परां यास्यस्यनुत्तमाम् ॥३६॥

व्यास उवाच ॥
इति तस्य वचः श्रुत्वा प्रसन्नस्य महात्मनः ॥
गणेशस्य वरेण्यः स चकार च यथोदितम् ॥३७॥
त्यक्त्वा राज्यं कुटुम्बं च कान्तारं प्रययौ रथात् ॥
उपदिष्टं यथा योगमास्थाय मुक्तिमाप्तवान् ॥३८॥
इमं गोप्यतमं योगं श्रुणोति श्रद्धया तु यः॥ सोऽपि
कैवल्यमाप्नोति यथा योगी तथैव सः ॥३९॥ य इमं
श्रावयेद्योगं कृत्वाऽस्वार्थं सुबुद्धिमान् ॥ यथा योगी
तथा सोऽपि परं निर्वाणमृच्छति ॥४०॥
यो गीतां सम्यगभ्यस्य ज्ञात्वा चाथ गुरोर्मुखात् ॥
कृत्वा पूजां गणेशस्य प्रत्यहं पठते तु यः ॥४१॥
एककालं द्विकालं वा त्रिकालं वापि यः पठेत् ॥
ब्रह्मीभूतस्य तस्यापि दर्शनान्मुच्यते नरः ॥४२॥ न
यज्ञैर्न व्रतैर्दानैर्नाग्निहोत्रैर्महाधनैः ॥ न वेदैः
सम्यगभ्यस्तैः सम्यग्ज्ञातैः सहाङ्गकः ॥४३॥
पुराणश्रवणैर्नैव न शास्त्रैः साधुचिन्तितैः ॥ प्राप्यते
ब्रह्म परममनया प्राप्यते नरः ॥४४॥ ब्रह्मघ्नो मद्यपः
स्तेयी गुरुतल्पगऽमोऽपि यः ॥ चतुर्णां यस्तु संसर्गी
महापातककारिणाम् ॥४५॥
स्त्रीहिंसागोवधादीनां कर्तारो ये च पापिनः ॥ ते
सर्वे प्रतिमुच्यन्ते गीतामेतां पठन्ति चेत् ॥४६॥ यः
पठेत्प्रयतो नित्यं स गणेशो न संशयः ॥ चतुर्थ्यां यः
पठेद्भक्त्या सोऽपि मोक्षाय कल्पते ॥४७॥
तत्तत्क्षेत्रं समासाद्य स्नात्वाभ्यर्च्य गजाननम् ॥
सकृद्गीतां पठन्भक्त्या ब्रह्मभूताय कल्पते ॥४८॥
भाद्रे मासि सिते पक्षे चतुर्थ्यां भक्तिमान्नरः ॥ कृत्वा
महीमयीं मूर्तिं गणेशस्य चतुर्भुजाम् ॥४९॥
सवाहनां सायुधां च समभ्यर्च्य यथाविधि ॥ यः
पठेत्सप्तकृत्वस्तु गीतामेतां प्रयत्नतः ॥५०॥

ददाति तस्य सन्तुष्टो गणेशो भोगमुत्तमम् ॥
पुत्रान्पौत्रान्धनं धान्यं पशुरत्नादिसम्पदः ॥५१॥
विद्यार्थिनो भवेद्विद्या सुखार्थी सुखमाप्नुयात् ॥
कामानन्याँल्लभेत्कामी मुक्तिमन्ते प्रयाति ते ॥५२॥

इति श्रीगणेशपुराणे श्रीमद्गणेशगीता-
सूपनिषदर्थगर्भासु योगामृतार्थशास्त्रे
श्रीगजाननवरेण्यसंवादे त्रिविधवस्तु-
विवेकनिरूपणं नामैकादशोऽध्यायः ॥११॥

From Hazara-Ramasvami Temple, Hampi

१. गृत्समदीया बाह्यपूजा ।

ऐल उवाच ॥

बाह्यपूजां वद विभो गृत्समदप्रकीर्तिताम् ॥ येन मार्गेण विघ्नेशं भजिष्यसि निरन्तरम् ॥१॥

गार्ग्य उवाच ॥

आदौ च मानसीं पूजां कृत्वा गृत्समदो मुनिः ॥ बाह्यां चकार विधिवत्तां शृणुष्व सुखप्रदाम् ॥२॥ हृदि ध्यात्वा गणेशानं परिवारादिसंयुतम् ॥ नासिकारन्ध्रमार्गेण तं बाह्याङ्गं चकार ह ॥३॥ आदौ वैदिकमन्त्रं स गणानां त्वेति संपठन् ॥ पश्चाच्छ्लोकं समुच्चार्य पूजयामास विघ्नपम् ॥४॥

गृत्समद उवाच ॥

चतुर्बाहुं त्रिनेत्रं च गजास्यं रक्तवर्णकम् ॥ पाशाङ्कुशादिसंयुक्तं विनायकं प्रचिन्तयेत् ॥५॥ आगच्छ ब्रह्मणां नाथ सुरासुरवरार्चित ॥ सिद्धिबुध्यादिसंयुक्त भक्तिग्रहणलालस ॥६॥ कृतार्थोऽहं सफलो मे भवोऽभवत् ॥७॥ रत्नसिंहासनं स्वामिन् गृहाण गणानायक ॥ तत्रोपविश्य विघ्नेश रक्ष भक्तान् विशेषतः ॥८॥ सुवासिताभिरद्भिश्च पादप्रक्षालनं विभो ॥ शीतोष्णाम्भः करोमि ते गृहाण पाद्यमुत्तमम् ॥९॥ सर्वतीर्थाहृतं तोयं सुवासितं सुवस्तुभिः॥ आचमनं च तेनैव कुरुष्व गणनायक ॥१०॥ रत्नप्रवालमुक्ताद्यैरनर्घ्यैः संस्कृतं विभो ॥ अर्घ्यं गृहाण हेरम्ब द्विरदानन तोषकम् ॥११॥ दधिमधुघृतैर्युक्तं मधुपर्कं गजानन ॥ गृहाण भावसंयुक्त मया दत्तं नमोऽस्तु ते ॥१२॥ पाद्ये च मधुपर्के च स्नाने वस्त्रोपधारणे ॥ उपवीते भोजनान्ते पुनराचमनं कुरु ॥१३॥ चम्पकाद्यै-र्गणाध्यक्ष वासितं तैलमुत्तमम् ॥ अभ्यङ्गं कुरु सर्वेश लम्बोदर नमोऽस्तुते ॥१४॥ यक्षकर्दमकाद्यैश्च विघ्नेश भक्तवत्सल ॥ उद्वर्तनं कुरुष्व त्वं मया दत्तैर्महाप्रभो ॥१५॥ नानातीर्थजलैर्ढुण्ढे सुखोष्णभावरूपकः ॥ कमण्डलूद्भवैः स्नानं कुरु ढुण्ढे समर्पितैः ॥१६॥ कामधेनुसमुद्भूतं पयः परमपावनम् ॥ तेन स्नानं कुरुष्व त्वं हेरम्ब परमार्थवित् ॥१७॥ पञ्चामृतानां मध्ये तु जलैः स्नानं पुनः पुनः॥ कुरु त्वं सर्वतीर्थेभ्यो गङ्गादिभ्यः समाहृतैः ॥१८॥ दधि धेनुपयोद्भूतं मलापरहणं परम् ॥ गृहाण स्नानकार्यार्थं विनायक दयानिधे ॥१९॥ धेनुदुग्धोद्भवं ढुण्ढे घृतं सन्तोषकारकम् ॥ महामलापघातार्थं तेन स्नानं कुरु प्रभो ॥२०॥

सारघं संस्कृतं पूर्णं मधु मधुरसोद्भवम् ॥ गृहाण स्नानकार्यार्थं विनायक नमोऽस्तु ते ॥२१॥ इक्षुदण्डसमुद्भूतां शर्करां मलनाशिनीम् ॥ गृहाण गणनाथ त्वं तया स्नानं समाचर ॥२२॥ यक्षकर्दमकाद्यैश्च स्नानं कुरु गणेश्वर ॥ अन्त्यं मलहरं शुद्धं सर्वसौगन्ध्यकारकम् ॥२३॥ ततो गन्धाक्षतादींश्च दूर्वाङ्कुरान् गजानन ॥ समर्पयामि स्वल्पांस्त्वं गृहाण परमेश्वर ॥२४॥ ब्रह्मणस्पतिसूक्तैश्च ह्येकविंशतिकारकैः ॥

अभिषेकं करोमि ते गृहाण द्विरदानन ॥२५॥ तत आचननं देव सुवासितजलेन च ॥ कुरुष्व गणनाथ त्वं सर्वतीर्थजलेन वै ॥२६॥ वस्त्रयुग्मं गृहाण त्वमनर्घ्यं रक्तवर्णकम् ॥ लोकलज्जाहरं चैव विघ्ननाथ नमोऽस्तु ते ॥२७॥ उत्तरीयं सुचित्रं वै नमस्ताराङ्कितं यथा ॥ गृहाण सर्वसिद्धीश मया दत्तं सुभक्तित:॥२८॥ उपवीतं गणाध्यक्ष गृहाण च ततः परम् ॥ त्रैगुण्यमयरूपं तु प्रणवग्रन्थि-बन्धनम् ॥२९॥ ततः सिन्दूरकं देव गृहाण गणनायक ॥ अङ्गलेपनभावार्थं सदानन्द विवर्धनम्॥३०॥

नानाभूषणकान्तित्वमङ्गेषु विविधेषु च ॥ भासुरस्वर्णरत्नैश्च निर्मितानि गृहाण भो ॥३१॥ अष्टगन्धसमायुक्तं गन्धं रक्तं गजानन ॥ द्वादशाङ्गेषु ते ढुण्ढे लेपयामि सुचित्रवत्॥३२॥ रक्तचन्दनसंयुक्तान् अथ वा कुङ्कुमैर्युतान् ॥ अक्षतान् विघ्नराज त्वं गृहाण भालमण्डले ॥३३॥ चम्पकादिसुवृक्षेभ्यः सम्भूतानि गजानन ॥ पुष्पाणि शमिमन्दारदूर्वादीनि गृहाण च ॥३४॥ दशांङ्गं गुग्गुलं धूपं सर्वसौरभकारकम् ॥ गृहाण त्वं मया दत्तं विनायक महोदर ॥३५॥ नानाजातिभवं दीपं गृहाण गणनायक ॥ अज्ञानमलजं दोषं हरन्तं ज्योतिरूपकम् ॥३६॥ चतुर्विधान्नसंपन्नं मधुरं लड्डुकादिकम् ॥ नैवेद्यं ते मया दत्तं भोजनं कुरु विघ्नप ॥३७॥ सुवासितं गृहाणेदं जलं तीर्थसमाहृतम् ॥ भुक्तिमध्ये च पानार्थं देवदेवेश ते नम:॥३८॥ भोजनान्ते करोद्वर्तं यक्षकर्दमकेन च ॥ कुरुष्व त्वं गणाध्यक्ष पिब तोयं सुवासितम् ॥३१॥ दाडिमं खर्जुरं द्राक्षां रम्भादीनि फलानि वै॥ गृहाण देवदेवेश नानामधुरकाणि तु ॥४०॥

अष्टाङ्गं देव ताम्बूलं गृहाणमुखवासनम् ॥ सकृद्विघ्नराज त्वं मया दत्तं विशषत:॥४१॥ दक्षिणां काञ्चनाद्यां तु नानाधातुसमुद्भवाम् ॥ रत्नाद्यैः संयुतां ढुण्ढे गृहाण गणनायक ॥ दानानि तु विचित्राणि मया दत्तानि विघ्नप ॥४३॥ तत आभरणं तेऽहमर्पयामि विधानतः ॥ विविधैरुपचारैश्च तेन तुष्टो भव प्रभो ॥४४॥ ततो दूर्वाङ्कुरान् ढुण्ढे एकाविंशतिसङ्ख्यकान् ॥ गृहाण कार्यसिध्यर्थं भक्तवात्सल्यकारणात् ॥४५॥ नानादीपसमायुक्तं नीराञ्जनं गजानन ॥ गृहाण भावसंयुक्तं सर्वसिद्धिप्रदो भव ॥४७॥ आर्तिक्यं च सकर्पूरं नानादीपमयं प्रभो ॥ गृहाण ज्योतिषां नाथ तथा नीराजयाम्यहम् ॥४८॥ पादयोस्ते तु चत्वारि नाभौ द्वे वदने विभो । एकं तु सप्तवारं वै सर्वाङ्गेषु निरञ्जनम् ॥४९॥ चतुर्वेदभवैर्मन्त्रैः गाणपत्यैर्गजानन ॥ मन्त्रितानि गृहाण त्वं पुष्पपत्राणि विघ्नप ॥५०॥

पञ्चप्रकारकैः स्तोत्रैर्गाणपत्यैर्गणाधिप ॥ स्तौमि त्वां तेन सन्तुष्टो भव भक्तिप्रदायक ॥५१॥ एकविंशतिसंख्यं वा त्रिसंख्यं वा गजानन ॥ प्रादक्षिण्यं गृहाण त्वं ब्रह्मन् ब्रह्मेशभावन ॥५२॥ साष्टाङ्गं प्रणतिं नाथ एकविंशतिसम्मिताम् ॥५३॥ न्यूनातिरिक्तभावार्थं किंचिद् दूर्वाङ्कुरान् प्रभो ॥ समर्पयामि तेन त्वं साङ्गां पूजां कुरुष्व ताम् ॥५४॥ त्वया दत्तं स्वहस्तेन निर्माल्यं चिन्तयाम्यहम् ॥ शिखायां धारयाम्येव सदा सर्वप्रदं च तत् ॥५५॥ अपराधानसंख्यातान् क्षमस्व गणनायक ॥ भक्तं कुरु च मां ढुण्डे तव पादप्रियं सदा ॥५६॥ त्वं माता त्वं पिता मे वै सुहृत्संबंधिकादयः ॥ त्वमेव कुलदेवश्च सर्वं त्वं मे न संशयः ॥५७॥ जाग्रत्स्वप्नसुषुप्तिभिः

देहवाङ्मानसैः कृतम् ॥ सांसर्गिकेण यत्कर्म गणेशाय समर्पये ॥५८॥ बाह्यं नानाविधं पापं महोग्रं तल्लयं व्रजेत् ॥ गणेशपादतीर्थस्य मस्तके धारणात्किल ॥५९॥ पादोदकं गणेशस्य पीतं मर्त्येण तत्क्षणात् । सर्वान्तर्गतजं पापं नश्यति गणनातिगम् ॥६०॥
गणेशोच्छिष्टगन्धं वै द्वादशाङ्गेषु चर्चयेत् ॥ गणेशतुल्यरूपः सः दर्शनात्सर्वपापहा ॥६१॥ यदि गणेशपूजादौ गम्धभस्मादिकं चरेत् ॥ अथवोच्छिष्टगन्धं तु नोचेत्तत्र विधिं चरेत् ॥६२॥ द्वादशाङ्गेषु विघ्नेशं नाममन्त्रेण चार्चयेत् ॥ तेन सोऽपि गणेशेन समो भवति भूतले ॥६३॥ आदौ गणेश्वरं मूर्ध्नि ललाटे विघ्ननायकम् ॥ दक्षिणे कर्णमूले तु वक्रतुण्डं समर्चयेत् ॥६४॥ वामे कर्णस्य मूले वै चैकदन्तं समर्चयेत् ॥ कण्ठे लम्बोदरं देवं हृदि चिन्तामणिं तथा ॥६५॥ बाहौ दक्षिणके चैव हेरम्बं वामबाहुके ॥ विकटं नाभिदेशे तु विघ्ननाथं समर्चयेत् ॥६६॥ कुक्षौ दक्षिणगायां तु मयूरेशं समर्चयेत् ॥ वामकुक्षौ गजास्यं वै पृष्ठे स्वान्नदवासिनम् ॥६७॥ सर्वाङ्गलेपनं शस्तं चित्रितं चाष्टगन्धकैः ॥ गाणेशानां विशेषेण सर्वभद्रस्य कारणात् ॥६८॥ ततोच्छिष्टं तु नैवेद्यं गणेशस्य भुनज्म्यहम् ॥ भुक्तिमुक्तिप्रदं पुण्यं नानापापनिकृन्तनम् ॥६९॥ गणेशस्मरणेनैव करोमि कालखण्डनम् ॥ गाणपत्यैश्च संवासः सदाऽस्तु मे गजानन ॥७०॥

गार्ग्य उवाच ॥

एवं गृत्समदश्चैव चकार बाह्यपूजनम् ॥ त्रिकालेषु महायोगी सदा भक्तिसमन्वितः ॥७१॥ तथा कुरु महीपाल गाणपत्यो भविष्यसि ॥ यथा गृत्समदः साक्षात्तथा त्वमपि निश्चितम् ॥७२॥

गणेशबाह्यपूजा समाप्ता॥

द्वादशावरणपूजा ॥

आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीगणेशदेवताप्रसादार्थं द्वादशावरणपूजां करिष्ये ॥

१. तत्र प्रथमावरणापूजां करिष्ये ॥
ॐ गणनाथाय नमः॥ ॐ हेरम्बाय नमः॥
ॐ इभवक्त्राय नमः॥ ॐ मूषकवाहनाय नमः॥
ॐ शिवप्रियाय नमः॥ ॐ उमापुत्राय नमः॥
प्रथमावरणपूजां समर्पयामि ॥

२. द्वितीयावरणपूजां करिष्ये ॥
ॐ वरगणपतये नमः॥ ॐ सुरगणपतये नमः॥ ॐ चण्डगणपतये नमः ॥ ॐ इभवक्त्रगणपतये नमः॥ ॐ क्षिप्रगणपतये नमः॥ ॐ प्रसादगणपतये नमः॥ ॐ लम्बोदरगणपतये नमः॥
द्वितीयावरणपूजां समर्पयामि ॥

३. तृतीयावरणपूजां करिष्ये ॥
ॐ इन्द्राय नमः॥ ॐ अग्नये नमः॥ ॐ यमाय नमः ॥ ॐ निऋतये नमः॥ ॐ वरुणाय नमः॥ ॐ वायवे नमः॥ ॐ सोमाय नमः॥ ॐ ईशानाय नमः।
तृतीयावरणपूजां समर्पयामि॥

४. चतुर्थावरणपूजां करिष्ये ॥

ॐ विनायकाय नमः॥ ॐ द्वैमातुराय नम्॥
ॐ विघ्नराजाय नमः॥ ॐ गणाधिपाय नमः॥
ॐ हेरम्बाय नमः॥ ॐ एकदन्ताय नमः॥
ॐ लम्बोदराय नमः॥
चतुर्थावरणपूजां समर्पयामि।

५. पंचमावरणपूजां करिष्ये॥
ॐ तीक्ष्णदंष्ट्राय नमः॥ ॐ सूतरूपाय नमः॥
ॐ गजास्याय नमः॥ ॐ त्रिनेत्राय नमः।
ॐ रक्तप्रियाय नमः॥ ॐ बृहदुदराय नमः।
ॐ सुरवंद्याय नमः। ॐ शिवसुताय नमः॥
पंचमावरणपूजां समर्पयामि।

६. षष्टावरणपूजां करिष्ये॥
ॐ भद्रकालिने नमः॥ ॐ भैरवाय नमः।
ॐ शेषाय नमः। ॐ वरुणाय नमः।
ॐ वरेण्याय नमः। ॐ सतां पतये नमः।
ॐ संवत्सराय नमः। ॐ शान्ताय नमः॥
षष्टावरणपूजां समर्पयामि।

७. सप्तमावरणपूजां करिष्ये॥
ॐ सरस्वत्यै नमः। ॐ लक्ष्म्यै नमः। ॐ भारत्यै नमः। ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ रुद्राय नमः। ॐ आकाशाय नमः। ॐ वेदाय नमः॥
ॐ वास्तुपुरुषाय नमः॥
सप्तमावरणपूजां समर्पयामि।

८. अष्टमावरणपूजां करिष्ये॥
ॐ वक्रतुण्डविनायकाय नमः।
ॐ एकदन्तविनायकाय नमः।
ॐ त्रिमुखविनायकाय नमः।
ॐ पंचास्यविनायकाय नमः।
ॐ हेरम्बविनायकाय नमः।
ॐ विघ्नराजविनायकाय नमः।
ॐ वरदविनायकाय नमः।
ॐ मोदकविनायकाय नमः।
ॐ सिद्धिविनायकाय नमः॥
अष्टमावरणपूजां समर्पयामि॥

९. नवमावरणपूजां करिष्ये॥
ॐ अभयविनायकाय नमः।
ॐ सिंहतुण्डविनायकाय नमः।
ॐ कुपिताक्षविनायकाय नमः।
ॐ दण्डहस्तविनायकाय नमः।
ॐ पिचंडिविनायकाय नमः।
ॐ उद्दंडतुण्डविनायकाय नमः॥
नवमावरणपूजां समर्पयामि॥

१०. दशमावरणपूजां करिष्ये॥
ॐ स्थूलदन्तविनायकाय नमः।
ॐ कालप्रियविनायकाय नमः।
ॐ चतुर्मुखविनायकाय नमः।
ॐ द्वितुण्डविनायकाय नमः।
ॐ ज्येष्ठविनायकाय नमः।
ॐ कलाविनायकाय नमः।
ॐ नागेशविनायकाय नमः।
ॐ सृष्टिविनायकाय नमः।
दशमावरणपूजां समर्पयामि।

११. एकादशावरणपूजां करिष्ये॥
ॐ मणिकर्णविनायकाय नमः।
ॐ आशाविनायकाय नमः।
ॐ सृष्टिविनायकाय नमः।
ॐ यक्षविनायकाय नमः।

ॐ गजकर्णविनायकाय नमः।
ॐ चित्रघण्टविनायकाय नमः।
ॐ स्थूलजंघविनायकाय नमः।
ॐ मंगलविनायकाय नमः।
एकादशावरणपूजां समर्पयामि।

१२. द्वादशावरणपूजां करिष्ये॥
ॐ मोदकविनायकाय नमः।
ॐ प्रमोदकविनायकाय नमः।
ॐ आमोदकविनायकाय नमः।
ॐ सुमुखविनायकाय नमः।
ॐ दुर्मुखविनायकाय नमः।
ॐ ज्ञानविनायकाय नमः।
ॐ द्वारविनायकाय नमः।
ॐ विमुक्तविनायकाय नमः।
द्वादशावरणपूजां समर्पयामि।

अंगपूजा

ॐ गणेशाय नमः पादौ पूजयामि। ॐ अघनाशिने नमः जानुद्वयं पूजयामि। ॐ सुबाहवे नमः ऊरुद्वयं पूजयामि। ॐ विघ्नहर्त्रे नमः कटिं पूजयामि। ॐ लम्बोदराय नमः उदरं पूजयामि। ॐ गणेशाय नमः हृदयं पूजयामि। ॐ कपिलाय नमः स्तनद्वयं पूजयामि। ॐ पार्थिवाय नमः भुजद्वयं पूजयामि। ॐ मंजुलकण्ठाय नमः कण्ठं पूजयामि। ॐ स्कंधाग्रजाय नमः स्कन्धौ पूजयामि। ॐ पाशहस्ताय नमः हस्तौ पूजयामि। ॐ गजवक्त्राय नमः मुखं पूजयामि। ॐ विकटनेत्राय नमः नेत्राणि पूजयामि। ॐ गजकर्णाय नमः कर्णौ पूजयामि। ॐ सर्वसिद्धिप्रदायकाय नमः शिरः पूजयामि। ॐ
ॐ सर्वेश्वराय नमः सर्वाङ्गं पूजयामि॥

III EXCERPT FROM BRAHMĀṆḌA-PURĀṆA

अपामार्जनम् ।

ॐ अस्य श्रीमहागणपत्यपामार्जनस्तोत्रमालामन्त्रस्य ब्रह्मा ऋषिः।

श्रीमहागणपतिर्देवता।

नानाविधानि छन्दांसि । मम सकलदोषरोगशान्तये दिव्यभौमान्तरिक्षत्रिविधोत्पातशान्तये सर्वाभीष्टफलप्राप्त्यर्थे जपे विनियोगः।

ॐ गणेशाय गुणेशाय निर्गुणाय गुणात्मने। पूर्णाय परमेशाय विघ्नराजाय संमुदे ॥१॥ अरूपबहुरूपाय व्यापिने परमात्मने ॥ अकल्मषाय शुद्धाय ध्यातुः पापहराय च ॥२॥ विनायकाय धाम्ने च मयूरेशाय सर्वशः ॥ चिन्तामणिगणेशाय गजदन्तधराय च ॥३॥ नमस्कृत्य प्रवक्ष्यामि यथा सिध्यतु मे वचः ॥ आखुध्वज मयुरेश देवदेव जगत्पते ॥५॥ सिद्धिबुद्धिप्रदात्रे च सकलं मे हराशुभम्॥ गणनाथ गणाधीश गजानन गणेश्वर ॥६॥ ढुण्ढिराज गदापाणे दन्तायुधधर प्रभो ॥ मृत्युबंधार्तिभयदं दुर्दिष्टस्य च यत्फलम् ॥७॥ परापध्यानसहितं प्रयुक्तं चाभिचारिकम् ॥ गरस्पर्शमहारोगं प्ररोगं च यथाकृतम् ॥८॥ एकाहिकं द्व्याहिकं च त्र्याहिकं च महाज्वरम् ॥ चातुर्थिकं पाक्षिकं वा सन्निपातज्वरं तथा ॥९॥ दोषमामयसंभूतमपस्मारभगंदरम् ॥ शिरोरोगं नेत्ररोगं कर्णरोगमथाखिलम् ॥१०॥

वाल्मीकं पीनसं हिक्कां संधिशूलं क्षयं तथा॥ कासं श्वासं तथा दद्रुं लूताविस्फोटकं तथा॥११॥ मेहप्लीहयक्ष्मगुल्मव्यंगपिप्लुरुजं पुनः ॥ दशदोर्दण्डभृद्देवो महागणपतिः क्षणात् ॥१२॥ हरतु प्रणतः प्राणत्राणकारी शिवात्मजः॥ उक्तानुक्ताश्च ये रोगा ये च जन्मान्तरार्जिताः ॥१३॥ ते सर्वे विलयं यान्तु हेरम्बस्य भयार्दिताः ॥ डाकिन्यः पिशिताशिन्यः भूतवैतालिकास्तथा ॥१४॥ ते सर्वे विलयं यान्तु ढुण्ढिराजभयातुराः॥ स्थावरं जंगमं चैव कृत्रिमं चापि यद्विषम् ॥१५॥ दन्तोद्भवं नखोद्भूतमाकाशप्रभवं तथा॥ पिशाचप्रभवं यच्च विषमत्यन्तदुःसहम् ॥१६॥ शमयित्वाशु भगवान् परमात्मा गजाननः ॥ पह्लीं क्रों ॐ नमः । सर्वविघ्नाधिपतये सर्वार्थसिद्धिदाय सर्वदुःख प्रशनमाय एह्येहि भगवन् सर्वदुष्टरोगान् खादय खादय स्तंभय स्तंभय स्तंभय ह्रीं गां नमः स्वाहा॥

क्रों ह्रीं ढुण्ढिमयूरेश नामोच्चारणभेषजात् ॥ क्षीयन्तां सकला रोगाः सत्यं सत्यं न संशयः॥१७॥ ग्रहा बालग्रहाश्चैव पिशाचा यक्षराक्षसाः॥ नश्यन्ति स्मरणादेव महागणपतेः प्रभो ॥१८॥ अतिसारज्वराः घोराः कूष्माण्डजृम्भकादयः ॥ ते सर्वे प्रशमं यान्ति विघ्नराजेन तर्जिताः ॥१९॥

सिंहव्याघ्रवराहोष्ट्रखरमार्जारमूषकाः ॥ चौराश्च राजचाराश्च शत्रवो दुष्टचेतसः ॥२०॥
ते सर्वे विलयं यान्तु धर्षिता धूमकेतुना ॥ प्राच्यां दिशि प्रतीच्यां च दक्षिणोत्तरयोस्तथा ॥२१॥
विदिक्षु दिक्षु सर्वासु हेरम्बः पातु मां सदा ॥ उक्तानुक्तस्थले चाव्यात् सदा देवो महोत्कटः ॥२२॥
स्मरणेन गणेशस्य क्षयमेनांसि यान्ति यत् ॥ तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु ॥२३॥ यथा विघ्नश्वरो देवः पुराणेषु प्रगीयते ॥ सत्येन तेन सकलं यन्मयोक्तं यथास्तु तत् ॥२४॥
शमीपत्रैर्गणेशस्य सदा सन्तोषसाधकः ॥ संमार्जितं मया गात्रमरोगं भवतु क्षणात् ॥२५॥ मदोत्कटो गणाध्यक्षो धूमकेतुर्द्विपाननः ॥ शान्ताः समस्तरोगास्ते ग्रहाः सर्वविषाणि च ॥२६॥
भूतानि प्रलयं यान्ति संस्मृते विघ्नसूदने ॥ एतत्समस्तरोगेषु भूतग्रहभयेषु च ॥२७॥
अपामार्जनकं स्तोत्रमिदमस्त्यभिमन्त्रितम् ॥२८॥
इयं शमी विघ्नगणेश्वरप्रिया गणेश्वरोऽहं स्वयमेव चागतः ॥ अस्मिन्नरे दुष्टमशेषमस्ति स्वस्थो भवत्येष गणेशवाक्यतः ॥२९॥ शान्तिरस्तु शिवं चास्तु दुष्टमस्य प्रशाम्यतु ॥ यदस्ति दुरितं किंचित्तत्क्षिप्तं लवणाम्भसि ॥३०॥

स्वास्थ्यमस्य सदैवास्तु सिद्धिबुद्धीशकीर्तनात् ॥ यत्र चैषागतं पापं तत्रैव प्रतिगच्छतु ॥३१॥
एतद्रोगादि पीडासु जन्तुना हितमिच्छता ॥ गाणेश्वरेण कर्तव्यमपामार्जनकं परम् ॥३२॥
अनेन सर्वदुःखानि प्रशमं यान्त्यसंशयः ॥ सर्वभूतहितार्थाय कुर्यात्तस्मात्सदैव हि ॥३३॥
गणेशप्रियकत्स्तोत्रं यः पठेत्प्रयतः सदा ॥ तस्य रोगा न बाध्यन्ते सत्यमेतत्ब्रवीम्यहम् ॥३४॥
सकृत्पठनमात्रेण भालचन्द्रप्रभावतः ॥ अश्वमेधसहस्रस्य फलं प्राप्नोति निश्चितम् ॥३५॥
अपामार्जनकं स्तोत्रं गणेशप्रीतिवर्धनम् ॥ सकृदुच्चरितं येन तस्य मुक्तिः करे स्थिरा ॥३६॥
सुमुखस्तवराजोऽयं मुखे यस्य विराजते ॥ सुमुखीभूय सद्योऽसौ निजलोकं स गच्छति ॥३७॥
इयं संजीवनी विद्या देवानामपि दुर्लभा ॥ अभिषिक्तो यथा जन्तुः मृत्युग्रस्तोऽपि जीवति ॥३८॥ प्रसन्नेन गणेशेन मह्यमुक्तस्स्तवो ह्यसौ ॥ लोकोपरि दयां कृत्वा मया तुभ्यं प्रकाश्यते ॥३९॥

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे गणेशापामार्जनस्तोत्रम् ॥

IV GAṆEŚA-PŪJĀVIDHI

श्रीगणेश षोडशोपचार विशेषपूजाविधिः

पूर्वाराधनम्

आचमनं - ॐ गणेशाय नमः॥ ॐ ढुण्ढिराजाय नमः॥ ॐ हेरम्बाय नमः। इति त्रिराचमनम् । ॐ वक्रतुण्डाय नमः । (हस्तौ प्रक्षाल्य) ॐ शूर्पकर्णाय नमः। ॐ विघ्नेशाय नमः। ॐ चिन्तामणये नमः। ॐ गजाननाय नमः। ॐ लम्बोदराय नमः। ॐ मोहवर्जिताय नमः। ॐ एकदन्ताय नमः। ॐ ब्रह्मणस्पतये नमः। ॐ विनायकाय नमः। ॐ ज्येष्ठराजाय नमः। ॐ विकटाय नमः। ॐ कपिलाय नमः। ॐ नमः। ॐ धरणीधराय नमः। ॐ आशापूरकाय नमः। ॐ धूम्रकेतवे नमः। ॐ मयूरेशाय नमः। ॐ स्वानंन्दवासकारकाय नमः।

२. कुट्टलविधि - शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥

३. सिन्दूरतिलकधारणविधिः - गणेशाय नमःस्तुभ्यं हेरम्बायैकदन्तिने। सिद्धिबुद्धिपते नाथ सर्वामङ्गलहारक॥

४. पुनराचमनम् - ॐ गणेशाय नमः ... प्रणवस्य .... विनियोगः। ॐ भूः ... ॐ सत्यम्। ॐ भूर्भुवस्वः तत्सवितुः ... प्रचोदयात्। ॐ आपो ... स्वरोम्।

५. देवतानमस्कारः - ॐ श्रीमन्महागणाधिपतये नमः । ... एतत्कर्मप्रधानदेवताभ्यो नमः । ... प्रारभ्मकाय निर्विघ्नमस्तु । सुमुखश्चैकदन्तश्च ... गणाधिपतये नमः । वक्रतुण्ड ... सर्वदा । गणनाथसरस्वती .... वेदवाणीप्रवृत्तये। गुरुब्रह्मा .... श्रीगुरवे नमः।

६. संकल्पः । श्रीमद्भगवतो महापुरुषस्य ... शुभपुण्यतिथौ - मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अस्माकं सर्वेषां सकुटुम्बानां सपरिवाराणां क्षेम - स्थैर्य - विजय - अभय - आयुरारोग्यैश्वर्याभिवृध्यर्थं द्विपदचतुष्पदसहितानां शान्त्यर्थं पुष्ट्यर्थं तुष्ट्यर्थं समस्तमङ्गलावाप्त्यर्थं समस्तदुरितोपशान्त्यर्थं समस्ताभ्युदयार्थं इष्टकामसंसिध्यर्थं कल्पोक्तफलवाप्त्यर्थं इह जन्मनि जन्मजन्मान्तरे च सकुटुम्बस्य क्षेमस्थित्यायुरायोग्यैश्वर्यादिवृद्धि - सर्वकामनिर्विघ्नसिद्धि पुत्रपौत्रधनधान्य विद्याजययशसमृद्धि - द्वारा श्रीमहागणपतिप्रीत्यर्थं यथाशक्ति यथाज्ञानेन यथामिलितोपचारद्रव्यैः पुरुषसूक्त - पुराणोक्तमन्त्रैः ध्यानावाहनादिषो-

डशोपचारैः पूजामहं करिष्ये । तथा चासनादि कलशपूजनं शंखार्चनं घण्टाराधनं दीपपूजनं च करिष्ये । तथा च शरीरशुद्ध्यर्थं षंडगन्यासं च करिष्ये । आदौ निर्विघ्नतासिद्ध्यर्थं श्रीमहागणपतिस्मरणं करिष्ये ।

७. गणानां त्वा ... शौनको गृत्समदो गणपतिर्जगती । गणपतिस्मरणे विनियोगः । ॐ गणानां त्वा ...ऋद्धिसिद्धिसहितं साङ्गं सपरिवारं सायुधं सशक्तिकं श्रीमहागणपतिं स्मरामि ।

८. आसनविधिः । पृथिवीति मंत्रस्य मेरुपृष्ठऋषिः । कूर्मो देवता । सुतलं छंदः । आसने विनियोगः । ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । वराहेण धृतो विष्णुः संस्थितो ढुण्ढिनामतः ॥ गणराजकृपाधारभूते परमपावनी । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

ऊर्ध्वकेशि ... ह्यपराजिते । अपसर्पन्तु ... शिवाज्ञया । अपक्रामन्तु ... समारभे । तीक्ष्णदंष्ट्र ... दातुमर्हसि ।

९. षडङ्गन्यासः - ॐ यत्पुरुषं ... पादा उच्येते । ॐ गां अङ्गुष्ठाभ्यां नमः । हृदयाय नमः ॥ ॐ ब्राह्मणोऽस्य ... अजायत । ॐ गीं तर्जनीभ्यां नमः । शिरसे स्वाहा ॥ ॐ चंद्रमा मनसो .. रजायत । ॐ गुं मध्यमाभ्यां नमः । शिखायै वषट् ॥ ॐ नाभ्या ... अकल्पयन् । ॐ गं अनामिकाभ्यां नमः । कवचाय हुम् ॥ ॐ सप्तान्यासन् ... पुरुषं पशुम् । ॐ गां कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् । ॐ यज्ञेन यज्ञ ... सन्ति देवाः । ॐ गः करतलकरपृष्ठाभ्यां नमः । अस्त्राय फट् ॥ भूर्भुवःस्वरोम् । इति दिग्बन्धः ॥

१०. कलशपूजा - कलशस्य मुखे ... स्मृताः । कुक्षौ तु ... ह्यथर्वणः । अङ्गैश्च ... करी तथा । गंगे च यमुने ... सन्निधिं कुरु । वरुणाय नमः । कलशदेवताभ्यो नमः । सकलपूजार्थं गन्धाक्षतपुष्पाणि समर्पयामि ।

(धेनुमुद्रा) कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् । योग्यतां पापहानिं च पुण्यं वृद्धिं च यच्छति ॥

सर्वतीर्थमयो यस्मात्सर्वदेवमयो यतः । अतो हरिप्रियोऽसि त्वं पूर्णकुम्भं नमोऽस्तु ते ॥

११. शङ्खपूजा - शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता । पृष्ठे प्रजापतिश्चैव अग्रे गंगा सरस्वती ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया । शङ्खे तिष्ठन्ति विप्रन्द्र तस्माच्छङ्खं प्रपूजयेत् ॥ त्वं पुरा सागरो ... पाञ्चजन्य नमोऽस्तु ते ॥ ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि तन्नः शंख प्रचोदयात् । शंखदेवताभ्यो नमः । सकलपूजार्थं गन्धपुष्पतुलसीपत्रं समर्पयामि । (शंखमुद्रा)

१२. घंटापूजा - घण्टानादं कुर्यात् । आगमार्थं ... देवताह्वानलक्षणम् । सकलपूजार्थं गंधाक्षतपुष्पं समर्पयामि ॥

१३. दीपपूजा -

भो दीप ब्रह्मरूपस्त्वं ज्योतिषां प्रभुरव्यरः । अतस्त्वां स्थापयाम्यत्र मम शान्तिप्रदो भव ॥

त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम् । आत्मज्योतिः परं धाम दीप तुभ्यं नमो नमः ॥ दीपदेवतायै नमः । सकलपूजार्थे गन्धाक्षतपुष्पं समर्पयामि ।

१४. महाकालप्रार्थना - महाकाल नमस्तुभ्यं कालकाल महेश्वर । श्रीविघ्नराजसेवार्थं उद्घाटय

कवाटकम् ॥ अपवित्रः ... शुचिः । कलशोदकेन दूर्वांकुरैःसह संप्रोक्षणम् ।

१५. ध्यानविधिः - (दूर्वायुग्मं धृत्वा)। गजवदनमचिन्त्यं तीक्ष्णदंष्ट्रं त्रिनेत्रम् । बृहदुदररमशेषं भूतिराजं पुराणम् ॥ अमरवरसुपूज्यं रक्तवर्णं सुरेशम् । पशुपतिसुतमीशं विघ्नराजं नमामि ॥१॥ सर्वमङ्गलमाङ्गल्यं सर्वकारणकारणम् । भक्तानां वरदं ध्याये सिद्धिबुद्धि- समन्वितम् ॥२॥ श्रीऋद्धिसिद्धिसहितं सपरिवारं सायुधं सशक्तिकं श्रीमहागणपतिं ध्यायामि।

१६. आवाहनम् - ॐ सहस्रशीर्षा ... दशाङ्गुलम् ॥१॥ गणानां ब्रह्मणां नाथ पते वैदैः समास्तुत । ज्येष्ठराजं गणपतिं ब्रह्मणस्पतिमीश्वरम् ॥२॥ आवाहयामि कृपया एहि मद्हृदयाम्बुजात् । निषुसीद गणपते श्रृण्वन् स्तोत्राणि सादनम् ॥३॥

१७. (दूर्वायुग्मं समर्प्य) आगच्छ जगदाधार सुरासुरवरार्चित । सशक्तिपरिवारैश्च भक्तिग्रहणलालस ॥ श्रीसिद्धिबुद्धिसहिताय गणेशाय साङ्गाय सपरिवाराय नमः आवाहयामि ।

१८. आसनम् - ॐ पुरुष एवेदं ... नातिरोहति ॥ रत्नसिंहासनं दिव्यं दिव्यरत्नसमन्वितम् । समर्पितं मया देव तत्र त्वं समुपाविश ॥ श्रीगणेशाय नमः । आसनार्थं दूर्वायुग्मं समर्पयामि ।

१९. पाद्यम् - देवदेवेश सर्वेश सर्वतीर्थाहृतं जलम् । पाद्यं गृहाण गणप गन्धपुष्पार्चितैर्युतम् ॥ श्रीगणेशाय नमः । पाद्यं समर्पयामि । पाद्यान्ते आचमनीयं समर्पयामि ।

२०. अर्घ्यम् - त्रिपादूर्ध्व ... शने अभि ॥ रत्नप्रवालयुक्ताद्यैरनर्घ्यः संस्कृतं प्रभो । अर्घ्यं गृहाण विघ्नेश गंधपुष्पादिसंयुतम् ॥

२१. आचमनंम् - ॐ तस्मात् विराड् ... मथो पुरः ॥ आचमनं - सर्वतीर्थादितीर्थेभ्यः प्रार्थितं तोयमुत्तमम् । कर्पूरैलालवंगाढ्यमाचमार्थं तु स्वीकुरु ॥ श्रीगणेशाय नमः आचमनीयं समर्पयामि । (त्रिः)

२२. मधुपर्कम् -

कांस्ये कांस्येन विहितो दधिमध्वाज्यपूरितः । मधुपर्को मया नीतः पूजार्थं प्रतिगृह्यताम् ॥ श्रीगणेशाय नमः मधुपर्कं समर्पयामि । (पुनराचमीयकम्) ।

२३. स्नानम् - ॐ यत्पुरुषेण हविषा .. इध्मः शरद्धविः ॥ गङ्गासरस्वतीरेवापयोष्णीनर्मदा जलैः । स्नापितोऽसि मया देव यथा शान्तिं कुरुष्व मे ॥ श्रीगणेशाय नमः स्नानं समर्पयामि ।

२४. पयःस्नानम् - ॐ आप्यायस्व .. बाजस्य संगथे ॥

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुस्ते पयः स्नानार्थमार्पितम् ॥ श्रीगणेशाय नमः पयस्नानं समर्पयामि । पयःस्नानान्त शुद्धोदकस्नानं आचमनीयं च समर्पयामि । सकलपूजार्थं गंधाक्षतपुष्पं नमस्कारान् समर्पयामि ।

२५. दधिस्नानम् - ॐ दधिक्राव्णो ... तारिषत् ॥ धेनुदुग्धसमुद्भूतं शुद्धं सर्वजनप्रियम्। मयानीतं दधिवरं स्नानाथ प्रतिगृह्यताम् ॥ श्रीगणेशाय नमः दधिस्नानं समर्पयामि । दधिस्नानान्ते ... समर्पयामि । (पूर्ववत् ।)

२६. घृतस्नानम् - ॐ घृतं मिमिक्षे ... वक्षि हव्यम् ।
नवनीतसमुत्पन्नं सर्वसंतोषकारकम् । यज्ञाङ्गं देवताहारो घृतं स्नातुं समर्पितम् ॥ श्रीगणेशाय नमः घृतस्नानं समर्पयामि । घृतस्नानान्ते ... समर्पयामि । (पूर्ववत् ।)
२७. मधुस्नानम् - ॐ मधु वाता ... सन्त्वोषधीः ॥ मधुनक्त ... नः पिता ॥ मधुमान्नो ... भवन्तु नः ॥
पुष्पसारसमुद्भूतं सर्वतेजोविवर्धनम् ।
सर्वपुष्टिकरं देव मधुस्नानार्थमर्पितम् ॥
श्रीगणेशाय नमः मधुस्नानं समर्पयामि ।
मधुस्नानान्ते ... समर्पयामि । (पूर्ववत् ।)
२८. शर्करास्नानम् - ॐ स्वादुः पवस्व ... मधूमाँ अदाभ्यः ॥ ॐ अपां रसमुद्वय ... जुष्टतमम् ॥
इक्षुसारसमुद्भूतां शर्करां सुमनोहराम् । मलापहारिणीं स्नातुं गृहाण त्वं मयार्पिताम् ॥ श्रीगणेशाय नमः शर्करास्नानं समर्पयामि । शर्करास्नानान्ते ... समर्पयामि । (पूर्ववत् ।)
२९. गुडस्नानम् - सर्वमाधुर्यताहेतुः स्वादुः सर्वप्रियंकरः । पुष्टिकृत्स्नातुमानीत इक्षुसारभवो गुडः ॥ श्रीगणेशाय नमः गुडस्नानं समर्पयामि । गुडस्नानान्ते ... समर्पयामि । (पूर्ववत् ।)
३०. गन्धोदकस्नानम् - ॐ गन्धद्वारां दुराधर्षां ... ह्वये श्रियम् ।
यक्षकर्दमकाद्यैश्च स्नानं कुरु गणेश्वर । आन्त्यं मलहरं शुद्धं सर्वसौगन्ध्यकारकम् ॥
श्रीगणेशाय नमः गन्धोदकस्नानं समर्पयामि ।
गंधोदकं ... समर्पयामि । (पूर्ववत् ।)
३१. शुद्धोदकस्नानम् - आपोहिष्ठा ... चक्षसे ॥ यो वः शिवतमो ... रिव मातरः ॥ तस्मा अरं ... जन यथा च नः ॥
स्नानार्थं जलमानीतं शीतमुष्णं यथारुचि । सुगन्धितं मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥
ततो गन्धाक्षतादींश्च दूर्वाङ्कुरान् गजानन । समर्पयामि स्वल्पांस्त्वं गृह्यतां परमेश्वर ॥ श्रीगणेशाय नमः शुद्धोदकस्नानं समर्पयामि । आचमनीयं समर्पयामि । गन्धाक्षतपुष्पं शमीदूर्वङ्कुरं समर्पयामि । धूपं दीपं च समर्पयामि । पञ्चामृतशेषनैवेद्यं, तथा च गुडखाद्यनिवेदनं समर्पयामि । ततश्च नमस्कारं करोमि ।
३२. अभिषेकसमर्पणमन्त्रः - वेदसूक्तार्थ- मन्त्रैश्च यथा सङ्ख्याजपैः क्रमात् । अभिषेकं करोमि ते गृहाण द्विरदानन ॥
अनेन पूर्वाराधनेन श्रीगणेशाय साङ्गय सपरिवाराय सशक्तिकाय नमः महाभिषेकस्नानं समर्पयामि ।
ॐ देवस्यत्वा ... अग्नेस्तेजसा ... भिपिञ्चामि । बलाय श्रीयै यशसेऽह्याद्याय । - ॐ .भूर्भुवःस्वः अमृताभिषेकोऽस्तु . शान्तिः पुष्टिस्तुष्टिश्चास्तु । श्री ... देवताभ्यो नमः महाभिषेकस्नानं समर्पयामि । महाभिषेकस्नानान्तरं शुद्धोदकस्नानं आचमनीयं च समर्पयामि।

उत्तराराधनम्

१. माङ्गलिकस्नानम् - चम्पकाशोकबकुल- मालतीमोगरादिभिः । वासितं स्निग्धताहेतु तैलं चारु प्रगृह्यताम् ।
२. उद्वर्तनम् - यक्षकर्दमाद्यैश्च विघ्नेश भक्तवत्सल । उद्वर्तनं कुरुष्व त्वं मया दत्तैर्महाप्रभो ॥
३. उष्णोदकस्नानम् -
नानातीर्थजलैर्देव सुखोष्णैर्भावरूपकैः । समर्पितं मया सम्यक् स्नानं कुरु गजानन ॥

श्रीगणेशायनमः उष्णोदकस्नानं समर्पयामि । स्नानान्ते शुद्धोदकस्नानं ... समर्पयामि । (पूर्ववत् ।)

४. स्थापना - गृहा वै प्रतिष्ठासूक्तं तत्प्रतिष्ठिततमया वाचा हंस्तव्यं तस्माद्यद्यपि दूर एव पशूँल्लभते गृहानेवैना नाजिगमिषति गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा । ॐ नय प्रजां मे गोपाय । अमृतत्वाय जीवसे । जातां जनिष्यमाणां च । अमृते सत्ये प्रतिष्ठिताम् । श्रीगणेशायनमः । सुप्रतिष्ठितमस्तु । सुमुहूर्तमस्तु ।

५. वस्त्रसमर्पणम् - ॐ तं यज्ञं .... साध्या ऋषयश्च ये ... रक्तवस्त्रयुगं देव लोकलज्जानिवारण् । अर्नमतिसूक्ष्मं च गृहाणेदं मयार्पितम् ॥ श्रीगणेशाय नमः । वस्त्रोपवस्त्रं समर्पयामि । आचमनीयं ... समर्पयामि । (पूर्ववत् ।)

६. उत्तरीयम् - उत्तरीयं तथा देव नानाचित्रितमुत्तमम् । गृहाणेदं मया भक्त्या दत्तं तत्सफली कुरु ॥ श्रीगणेशाय नमः उत्तरीयं समर्पयामि । आचमहीयं समर्पयामि । (पूर्ववत् ।)

७. यज्ञोपवीतम् - ॐ तस्माद्यज्ञात् ... ग्राम्याश्च ये ॥

राजतं ब्रह्मसूत्रं च काञ्चनं रत्नसंयुतम् । भक्त्योपपादितं देव गृहाण गणनायक ॥ श्रीगणेशाय नमः यज्ञोपवीतं समर्पयामि । आचम ... र्पयामि ।

८. गंधम् - ॐ तस्माद्यज्ञात् .... स्तस्माऽजायत ॥ अष्टगन्धसमायुक्तं रक्तचन्दनमुत्तमम् । द्वादशाङ्गेषु ते देव लेपयामि कृपां कुरु ॥

श्रीगणेशाय नमः गन्धं समर्पयामि । (रक्तचन्दन)

९. अक्षता -

रक्तचन्दनसंमिश्रान्स्तण्डुलान्स्तिलकोपरि ।
शोभायै संप्रदास्यामि गृहाण जगदीश्वर ॥
श्रीगणेशाय नमः अक्षतान् समर्पयामि।

१०. हरिद्रा -

हरिद्रा स्वर्णवर्णाभा सर्वसौभाग्यदायिनी ।
सर्वालङ्कारमुख्या हि देवि त्वं प्रतिगृह्यताम् ॥
श्रीगणेशाय नमः हरिद्रां समर्पयामि ।

११. कुंकुमम् - हरिद्राचूर्णसंयुक्तं कुङ्कुमं कामदायकम् । वस्त्रालङ्करणं सर्वं देवि त्वं प्रतिगृह्यताम् ॥

श्रीगणेशाय नमः कुङ्कुमं समर्पयामि ।

१२. कज्जलं -

कामिकं रम्यं कामिनीकामसंभवम् ।
नेत्रयोर्भूषणार्थाय कज्जलं प्रतिगृह्यताम् ॥
श्रीगणगेशाय नमः कज्जलं समर्पयामि ।

१३. सिन्दूरम् - ततः सिन्दूरकं देव गृहाण गणनायक । अङ्गलेपनभावार्थं सर्वानन्द-विवर्धनम् ॥

समर्पयामि सिन्दूरं त्वामहं ब्रह्मणस्पते । शेषं संधारयिष्यामि ललाटे देवतात्मकम् ॥
श्रीगणेशाय नमः सिन्दूरं समर्पयामि ।

१४. भूषणानि -

अनेकरत्नयुक्तानि भूषणानि बहूनि च । तत्तदङ्गे योजयामि काञ्चनानि तवाज्ञया ॥
श्रीगणेशाय नमः नानाभूषणानि समर्पयामि ।

१५. ताडपत्रम् -

नानाभरणशोभाढ्यं नानारत्नोपशोभितम् ।
अर्पितं च मया देव ताडपत्रं प्रगृह्यताम् ॥
श्रीगणेशाय नमः ताडपत्रं समर्पयामि ।

१६. सुगंधि द्रव्याणि -

ॐ अहिरिवभोगैः ... परि पातु विश्वतः॥
ज्योत्स्नापते नमस्तुभ्यं नमस्ते विश्वरूपिणे । नानापरिमलद्रव्यं गृहाण परमेश्वर॥
श्रीगणेशाय नमः नानापरिमलसुगन्धिद्रव्याणि समर्पयामि।

१७. पुष्पम् - ॐ तस्मादश्वा ... अजावयः॥
पाटलं कर्णिकारं च बन्धूकं रक्तपंकजम्। मोगरं मालतीपुष्पं गृह्यतां परमेश्वर॥
नानापङ्कजपुष्पैश्च ग्रथितां पल्लवैरपि । बिल्वपत्रयुतां मालां गृहण सुमनोहरम्॥
श्रीगणेशाय नमः यथा ऋतुकालोद्भवपुष्पाणि पुष्पमालांश्च समर्पयामि।

१८. शमीपत्रम् -
ॐ य इन्द्राय ... यज्ञमाशता । त्वत्त्रियाणि सपुष्पाणि कोमलानि शुभानि वै।
शमीदलानि हेरम्ब गृहाण गणनायक॥ श्रीगणेशाय नमः शमीदलानि समर्पयामि।

१९. मन्दारपुष्पम् -
वन्दारुजनमन्दार मन्दारप्रिय धीपते। मन्दारजानि पुष्पाणि श्वेतार्कादीनि गृह्यताम्॥
श्रीगणेशाय नमः मन्दारपुष्पाणि समर्पयामि।

२०. दूर्वा - ॐ काण्डात् काण्डात् ... सहस्रेण शतेन च॥
त्रिपञ्चसप्तभिः पत्रैर्युतान् दूर्वाङ्कुरान् शुभान् । सुकोमलान् हरिच्छ्वेतान् गृहाण गणनायक॥
श्रीगणेशाय नमः दूर्वाङ्कुरान् समर्पयामि। (२१, १०८ अथवा १००० दूर्वा पत्राणि)

२१. धूपम् - ॐ यत्पुरुषं व्यदधुः ... पादा उच्येते॥
दशाङ्गं गुग्गुलं धूपं सर्वसौगन्ध्यकारकम् । सर्वपापक्षयकरं त्वं गृहाण मयार्पितम् ॥
श्रीगणेशाय नमः धूपमाघ्रापयामि, समर्पयामि।

२२. दीपम् - ॐ ब्राह्मणोऽस्य मुख ... शूद्रो अजायत।
सर्वज्ञ सर्वलोकेश तमोनाशनमुत्तमम्। गृहाण मङ्गलं दीपं देवदेव नमोऽस्तु ते॥
श्री गणेशाय नमः दीपं दर्शयामि , समर्पयामि।

२३. नैवेद्यम् - ॐ चन्द्रमा मनसो ... वायु रजायत॥
नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु। ईप्सितं मे वरं देहि परत्र च परां गतिम्॥
मोदकापूपलड्डुकपायसं शकरान्वितम् । पक्वान्नं सघृतं देव नैवेद्यं प्रतिगृह्यताम्॥
श्रीगणेशाय नमः महानैवेद्यं समर्पयामि।
ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ समानाय स्वाहा । ॐ ब्रह्मणे नमः । नैवेद्यमध्ये पानीयं समर्पयामि । सुतृप्तिकारकं तोयं सुगन्धं च पिबेच्छया । त्वार्यतृप्ते जगत् तृप्तं नित्यतृप्ते महात्मनि॥
श्रीगणेशायनमः मध्ये प्राशनार्थं जलं समर्पयामि। पुनश्च ॐ प्राणाय स्वाहा।
उत्तरापोशनार्थं ते दद्मि तोयं सुवासितम् । मुखपाणिविशुद्ध्यर्थं पुनस्तोयं ददामि ते ॥ श्रीगणेशाय नमः उत्तरापोशनं समर्पयामि । हस्तप्रक्षालनं मुखप्रक्षालनं च। अन्ते आचमनीयं समर्पयामि।

२४. करोद्वर्तनम् -
भोजनान्ते करोद्वर्तं यक्षकर्दमकेण च। समर्पयामि ते देव सर्वपूज्य नमो नमः॥
श्रीगणेशाय नमः करोद्वर्तनार्थं सुगन्धं समर्पयामि।

२५. नानाविध फलानि -

दाडिमं मधुरं निम्बुजम्ब्वाम्रपनसादिकम् । द्राक्षारम्भाफलादिनि नारिकेलानि गृह्यताम् ॥

इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सुफलावाप्तिः भवेज्जन्मनि जन्मनि ॥

फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् । तस्मात्फलप्रदानेन सफलाश्च मनोरथाः ॥

श्रीगणेशाय ममः यथाऋतुकालोद्भवफलानि समर्पयामि ।

२६. ताम्बूलम् –

सचन्द्रपूगपूर्णढ्यं खाद्यखादिरसंयुतम् । एलालवङ्गसंमिश्रं ताम्बूलं प्रतिगृह्यताम् ॥

श्रीगणेशाय नमः ताम्बूलं समर्पयामि ।

२७. महादक्षिणा –

न्यूनातिरिक्तपूजायाः संपूर्णफलहेतवे । दक्षिणां काञ्चनीं देव स्थापयामि तवाग्रतः ॥

श्रीगणेशाय नमः सुवर्णपुष्पदक्षिणां समर्पयामि । दक्षिणान्ते एकविंशतिदूर्वाङ्कुरान् समर्पयामि ।

गणञ्जयो गणपतिहेरम्बो धरणीधरः । महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः ॥

अमोघसिद्धिरमितमन्त्र श्चिन्तामणिर्निधिः । सुमङ्गलोबीजमाशापूरको वरदः कविः । काश्यपो नन्दनो वाचासिद्धो ढुण्ढिर्विनायकः ॥

२९. राजोपचाराः –

छत्रचामरपूर्वाणि नृत्यगीतादिकानि च । सम्यक् राजोपचारांश्च गृहाण विघ्ननाशन ॥

श्रीगणेशाय नमः राजोपचारार्थं पञ्चदूर्वान् समर्पयामि ।

३०. नीराजनम् – ॐ श्रीये जातः ... यामितद्रौ ॥

कर्पुरानलसंयुक्त शेषाघौघविनाशनम् । नीराजनं गणेशान गृहाण त्वं मयार्पितम् ॥ औदुम्बरे राजते वा कांस्ये काञ्चनसम्भवे । पात्रे प्रकल्पितान् दीपान् गृहाण चक्षुरर्चकान् ॥

पञ्चारतिं पञ्चदीपैर्दीपितां परमेश्वर । कर्पूराद्यां महार्तिं च गृहाण गणनायक ॥

श्रीगणेशाय नमः पञ्चार्तिं – महानीराजनदीपं कर्पूरार्तिं समर्पयामि ।

३१. मन्त्रपुष्पाञ्जलिः – ॐ यज्ञेन यज्ञं ... साध्याः सन्ति देवाः ॥

ॐ राजाधिराजाय प्रसह्यसाहिने ... विश्वेदेवा सभासद इति ।

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दंती प्रचोदयात् ॥

चम्पकाशोकंबकुलपारिजातभवैः शुभैः । पुष्पाञ्जलिं प्रदास्यामि गृहाण गणनायक ॥

श्रीगणेशाय नमः मन्त्रपुष्पांजलिं समर्पयामि ।

३२. प्रदक्षिणा – ॐ सप्तास्यासन् ... पुरुषं पशुम् ॥

एकविंशतिसङ्ख्याकाः कुर्वे देवप्रदक्षिणाः । पदे पदे ते देवेश नश्यन्तु पातकानि मे ॥

श्रीगणेशाय नमः प्रदक्षिणां समर्पयामि ।

३२. नमस्कारः – ॐ नाभ्या आसी ... लोकाँ अकल्पयन् ॥

साष्टांगां प्रणतिं नाथ ह्येकविंशतिसंमिताम् । हेरम्ब सर्वपूज्य त्वं गृहाण तु मयार्पिताम् ॥ श्रीगणेशाय नमः साष्टाङ्गनमस्कारान् समर्पयामि । (३, ७ अथवा २१) श्रीगणेशाय नमः नानास्तोत्राणि समर्पयामि ।

३३. प्रार्थना –

नमो नमः शाश्वतशान्तिहेतवे । क्षमादयापूरितचारुचेतसे । गजेन्द्ररूपाय गणेश्वराय ते । परस्य पुंसः प्रथमाय सूनवे ॥

दीनाधीश दयानिधे सुरगणैः संसेव्यमान द्विज । ब्रह्मेशानमहेन्द्रशेषगिरिजागन्धर्वसिद्धैः स्तुत ॥ सर्वारिष्टनिवारणैकनिपुण त्रैलोक्यनाथ प्रभो । भक्तिं मे सफलां कुरुष्व क्षन्त्वाऽपराधान् मम ॥

ये त्वामसम्पूज्य नूनं वाञ्छन्ति मूढा विहितार्थसिद्धिम् ॥ त एव नष्टा नियतं हि लोके ज्ञातो मया ते सकलप्रभावः ॥

कायेन वाचा मनसा कृतान्मे सांसर्गिकान् जागृतिस्वप्नजातान् ॥ सौषुप्ततौर्यान् सकलापराधान् क्षमस्व हेरम्ब दयानिधे त्वम् ॥

अपराधानसंख्यातान् क्षमस्व गणनायक ॥ भक्तं कुरु च मां ढुण्ढे तव पादप्रियं सदा ॥

श्रीगणेशाय नमः प्रार्थनायुक्तपुष्पदूर्वाङ्कुरान् समर्पयामि ॥

३४. न्यूनातिरिक्तदूर्वासमर्पणम् -

न्यूनातिरिक्तभावार्थं कांश्चित् कदूर्वाङ्कुरान् प्रभो । समर्पयामि तेन त्वां साङ्गां पूजां करोमि ते ॥

श्रीगणेशाय नमः न्यूनातिरिक्तदोषक्षमापणार्थं एकविंशतिदूर्वाङ्कुरान् समर्पयामि।

३५. निर्माल्यदूर्वाधारणम् -

त्वया दत्तं स्वहस्तेन निर्माल्यं गणनायक । शिखायां धारयाम्येव तदा सर्वप्रदं च तत् ॥

३७. विसर्जनम् -

आवाहनं न जानामि न जानामि विसर्जनम् । पूजां चैव न जानामि क्षम्यतां गणनायक ॥

आधारकर्णिकामध्ये सर्वैरावरणैः सह । प्रविश त्वं गणेशान शक्तिभ्यां हृदये मम ॥

३८. तीर्थग्रहणम् - शंखमध्ये स्थितं तोयं भ्रामितं गणपोपरि । अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ गुरुतल्पसहस्राणि सुरापानशतानि च । तत्क्षणात्तानि नश्यन्ति गाणेशात्तीर्थवन्दनात् ॥ पादोदकं गणेशस्य पीतं नरेण तत्क्षणात् ॥ सर्वान्तर्गतजं पापं नश्यति गणनातिगम् ॥

३९. उच्छिष्टगंधग्रहणम् -

गणेशोच्छिष्टगन्धं वै गुहादौ नियतं न्यसेत् ॥ द्वादशाङ्गेषु विघ्नेश नाममात्रेण गाणपः ॥

४०. प्रसादग्रहणम् -

भुक्तशेषं तु नैवेद्यं गणेशस्य भुनज्म्यहम् । भुक्तिमुक्तिप्रदं पूर्णं नानापापनिकृन्तनम् ।

४१. पूजासमर्पणम् - त्वमेव माता पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्या द्रविण त्वमेव । त्वमेव सर्वं मम देवदेव । कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् । करोमि यद्यत् सकलं परस्मै गजाननायेति समर्पयामि ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं गजानन । यत्कृतं तु मया देव परिपूर्णं तदस्तु ते ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्ष त्वं गणनायक ॥४॥

यस्य स्मृत्वा च नामोक्त्या तपःपूजाक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे ब्रह्मणस्पतिम् ॥

अनेन श्रीगणेशपूर्णकृपाप्रसादसिद्ध्यर्थं कृतेन यथामति यथामिलितोपचारद्रव्यैः श्रीगणेशपूजनाख्येन कर्मणा भगवान् स्वानंदेशः प्रीयतां ॥

तत्सत् श्रीगणेशार्पणमस्तु ।

V PĀRTHIVA-GAṆAPATI-PŪJĀ

पार्थिव गणपतिपूजा

१. आचमन, प्राणायाम देशकालाद्युच्चारणपूर्वक संकल्पं मम इह जन्मनि पुत्रपौत्रधनविद्या - जययशं - स्त्रीकामा- युष्याभिवृध्द्यर्थं पार्थिवगणपतिप्रीत्यर्थं यथामिलितोपचारैः पूजनमहं करिष्ये।

२. ध्यानम् - पाशांकुशधरं देवं ध्यांयेत्सिद्धिविनायकम् ॥
ध्यायेद्देवं महाकायं तप्तकांचनसन्निभम् ॥१॥

आवाहनम् - आवाहयामि विघ्नेश सुरराजार्चितेश्वर । अनाथनाथ सर्वज्ञ पूजार्थं गणनायक ॥२॥

आसनम् - विचित्ररत्नरचितदिव्यास्तरण-संयुतम् ॥ स्वर्णसिंहासनं चारु गृहाण सुर पूजित ॥३॥

पाद्यम् - सर्वतीर्थसमुद्भूतं पाद्यं गंधादिसंयुतम् ॥ विघ्नराज गृहाणेदं भगवन् भक्तवत्सल ॥४॥

अर्घ्यम् - अर्घ्यं च फलसंयुक्तं गंधपुष्पाक्षतैर्युतम् ॥ गणाध्यक्ष नमस्तेऽस्तु गृहाण करुणानिधे ॥५॥

मधुपर्कम् - दध्याज्यमधुसंयुक्तः मधुपर्को मयाहृतः ॥ गृहाण सर्वलोकेश गणनाथ नमोऽस्तु ते ॥६॥

आचमनम् - विनायक नमस्तुभ्यं त्रिदशैरभि वंदितम् ॥ गंगोदकेन तोयेन शीघ्रमाचमनं कुरु ॥७॥

पयःस्नानम् - पयो दधि घृतं चैव शर्करामधुसंयुतम् ॥ पंचामृतेन स्नानेन प्रीयतां गणनायक ॥८॥

दधिस्नानाम् - चन्द्रमण्डलसंकाशं सर्वदेवप्रियं दधि ॥ धध्ना ददामि देवेश प्रीयतां परमेश्वर ॥९॥

घृतस्नानम् - आज्यं सुराणामाहारः आज्यं यज्ञे प्रतिष्ठितम् ॥ आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥१०॥

मधुस्नानम् - सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु ॥

शर्करास्नानाम् - इक्षुदण्डसमुद्भूता शर्करा मधुरा विभो ॥ स्नानार्थं ते मयानीता गृहाण परमेश्वर ॥१२॥

शुद्धोदकस्नानम् - गंगा च यमुना चैव गोदावरी सरस्वती ॥ गंधतोयमुमापुत्र गृह्णीष्वाभिष्ट-दायक ॥१३॥ (पुरुषसूक्तेन अभिषेकः)

३. वस्त्रम् - रक्तवस्त्रद्वयं देव दिव्यकांचनसंभवम् ॥ सर्वप्रदं गृहाणेदं लंबोदर हरात्मज ॥१४॥

यज्ञोवीतम् - राजतं ब्रह्मसूत्रं च कांचनं त्वोत्तरीयनम् ॥ गृहाण चारु सर्वज्ञ भक्तानां वरदो भव ॥१५॥

सिन्दूरम् - उद्यद्भास्करसंकाशं संध्यावदरुणं प्रभो ॥ वीरालंकरणं दिव्यं सिंदूरं प्रतिगृह्यताम् ॥१६॥

आभरणानि - नानाविधानि रत्नानि नानारत्नोज्ज्वलानि च ॥
भूषणानि गृहाणेश पार्वतीप्रियनंदन ॥१७॥
गंध – कस्तूरी-चंदनं चैव केशरेण समन्वितम् ॥
विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम् ॥१८॥
अक्षता – रक्ताक्षताश्च देवेश गृहाण द्विरदानन ॥
ललाटपटले चन्द्रे तस्योपरि निधीयताम् ॥१९॥
अंगपूजा - गणेश्वराय नमः पादौ पूजयामि । विघ्नराजाय नमः जानुनी पूजयामि । आखुवाहाय नमः ऊरुं पूजयामि । हेरंबाय ननः कटिं पूजयामि । कामारिसूनवे नमः नाभिं पूजयामि । लंबोदराय नमः उदरं पूजयामि । गौरिसुताय नमः स्तनौ पूजयामि । गणनायकाय नमः हृदयं पूजयामि । स्थूलकर्णाय नमः कण्ठं पूजयामि । स्कदाग्रजाय नमः स्कधं पूजयामि। पाशहस्ताय नमः हस्तौ पूजयामि । गजवक्त्राय नमः वक्त्रं पूजयामि। विघ्नहत्र नमः ललाटं पूजयामि । सर्वेश्वराय नमः शिरः पूजयामि । श्रीगणाधिपाय नमः सर्वाङ्गं पूजयामि ।

पत्रपूजनम् - सुमुखाय नमः मालतीपत्रं समर्पयामि । गणाधिपाय नमः भृंगिराजपत्रं । उमापुत्राय नमः बिल्वपत्रं । गजाननाय नमः श्वेतदूर्वापत्रं । लंबोदराय नम्ः बदरीपत्रं । हरसूनवे नमः धत्तुरपत्रं । गजकर्णाय नमः तुलसीपत्रं । वक्रतुंडाय नमः शमीपत्रं। विघ्नराजाय विष्णु-क्रान्तपत्रं गुहाग्रजाय नमः अपामार्ग पत्रं। एकदंताय विकटाय कपिलाय नमः अर्कपत्रं । गजदंताय नमः अर्जुनपत्रं । बटवे ननः दाडिमपत्रं । सुराग्रजाय नमः देवदारुपत्रं । भालचन्द्राय नमः मरूपत्रं । हेरंबाय नमः अश्वत्थपत्रं । चतुर्भुजाय नमः जातिपत्रं । विनायकाय नमः केतकीपत्रं । सर्वेश्वराय नमः अगस्तिपत्रं (समर्पयामि ।)

६. धूपम् - दशांगंगुग्गुलं धूपं सुगंधं च मनोहरम् ॥ गृहाण सर्वदेवेश उमापुत्र नमोऽस्तु ते ॥२०॥

७. दीपम् - सर्वज्ञ सर्वलोकेश त्रैलोक्य-तिमिरापह ॥ गृहाण मंगलं दीपं रुद्रप्रिय नमोऽस्तु ते ॥२१॥

८. नैवेद्यम् - नानाखाद्यमयं दिव्यं तुष्ट्यर्थं ते निवेदितम् ॥ मया भक्त्या शिवापुत्र गृहाण गणनायक ॥२२॥ (नैवेद्य समर्पणानंतरं उत्तरापोशनार्थं जलं दद्यात् ॥)

९. फलम् – बीजपूराम्रपनसं खर्जुरीकदलीफलम् ॥
नारिकेलफलं दिव्यं गृहाण गणनायक ॥२३॥

१०. तांबूलम् –
नागवल्लीदलैर्युक्तमेकविंशतिसंख्यया । क्रमुक चूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥२४॥

११. भूषणम् –
वज्रमाणिक्यवैडूर्यमुक्ताविद्रुममण्डितम् ॥
पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ॥२५॥

१२. दूर्वा - एकदंताय नमः, उमापुत्राय नमः अघनाशनाय नमः, इभवक्त्राय नमः, मूषकवाहनाय नमः, विनायकाय नमः, ईशपुत्राय नमः, सर्वसिद्धिप्रदाय नमः, कुमारगुरवे नमः (दूर्वाङ्कुरान् समर्पयामि ।)

१३. नमस्कार क्रिया - गणाधिप नमस्तेऽस्तु उमापुत्राघनाशन ॥ एकदंतेभवक्त्रेति तथा मूषकवाहन ॥२६॥ विनायकशपुत्रेति सर्वसिद्धिप्रदायक ॥ कुमारगुरवे तुभ्यं प्रणमामि पुनः पुनः ॥२७॥

१४. आरत्रिक - चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥ त्वमेव सर्वतेजांसि आर्तिक्यं प्रतिगृह्यताम् ॥२८॥

१५. प्रदक्षिण नमस्कारः - विघ्नेश्वर विशालाक्ष सर्वाभीष्टफलप्रद ॥ प्रदक्षिणां करोमि त्वां सर्वान्कामान्प्रयच्छ मे ॥२९॥

१६. पुनश्च नमस्करणम् - नमस्ते विघ्नसंहर्त्रे नमस्ते ईप्सितप्रद ॥ नमस्ते देवदेवेश नमस्ते गणनायक ॥३०॥

१७. मंत्रपुष्पार्पणम् - विनायकेशपुत्रेति गणराज सुरोत्तम ॥ देहि मे सकलान् कामान् वन्दे सिद्धिविनायक ॥३१॥

१८. प्रार्थना - नमस्तस्मै गणेशाय ज्ञानविज्ञानदायक ॥ यस्य बलायते नाम विघ्नारण्यविदारणे ॥३२॥

१९. विशेषार्घ्यं - नमस्तस्मै गणेशाय नमस्तस्मै हरात्मज ॥ विशेषार्घ्यं प्रदास्यामि गृहाण करुणानिधे ॥३३॥

(सिद्धिबुद्धिसहिताय पार्थिवगणपतये विशेषार्घ्यं समर्पयामि ।)

२०. समर्पणम् - अनेन यथामिलितोपचारद्रव्यैः षौडशोपचारपूजनेन सिद्धिबुद्धिसहितः पार्थिवगणपतिः प्रीयताम् ॥

इति पार्थिव गणपतिपूजा ॥

विद्यांगणपतिवाञ्छाकल्पलता ।

अस्य श्रीविद्यागणपतिवाञ्छा-कल्पलतामहामन्त्रस्य नानासूक्तसमूहस्य आनन्दभैरवगणकांगिरसकश्यपवसिष्ठविश्वा मित्रसंवननादिऋषिभ्यो नमः शिरसि । देवी गायत्रीनिचृद्गायत्रीपंक्तित्रिष्टुबनुष्टुप्-बृहतीछन्दोभ्यो नमः मुखे । महात्रिपुरसुन्दरी-महागणपतिसंवादाग्न्यमृतरुद्रेभ्यो देवताभ्यो नमः हृदये । श्रीं बीजाय नमः नाभौ । ह्रीं शक्तये नमः पादयोः । क्लीं कीलकाय नमः सर्वाङ्गे । महात्रिपुरसुन्दरीमहागणति संवादाग्न्यमृतरुद्रेभ्यो देवताप्रसादसिद्ध्यर्थे तथा च वाच्छिता-र्थसिद्ध्यर्थे जपे विनियोगः।

ॐ ऐं क्लीं सौः महात्रिपुरसुन्दरी ह्रीं सर्वज्ञतायै ह्रां गां ब्रह्मात्मने अंगुष्ठाभ्यां नमः। हृदयाय नमः। ॐ ह्रीं नित्यतृप्तायै ह्रीं गीं विष्णवात्मने तर्जनीभ्यां नमः। शिरसे स्वाहा। ॐ ह्रीं अनादिबोधितायै ह्रूं गूं रुद्रात्मने मध्यमाभ्यां नमः। शिखायै वषट्। ॐ ह्रीं स्वतंत्रतायै ह्रैं गं परमेश्वरात्मने अनामिकाभ्यां नमः। कवचाय हुम्। ॐ ह्रीं नित्यमलुप्तायै ह्रां गां सदाशिवात्मने कनिष्ठिकाभ्यां नमः। नैत्रत्रयाय वौषट् । ॐ ह्रीं अनन्तायै ह्रः गः सर्वात्मने करतलकरपृष्ठाभ्यां नमः। अस्त्राय फट्। मूलेन त्रिर्व्यापकं कुर्यात्। ॐ ऐं श्रीं ह्रीं लं क्लीं ग्लां गं गुग्गुलरींकएईल ह्रीं ह सकहलह्रीं सकलह्रीं ऐं क्लीं सौः गं क्षिप्रप्रसादनाय गणपतये वरवरद आं ह्रीं क्रां सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं॥

अथ ध्यानम् । हेमाद्रौ हेमपीठ स्थितिममरगणैरिह्यमानां विराजात् पुष्पेक्ष्विष्वाशापाशांकुशलितकरां रक्तवस्त्रां त्रिनेत्राम् ॥ दिक्षुद्यद्भिश्चतुर्भिर्मणिमयकलशं पंचशक्त्यान्वितत्ववृक्षैः क्लृप्त्याभिषेकां भजत भगवतीं भूतिदामन्त्ययामे ॥१॥

बीजापूरगदेक्षुकार्मुकरुचा
चक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाण-
रत्नकलशप्रोद्यत्कराम्भोरुहः ॥ ध्येयो वल्लभया सपद्मकरया श्लिष्टो जगद्रूपया विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नेश इष्टार्थदः॥२॥

द्वाभ्यां विभ्राजमानां वरकनकमहाशृंखलाभ्यां भुजाभ्याम् बीजापूरादिबिभ्रद्दशभुजकलितं चम्द्रचूडं त्रिनेत्रम् ॥ सन्ध्यासिन्दूरवर्ण स्तनभरनमितं तुन्दिलं सन्नितम्बं कण्ठादूर्ध्वं करीन्द्रं युवतिमयमधःस्तौमि नित्यं गणेशम्॥३॥

धवलनलिनराजच्चन्द्रमध्ये निषण्णं स्वकर-कलितपाशं साभयं सांशुक च ॥ अमृतवपुमिन्दुक्षीरगौरं त्रिनेत्रं प्रणमत शुभवक्त्रं मञ्जु संभाषयंतम्॥४॥

स्फुटितनलिनसंस्थं मौलिबद्धेन्दुरेखा ज्वलगलदमृतं चन्द्रवह्न्यर्कनेत्रम् ॥

स्वकरकलितमुद्रावेद पाशाक्षमालं
स्फटिकरजतमुक्तागौरमीशं नमामि ॥५॥

लां पृथिव्यात्मक महात्रिपुरसुन्दरी-श्रीमहागणपति संवादाग्न्यमृतरुद्रेभ्यो नमः गन्धं परिकल्पयामि। शं आकाशात्मक महात्रिपुर ... रुद्रेभ्यो नमः पुष्पम्। यां वाय्वात्मक महात्रिपुर ... रुद्रेभ्यो नमः धूपम्। रां अग्न्वात्मककमहात्रिपुर ... रुद्रेभ्यो नमः दीपम्। वां अमृतात्मक महा त्रिपुर ... रुद्रेभ्यो नमः नैवेद्यं। सां सर्वात्मक महात्रिपुर ... रुद्रेभ्यो नमः ताम्बूलादिसर्वोपचारपूजां परिकल्पयामि।

गणेशमुद्रा – दन्तपाशाङ्कुशाविघ्नपरशु-लड्डुकसंज्ञिता। बीजापूरेति विख्याता गणेशस्य प्रिया मता।

ॐ ऐं श्रीं ह्रीं क्लीं ग्लौ गं गुग्गुलरीकएईलह्रीं हसकहलह्रीं सकलह्रीं ऐं क्लीं सौः ॐ यदद्य कच्चवृत्रहन्नुदगा अभिसूर्य। सर्वं तदिन्द्र ते वशे॥ गं क्षिप्रप्रसादनाय गणपतये वरवरद आं ह्रीं क्रों सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं ॥१॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ तत्सवितु ... यात् गं क्षिप्रप्रसादनाय ... स्वाहा सौः क्लीं ऐं ॥२॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ त्र्यम्बकं यजामहे ... तात्। गं क्षिप्रप्रसादनाय ... स्वाहा सौः क्लीं ऐं ॥३॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ जातवेदसे ... त्यग्निः॥ गं क्षिप्र ... सौः क्लीं ऐं ॥४॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ समानो ... जुहोमि। गं क्षिप्र ,.. सौः क्लीं ऐं ॥६॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ समानो मंत्रः ... जुहोमि। गं क्षिप्र ... सौः क्लीं ऐं ॥७॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ जातवेदसे ... त्यग्निः। गं क्षिप्र ... सौः क्लीं ऐं ॥८॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ त्र्यम्बक ... तात् गं क्षिप्र ... सौः क्लीं ऐं ॥९॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ तत्सवितु ... यात्। गं क्षिप्र ..... सौः क्लीं ऐं ॥१०॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ यदद्य ... वशे। गं क्षिप्र ... सौः क्लीं ऐं ॥११॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः ॐ गणानां त्वा .. गं क्षिप्र ... सौः क्लीं ऐं ॥१२॥ ॐ भूः भ्रुं नो अपिवात यमनः। ॐह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रा –

प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा ॥ ॐ ह्रीं दमयन्तीनलाभ्यां तु नमस्कारं करोम्यहम्। अविवादौ भवेत्तत्र कलिदोषप्रशाम्यतः। एकप्रस्थं भवेदेषां ब्राह्मणानां पृथग्धियाम् । निवरता प्रजायेत संवादाग्ने प्रसिद मे ॥

इति प्रथमः पर्यायः॥

ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ यदद्य ... वशे। गं क्षिप्र ... सौः क्लीं ऐं ॥१॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ तत्सवितु ... यात्। गं क्षिप्र ... सौः क्लीं ऐं ॥२॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ त्र्यम्बकं ... तात्। गं क्षिप्र ... सौः क्लीं ऐं ॥३॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ जातवेदसे ... त्यग्निः। गं क्षिप्र ... सौः क्लीं ऐं ॥४॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः । ॐ समानो... जुहोमि। गं क्षिप्र ... सौः क्लीं ऐं ॥५॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ संगच्छध्वं ... सते। गं क्षिप्र ... सौः क्लीं ऐं ॥६॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ जातवेदसे ... त्यग्निः। गं क्षिप्र ... सौः क्लीं ऐं ॥७॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः । ॐ जातवेदसे ... त्यग्निः। गं क्षिप्र ... सौः क्लीं ऐं ॥८॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ त्र्यम्बक ... तात्। गं क्षिप्र ... सौः क्लीं ऐं ॥९॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ तत्सवितु ... यात्। गं क्षिप्र ... सौः क्लीं ऐं ॥१०॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ यदद्य ... वशे

। गं क्षिप्र ... सौः क्लीं ऐं ॥११॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ अग्नेमन्युं ... षत्। गं क्षिप्र ... सौः क्लीं ऐं ॥१२॥

ॐ भुवः मरुतामोजसे स्वाहा । ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रों प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा । ॐ ह्रीं दमयन्तीनलाभ्यांतु नमस्कारं करोम्यहम् ॥ अविवादौ भवेत्तत्र कलिदोषप्रशाम्यतः। एकप्रस्थं भवेदेषां ब्राह्मणानां पृथग्धियाम्। निवरता प्रजायेत संवादग्ने प्रसीद मे ॥

इति द्वितीयः पर्यायः॥

ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ यदद्य ... वशे। गं क्षिप्र ... सौः क्लीं ऐं ॥१॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ तत्सवितु ... यात्। गं क्षिप्र ... सौः क्लीं ऐं ॥२॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ त्र्यम्बकं ... तात्। गं क्षिप्र ... सौः क्लीं ऐं ॥३॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ जातवेदसे ... त्यग्निः। गं क्षिप्र ... सौः क्लीं ऐं ॥४॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ समानो... जुहोमि। गं क्षिप्र ... सौः क्लीं ऐं ॥५॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ समानो... जुहोमि। गं क्षिप्र ... सौः क्लीं ऐं ॥६॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ समानो... जुहोमि। गं क्षिप्र ... सौः क्लीं ऐं ॥७॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ जातवेदसे ... त्यग्निः। गं क्षिप्र ... सौः क्लीं ऐं ॥८॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ त्र्यम्बक ... तात्। गं क्षिप्र ... सौः क्लीं ऐं ॥९॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ तत्सवितु ... यात्। गं क्षिप्र ... सौः क्लीं ऐं ॥१०॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ यदद्य ... वशे। गं क्षिप्र ... सौः क्लीं ऐं ॥११॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ योमामग्न ... कुरु स्वाहा। गं क्षिप्र ... सौः क्लीं ऐं ॥१२॥

ॐ सुवः। इन्द्रो विधस्य राजति। ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रों प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा। ॐ ह्रीं दमयन्तीनलाभ्यान्तु नमस्कारं करोम्यहम्। अविवादो भवेत्तत्र कलिदोषप्रशाम्यतः। एकप्रस्थं भवेदेषां ब्राह्मणानां पृथग्धियाम्। निवरता प्रजायेत संवादाग्ने प्रसीद मे ॥

इति तृतीयः पर्यायः॥

ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ यदद्य ... वशे। गं क्षिप्र ... सौः क्लीं ऐं ॥१॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ तत्सवितु ... यात्। गं क्षिप्र ... सौः क्लीं ऐं ॥२॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ त्र्यम्बकं ... तात्। गं क्षिप्र ... सौः क्लीं ऐं ॥३॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ जातवेदसे ... त्यग्निः। गं क्षिप्र ... सौः क्लीं ऐं ॥४॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ समानो... जुहोमि। गं क्षिप्र ... सौः क्लीं ऐं ॥५॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ समानी... सती। गं क्षिप्र ... सौः क्लीं ऐं॥६॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ समानो... जुहोमि। गं क्षिप्र ... सौः क्लीं ऐं ॥७॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ तत्सवितु ... यात्। गं क्षिप्र ... सौः क्लीं ऐं ॥८॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ त्र्यम्बक ... तात्। गं क्षिप्र ... सौः क्लीं ऐं ॥९॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ तत्सवितु ... यात्। गं क्षिप्र ... सौः क्लीं ऐं ॥१०॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ यदद्य ... वशे। गं क्षिप्र ... सौः क्लीं ऐं ॥११॥ ॐ ऐं श्रीं ह्रीं ... ऐं क्लीं सौः। ॐ अजैष्मा ... मृच्छतु। गं क्षिप्र ... सौः क्लीं ऐं ॥१२॥

ॐ भूर्भुवः स्वः शं नो भव द्विपदे चतुष्पदे। ॐ ह्रीं वं ठं अमृतरुद्राय - अं ह्रीं क्रा प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा । ॐ ह्रीं दमयन्तीनलाभ्यां तु नमस्कारं करोम्यहम् ॥

अविवादो भवेत्तत्र कलिदोषप्रशाम्यतः एकप्रस्थं भवेदेषां ब्राह्मणानां पृथग्धियाम् । निवरता प्रजायेत संवादाग्ने प्रसीद मे ॥

इति चतुर्थः पर्यायः ॥

निशान्ते तु प्रतिदिनं चतुर्वारं पठेद्यादि ॥ सर्वैश्वर्यं भवेत्सर्वं वेदपाठफलं भवेत् ॥१॥ वाञ्छाकल्पलतायास्तु न होमो न च तर्पणम् ॥ स्मरणादेव विद्याया मुक्तो भवति पुरुषः ॥२॥ आवर्तनत्रये लक्ष्मीं पञ्चावर्ते जगद्वशे ॥ दशावृत्तौ शिवादीनां देवानां भक्तिभाग्भवेत् ॥३॥ लक्षावृत्तौ सार्वभौमो दरिद्रोऽपि भवेन्नरः ॥ नार्थवादोऽथर्वणस्य वसिष्ठवचनं यथा ॥४॥

इति श्री अथर्वणरहस्ये उत्तरमार्गे विद्यागणपतिवाञ्छाकल्पलता समाप्ता ॥

VII EXCERPT FROM PRAYOGA-SĀRA

गोमयगणपतिपूजाविधानम्

अथ प्रयोग:।

अथ सङ्कटनाशककार्यसिद्धिदगणपति प्रयोग:।

१. आचम्येत्यादि॰ श्रीपरमेश्वरप्रीत्यर्थं मम त्वरितद्रव्यप्राप्त्यर्थं गोमयगणपतिपूजां करिष्ये। तदङ्गं प्राणप्रतिष्ठां करिष्ये । इति सङ्कल्प्य गोमयगणपतिं कृत्वा हस्ते धृत्वा – ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं लं क्षं हंस: सोऽहम्। अस्यां गोमयगणपतिमूर्तौ सर्वेन्दियाणि वाङ्मनस्त्वक्चक्षु:श्रोत्रजिव्हाघ्राणपाणिपाद पायूपस्थाख्यानि सुखं चिरं तिष्ठन्तु स्वाहा । ॐ असुनीते पुनरस्मासु चक्षु: पुन: प्राणमिहनौ धेहिभोगं ॥ ज्योक्पश्येम सूर्यमूच्चरंतमनुमते मृडया न: स्वस्ति ॥ इति । अस्य देवस्य गर्भाधानादि पञ्चदशसंस्कारसिद्ध्यर्थं पञ्चदशप्रणवावृत्ती: करिष्ये। ॐ इति पञ्चदशवारं जप्त्वा देवाय –

२. ॐ नमो वक्रतुण्डाय इति मन्त्रेण नैवेद्यं समर्पयेत्। तत: न्यासं कुर्यात्-स यथा – ॐ नमो वक्रतुण्डाय अङ्गुष्ठाभ्यां नम:। ॐ नमो वक्रतुण्डाय तर्जनीभ्यां॰। ॐ नमो वक्र॰ मध्यमाभ्यां॰। ॐ नमो वक्र॰ अनामिकाभ्यां॰ । ॐ नमो वक्र॰ कनिष्ठिकाभ्यां॰ । ॐ नमो वक्र॰ करतलकरपृष्ठाभ्यां नम:।

३. तत: हृदयादिषडङ्गन्यास: –

ॐ नमो वक्र॰ हृदयाय नम:। ॐ नमो वक्र॰ शिरसे स्वाहा। ॐ नमो वक्र॰ शिखायै वषट्। ॐ नमो वक्र॰ कवचाय हुं। ॐ नमो वक्र॰ नेत्रत्रयाय वौषट्। ॐ नमो वक्र॰ अस्त्राय फट्। इति।

४. अथ ध्यानं –

प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।
अभीप्सितार्थसिद्ध्यर्थं पूजितो य: सुरासुरै:॥

इति ध्वात्वा नत्वा नाममन्त्रेण पूजां कुर्यात्। यथा – ॐ नमो वक्रतुण्डाय आवाहयामि । ॐ नमो वक्रतुण्डाय आसनार्थे अक्षतान् (दूर्वाङ्कुरान् वा) समर्पयामि।

ॐ नमो वक्र॰ पाद्यं समर्पयामि। ॐ नमो वक्र॰ अर्घ्यं समर्पयामि । ॐ नमो वक्र॰ आचमनीयं समर्पयामि। ॐ नमो वक्र॰ स्नानं समर्पयामि। (शक्यं चेत् – ॐ नमो वक्र॰ पञ्चामृतस्नानं समर्पयामि।) ॐ नमो वक्र॰ शुद्धोदकस्नानं समर्पयामि । ॐ नमो वक्र॰ वस्त्रार्थे अक्षतान् (दूर्वाङ्कुरान् वा) समर्पयामि । ॐ नमो वक्र॰ विलेपनार्थे चन्दनं समर्पयामि। ॐ नमो वक्र॰ सिन्दूरं समर्पयामि। ॐ नमो वक्र॰ अलङ्कारार्थे अक्षतान् समर्पयामि । ॐ नमो वक्र॰ रक्तपुष्पं समर्पयामि। ॐ नमो वक्र॰ धूपं समर्पयामि। ॐ नमो वक्र॰ दीपं समर्पयामि। ॐ नमो वक्र॰ नैवे-द्यार्थे खण्डशर्करानैवेद्यं समर्पयामि। ॐ नमो वक्र॰ पूगीफलताम्बूलं समर्पयामि। ॐ नमो वक्र॰

दक्षिणां समर्पयामि। ॐ नमो वक्र° दूर्वाङ्कुरान् समर्पयामि। ॐ नमो वक्र° मन्त्रपुष्पं समर्पयामि। ॐ नमो वक्र° नमस्करोमि।

६. जप - एवं षोडशोपचारपूजां कृत्वा ॐ नमो वक्रतुण्डाय" अस्य मन्त्रस्य विशिष्टकामनासिद्ध्यै १००८ जपः कार्यः। (१०८ वारं वा)

७. जपोत्तरं षडङ्गन्यासं कृत्वा देवाय जपं निवेद्य नत्वा अनेन जपाख्येन कर्मणा भगवान् गोमयगणपतिः वक्रतुण्डः प्रीयताम्। "ॐ नमो वक्रतुण्डाय विसर्जयामि" इति मन्त्रेण विसर्जनं कृत्वा, भूमौ निधाय पश्चात् शर्कराभक्षणं कार्यम्।

८. एवं एकविंशतिदिनपर्यन्तमनुतिष्ठेत्। मूर्तेः जलादौ विसर्गः। प्रत्यहं नूतनां मूर्तिं कुर्यात्। अनेन त्वरितकार्यसिद्धिः द्रव्यलाभश्च।

इति प्राचीनतन्त्रग्रंथस्थ गोमयगणपतिविधानम् ॥

VIII FROM RUDRA-YĀMALA

१. श्रीगणेशयन्त्र

मंत्र – गं गणपतये नमः

गायत्री – एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दंती प्रचोदयात्॥

ध्यान – एकदन्तं चतुर्हस्तं पाशंमकुशधारिणम्॥ रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्॥ रक्त लंबोदरं शूर्पकर्णकं रक्तवाससम्॥ रक्तगंधानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्॥ भक्तानुकंपिनं देवं जगत्कारणमच्युतम्॥ आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥१॥

२. महागणपतियन्त्रपद्धतिः।

अथातस्सम्प्रवक्ष्यामि यन्त्रराजमनुत्तमम् – सुसमे तु प्रदेशे तु निम्नोन्नतविवर्जिते॥ मृल्लिप्तं सुखदेशे तु पुष्पप्राकारं शोभिते। पूजयेद्देवदेवेशं गणेशं शङ्करात्मकम्॥ भूर्जक्षौमेऽथवा पट्टे वा यन्त्रराजं समुद्धरेत्॥ षडारं चक्रमालिख्य अष्टारं च ततोपरि। द्वादशारं पुनर्लिख्य षोडशारं ततोऽद्धरेत्॥ चतुर्विंशद्दलं पद्मं द्वात्रिंशद्दल-बाह्यतः॥ पार्थिवं मण्डलं लिख्य वज्राष्टकविभूषितम्॥ तद्वाह्ये वारुणेनैव मण्डलेन विभूषितम्। अष्टावरणमेतद्धि चक्रराजमुनीश्वरी॥ साध्यं प्रणवमध्यस्थं श्रीबीजं सम्पुटीकृतम्। मन्त्राङ्गानि षडारे च उद्धरेच्च विचक्षणः॥ अष्टारे स्वरसंयुक्तयुग्मयुग्मं च कल्पयेत्। कामराजं लिखेत्पश्चात् द्वादशारे मनोहरे॥ द्वादश-स्वरभेदेन मूर्ध्नि बिन्दुविभूषितम्। ग्लोङ्कारं षोडशदले चतुर्विंशद्दले मनुम्॥ द्वात्रिंशत्पत्रके पद्मे लिपिवर्णान्यसेत्क्रमात्। पार्थिवमण्डले चैव महेन्द्रबीजमुत्तमम्॥ वेष्टयेद्वारुणेनैव यन्त्रराजं समुद्धरेत्। मायया वेष्टनं कृत्वा अङ्कुशेन विरोधयेत्। (वश्याकर्षणे) अग्रे बिल्वः मा पीतश्च रमारमेशोत्र दक्षिणे। वटजुषौ गिरिजावृषकौ पृष्ठे तु पिप्पलाजुषौ॥ रतिपुष्पबाणौ सव्ये प्रियङ्गुमपितश्च। महीवराहौ अत्र समृद्धिस्स्यात् विघ्नेशस्य प्रभावतः॥ वश्याकर्षणचलगती ग्रामाङ्कितं च चेष्टितम्। आलिख्य यन्त्रं वर्षात्रपत्रे गणेश्वरं सावर्णं प्रसन्नं एकोत्तरविंशतिवासरं यः सम्पूजयेत्सिद्ध्यन्ति तस्याभोगम्। एवं यन्त्रं समाख्यातं न देयं प्राकृते जने॥

३. उच्छिष्टगणपतिनवार्णयन्त्रम्॥

१. ॐ हस्ति हृदयाय नमः। २. गीं पिशाचि शिरसे स्वाहा। ३. ॐ गूं लिखे शिखायै वषट्। ४. ॐ अं स्वाहा कवचाय हुं। ५. ॐ गां हस्ति पिशाचि लिखे स्वाहा नेत्रत्रयाय वौषट्। ६। ॐ गः हस्ति पिशाचि लिखे स्वाहा अस्त्राय फट्। ७. ॐ ब्राह्म्यै नमः। ८. ॐ माहेश्वय नमः। ९. ॐ कौमार्यै नमः। १०. ॐ वैष्णव्यै नमः॥ ११. ॐ वाराह्यै नमः। १२. ॐ इन्द्राण्यै नमः। १३. ॐ चामुण्डायै नमः। १४. ॐ महालक्ष्म्यै नमः

१५. ॐ वक्रतुण्डाय नमः। १६. ॐ एकदंष्ट्राय नमः। १७. ॐ लम्बोदराय नमः। १८. ॐ विकटाय नमः। १९. ॐ धूम्रवर्णाय नमः। २०. ॐ विघ्नराजाय नमः। २१. ॐ गजाननाय नमः। २२. ॐ विनायकाय नमः। २३. ॐ गणपतये नमः। २४. ॐ हस्तिदन्ताय नमः। २५. ॐ लं इन्द्राय नमः। २६. ॐ रं अग्नये नमः। २७. ॐ मं यमाय नमः। २८. ॐ क्षं निर्ऋतये नमः। २९. वं वरुणाय नमः। ३०. ॐ यं वायवे नमः।

३१. ॐ कुं कुबेराय नमः। ३२. ॐ हं ईशानाय नमः। ३३. ॐ आँ ब्रह्मणे नमः। ३४. ॐ ह्रीं अनन्ताय नमः। ३५. ॐ वं वज्राय नमः। ३६. ॐ शं शक्तये ममः। ३७. ॐ दं दण्डाय नमः। ३८. ॐ खं खड्गाय नमः। ३९. ॐ पां पाशाय नमः। ४०. ॐ अं अङ्कुशाय नमः। ४१. ॐ गं गदायै नमः। ४२. ॐ त्रिं त्रिशूलाय नमः। ४३. ॐ पं पद्माय नमः। ४४. ॐ चं चक्राय नमः।

Excerpt from MANTRA-MAHĀRṆAVA-VYĀSA-GAṆEŚA-SAṀVĀDA: MAHĀGAṆAPATI-SAHASRA-NĀMASTOTRA

महागणपतिरुवाच । ॐ गणेश्वरो गणक्रीडो
गणनाथो गणाधिपः। एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो
महोदरः ॥१॥
लम्बोदरो धूम्रवर्णो विकटो विघ्ननायकः। सुमुखो
दुर्मुखो बुद्धो विघ्नराजो गजाननः ॥२॥
भीमः प्रमोद आमोदः सुरानन्दो मदोत्कटः। हेरम्बः
शम्बरः शम्भुर्लम्बकर्णो महाबलः ॥३॥
नन्दनो लम्पटोऽभीरुर्मेघनादो गणञ्जयः। विनायको
विरूपाक्षो धीरः शूरो वरप्रदः ॥४॥
महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः । रुद्रप्रियो
गणाध्यक्ष उमापुत्रोऽघनाशनः ॥५॥
कुमारगुरुरीशानपुत्रो मूषकवाहनः । सिद्धिप्रियः
सिद्धिपतिः सिद्धः सिद्धिविनायकः ॥६॥
अविघ्नस्तुम्बुरुः सिंहवाहनो मोहिनीप्रियः। कटङ्करो
राजपुत्रः शालकः सम्मितो मितः ॥७॥
कूष्माण्डसोमसम्भूतिर्दुर्जयो धूर्जयो जयः ।
भूपतिर्भुवनपतिर्भूतानाम्पतिरव्ययः ॥८॥
विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्घृणिः ।
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः ॥९॥
ज्येष्ठराजो निधिपतिर्निधिप्रियपतिप्रियः ।
हिरण्मयपुरान्तस्थःसूर्यमण्डलमध्यगः ॥१०॥
कराहतिध्वस्तसिन्धु सलिलः पूषदन्तहृत्
उमाङ्ककेलिकुतुकी मुक्तिदः कुलपालनः ॥११॥
किरीटी कुण्डली हारी वनमाली मनोमयः ।
वैमुख्यहतदैत्यश्रीः पादाहतजितक्षितिः ॥१२॥
सद्योजातः स्वर्णमुञ्जमेखली दुर्निमित्तहृत् ।
दुःस्वप्नहृत्प्रसहनो गुणिनादप्रतिष्ठितः ॥१३॥
सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः। पीताम्बरः
खण्डरदः खण्डेन्दुकृतशेखरः ॥१४॥
चित्राङ्कः श्यामदशनो भालचन्द्रश्चतुर्भुजः ।
योगाधिपस्तारकास्थः पुरुषो गजकर्णकः ॥१५॥
गणाधिराजो विजयस्थिरो गजपतिर्ध्वजः। देवदेवः
स्मरप्राणो दीपको वायुकीलकः ॥१६॥
विपश्चिद्वरदो नादो नादभिन्नबलाहकः ।
वाराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः ॥१७॥
इच्छाशक्तिधरो देवत्राता दैत्यविमर्द्दनः ।
शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुतेजाः
शिवाशोकहारी गौरीसुखावहः । उमाङ्गमलजो
गौरीतेजोभूः स्वर्धुनीभवः ॥१८॥
यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः। सर्वात्मा
सर्वदेवात्मा ब्रह्ममूर्द्धा ककुप्श्रुतिः ॥१९॥
ब्रह्माण्डकुम्भश्चिद्व्योमभालः सत्यशिरोरुहः ।
जगज्जन्मलयोन्मेषनिमिषोग्न्यर्कसोमदृक् ॥२०॥
गिरीन्द्रैकरदो धर्मो धर्मिष्ठः सामबृंहितः।
ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः ॥२१॥
भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोत्कटः ।
कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः ॥२२॥
नदीनदभुजः सर्पांगुलीकस्थारकानखः ।
व्योमनाभिः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः ॥२३॥

कुक्षिस्थयक्षगन्धर्वरक्षः किन्नरमानुषः। पृथ्वीकटिः सृष्टिलिङ्गः शैलोरुर्दस्रजानुकः॥२४॥

पातालजङ्घो मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः । ज्योतिर्मण्डललांगूलो हृदयालातनिश्चलः॥२५॥

हृत्पद्मकर्णिकाशाली वियत्केलिसरोवरः । सद्भक्तध्याननिगडः पूजावारिनिवारितः॥२६॥

प्रतापी कश्यपसुतो गणपो विष्टपो बली। यशस्वी धार्मिकः स्वोजाः प्रथमः प्रमथेश्वरः॥२७॥

चिन्तामणिर्द्वीपपतिः कल्पद्रुमवनालयः । रत्नमण्डप मध्यस्थो रत्नसिंहासनाश्रयः॥२८॥

तीव्राशिरोधृतपदो ज्वालिनीमौलिलालितः । नन्दानन्दितपीठश्रीभागदो भूषितासनः॥२९॥

सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः । तेजोवतीशीरोरत्नं सत्या नित्यावतंसितः॥३०॥

सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजाश्रयः लिपिपद्मासनाधारो वह्निधामत्रयाश्रयः॥३१॥

उन्नतप्रपदागूढगुल्फसंवृतपार्ष्णिकः । पीनजङ्घः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः॥३२॥

निम्ननाभिः स्थूलकुक्षिः पीनवक्षाबृहद्भुजः । पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्ब-नासिकः॥३३॥

भग्नवामरदस्तुङ्गसव्यदन्तो महाहनुः। ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः॥३४॥

स्तबकाकारकुम्भाग्रो रत्नमौलिर्निरंकुशः । सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान्॥३५॥

सर्पकोटीरकटकः सर्पग्रैवेयकांगदः । सर्पकक्ष्योदराबन्धः सर्पराजोत्तरीयकः॥३६॥

रक्तो रक्ताम्बरधरो रक्तमाल्यविभूषणः। रक्तक्षणो रक्तकरो रक्तताल्वोष्ठपल्लवः॥३७॥

श्वेतः श्वेताम्बरधरः श्वेतमाल्यविभूषणः । श्वेतपत्ररुचिरः श्वेतचामरवीजितः॥३८॥

सर्वावयवसम्पूर्णः सर्व लक्षणलक्षितः। सर्वाभ-रणशोभाढ्यः सर्वशोभासमन्वितः॥३९॥

सर्वमङ्गलमाङ्गल्यः सर्वकारणकारणम् । सर्वदैककरश्शार्ङ्गी पूजपूरी गदाधरः॥४०॥

इक्षुचापधरश्शूली चक्रपाणिस्सरोजभृत् । पाशी धृतोत्पलः शालिमंजरीभृत्स्वदन्तभृत्॥४१॥

कल्पवल्लीधरो विश्वाभयदैककरो वशी । अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः॥४२॥

पूर्णपात्री कम्बुधरो विधृतालिसमूहकः । मातुलुङ्गधरश्चूतकलिकाभृत्कुठारवान् ॥४३॥

पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः । भारतीसुन्दरीनाथो विनायकरतिप्रियः॥४४॥

महालक्ष्मीप्रियतमस्सिद्धलक्ष्मीमनोरमः। रमारमेशपूर्वाङ्गो दक्षिणोमामहेश्वरः॥४५॥

महीवराहवामाङ्गो रतिकन्दर्पपश्चिमः। आमोदमोदजननः सप्रमोदप्रमोदनः॥४६॥

सामैधिता समिद्धश्रीऋद्धिसिद्धिप्रवर्तकः । दत्तसौमुख्यसुमुखः कान्तिकन्दलिताश्रयः॥४७॥

मदनावत्याश्रितांघ्रिः कृतदौर्मुख्यदुर्मुखः । विघ्नसम्पल्लविपघ्नः सेवोन्निद्रमदद्रवः॥४८॥

विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः । तीव्राप्रसन्ननयनो ज्वलिनीपालितैकदृक्॥४९॥

मोहिनीमोहनो भोगदायिनीकान्तिमण्डितः । कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः॥५०॥

वसुन्धरामदोन्नद्धमहाशङ्खनिधिः प्रभुः । नमद्वसुमतीमौलिर्महापद्मनिधिप्रभुः॥५१॥

सर्वसद्गुरुसंसेव्यः शोचिष्कुशहृदाश्रयः । ईशानमूर्द्धा देवेन्द्रशिखः पवननन्दनः॥५२॥

अग्रप्रत्यग्रनयनो दिव्यास्त्राणाम्प्रयोगवित् ।
ऐरावतादिसर्वाशावारणावरणप्रियः ॥५३॥
वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः ।
जयाजयपरीवारो विजयाविजयावहः ॥५४॥
अजिताजितपादाब्जो नित्यानित्यावतंसितः ।
विलासिनीकृतोल्लासः शौण्डिसौन्दर्यमण्डितः ॥५५॥
अनन्तानन्तसुखदः सुमङ्गलसुमङ्गलः ।
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनिषेवितः ॥५६॥
सुभगासंश्रितपदो ललितालललिताश्रयः ।
कामिनीकामनः काममालिनीकेलिलालितः ॥५७॥
सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकतनः ।
गुरुगुप्तपदो वाचा सिद्धो वागीश्वरीपतिः ॥५८॥
नलिनीकामुको वामारामो ज्येष्ठामनोरमः ।
रौद्रीमुद्रितपादाब्जो हूंबीजस्तुङ्गशक्तिकः ॥५९॥
विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः ।
अमृताब्धिकृतावासो मदघूर्णितलोचनः ॥६०॥
उच्छिष्टगण उच्छिष्टगणेशो गणनायकः ।
सर्वकालिकसंसिद्धिर्नित्यशैवो दिगम्बरः ॥६१॥
अनपायोनन्तदृष्टिरप्रमेयोजरामरः ।
अनाविलोप्रतिरथो ह्यच्युतोऽमृतमक्षरम् ॥६२॥
अप्रतर्क्योऽक्षयोऽजय्योऽनाधारोऽनामयोऽमलः ।
अमोघसिद्धिरद्वैतमघोरोऽप्रमिताननः ॥६३॥
अनाकारोऽधिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः ।
आधारपीठ आधार आधाराधेयवर्जितः ॥६४॥
आखुकेतन आशापूरक आखुमहारथः ।
इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः ॥६५॥
इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः ।
इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः ॥६६॥

इन्दीवरदलश्याम इन्दुमण्डलनिर्मलः । इध्मप्रिय
इडाभाग इडाधामेन्दिराप्रियः ॥६७॥
इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः ।
ईशानधामेन्दिरप्रियः । ईशानमौलिरीशान
ईशानसुत ईतिहा ॥७४॥
ईषणात्रयकल्पान्त ईहामात्रविवर्जितः ।
उपेन्द्र उडुभृन्मौलिरुण्डेरकबलिप्रियः ॥६८॥
उन्नतानन उत्तुङ्ग उदारत्रिदशाग्रणीः ॥
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः ॥६९॥
ऋग्यजुःसामसम्भूतिऋद्धिसिद्धिप्रवर्तकः ।
ऋजुचित्तकःसुलभ ऋणत्रयविमोचकः ॥७०॥
लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषाम् ।
लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः ॥७१॥
एकारपीठमध्यस्थ एकपादकृतासनः ।
एजिताखिलदैत्यश्रीरेजितामिलसंश्रयः ॥७२॥
ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः ।
ऐरम्मदसमोन्मेष ऐरावतनिभाननः ॥७३॥
ओङ्कारवाच्य ओङ्कार ओजस्वानोषधीपतिः ।
औदार्यनिधिरौद्धत्यधूर्य औन्नत्यनिःस्वनः ॥७४॥
अंकुशः सुरनागानामांकुशः सुरविद्विषाम् ।
असमस्तविसर्गाणां पदेषु परिकीर्तितः ॥७५॥
कमण्डलुधरः कल्पः कपर्दी कलभाननः । कर्मसाक्षी
कर्मकर्त्ता कर्माकर्मफलप्रदः ॥७६॥
कदम्बगोलकाकारः कूष्माण्डगणनायकः ॥
कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् ॥७७॥
खर्वः खड्गप्रियः खड्गखातान्तस्थः खनिर्मलः ।
खल्वाटश्रृङ्गनिलयः खट्वाङ्गी खदुरासदः ॥७८॥
गुणाढ्यो गहनो गस्थो गद्यपद्यसुधार्णवः । गद्य
गानप्रियो गजा गीतगीर्वाणपूर्वजः ॥७९॥

गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः। गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः॥८०॥
घण्टाघर्घरिकामाली घटकुम्भो घटोदरः।
चण्डश्चण्डेश्वरसुहृच्चण्डेशश्चण्डविक्रमः॥८१॥
चराचरपतिश्चिन्तामणिश्चर्वणलालसः।
छन्दश्छन्दोवपुश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः॥८२॥
जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः।
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः॥८३॥
झलज्झल्लोल्लसद्दानझङ्कारिभ्रमराकुलः।
टङ्कारस्फारसंरावष्टङ्कारिमणिनूपुरः॥८४॥
ठद्वयी पल्लवान्तस्थः सर्वमन्त्रैकसिद्धिदः।
डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः ॥८५॥

ढक्कानिनादमुदितो ढौङ्को ढुण्ढिविनायकः।
तत्त्वाव नां परमं तत्त्वं तत्त्वम्पदनिरूपितः ॥८६॥

तारकान्तरसंस्थानस्तारकस्तारकान्तकः। स्थाणुः स्थाणुप्रियः स्थाता स्थावरञ्जङ्गमञ्जगत्॥८७॥
दक्षयज्ञप्रमथनो दाता दानवमोहनः।
दयावान् दिव्यविभवो दण्डभृद्दण्डनायकः॥८८॥
दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः।
दन्ष्ट्रलग्नद्विपघटो देवार्थमृगजाकतिः॥८९॥
धनधान्यपतिर्धन्यो धनदो धरणीधरः।
ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः॥९०॥
नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः।
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ॥९१॥

परं व्योम परं धाम परमात्मा परम्पदम्।
परात्परः पशुपतिः पशुपाशविमोचकः॥९२॥
पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः।
पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः॥९३॥

प्रणामप्रत्ययातीतः प्रणतार्तिनिवारणः।
फलहस्तः फणिपतिः फत्कारः फाणितप्रियः॥९४॥
बाणार्चितांघ्रियुगलो बालकेलिकुतूहली।
ब्रह्म ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः॥९५॥
बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः।
बृहन्नादाग्र्यचीत्कारो ब्रह्माण्डवालिमेखलः॥९६॥
भ्रूक्षेपदत्तलक्ष्मीको भगा भद्रो भयापहः।
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः॥९७॥
भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः।
मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तो मनोरमः॥९८॥
मेखलावान्मन्दगतिर्मतिमान्कमलेक्षणः।
महाबलो महावीर्यो महाप्राणो महामनाः॥९९॥
यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः। यशस्करो योगगम्यो याज्ञिको याजकप्रियः॥१००॥
रसो रसप्रियो रस्यो रञ्जको रावणार्चितः।
रक्षो रक्षाकरो रत्नगर्भो राज्यसुखप्रदः॥१०१॥
लक्ष्यालक्षप्रदो लक्ष्यो लयस्थो लड्डुकप्रियः।
लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः॥१०२॥
वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः। विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः॥१०३॥
वामदेवो विश्वनेता वज्री वज्रनिवारणः।
विश्वबन्धनविष्कम्भाधारो विश्वेश्वरः प्रभुः ॥१०४॥

शब्दब्रह्म शमप्राप्यः शम्भुशक्तिर्गणेश्वरः। शास्ता शिखाग्रनिलयः शरण्यः शिखरीश्वरः॥१०५॥

षड्तुकुसुमस्त्रग्वी षडाधारः षडक्षरः।
संसारवंद्यः सर्वज्ञःसर्वभेषजभेषजम्॥१०६॥

सृष्टिस्थितिलयक्रीडः सुरकुञ्जरभेदनः।
सिन्दूरितमहाकुम्भस्सदसद्युक्तिदायकः॥१०७॥

साक्षी समुद्रमथनः स्वसंवेद्यः स्वदक्षिणः। स्वतन्त्रः सत्यसंकल्पस्सामगानरतस्सुखी ॥१०८॥

हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक्। हव्यं हुतप्रियो हेषा हृल्लेखा मन्त्रमध्यगः ॥१०९॥

क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणः। क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरदुमः ॥११०॥

धर्मप्रदोऽर्थ दः कामदाता सौभाग्यवर्द्धनः। विद्याप्रदो विभवदो भुक्तिमुक्तिप्रदायकः ॥१११॥

आभिरूप्यकरो वीरः श्रीप्रदो विजयप्रदः। सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥११२॥

मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः। श्रीशोकहारी दौर्भाग्यनाशनःसर्वशक्तिभृत् ॥११३॥

प्रतिवादिमुखस्तम्भो हृष्टचित्तप्रसादनः। पराभिचारशमनो दुःखभञ्जनकारकः ॥११४॥

लवस्त्रुटिः कला काष्ठा निमेषस्तत्परः क्षणः। घटी मुहूर्तः प्रहरो दिवा नक्तमहर्निशम् ॥११५॥

पक्षो मासोऽयनं वर्षं युगङ्कल्पो महालयः राशिस्तारा तिथियागे वारः करणमंशकम् ॥११६॥

लग्नं होरा कालचक्रं मेरुस्सप्तर्षयो ध्रुवः। राहुर्मन्दः कविर्जीवो बुधो भौमश्शशी रविः ॥११७॥

कालसृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमञ्च यत्। भूरापोग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान् ॥११८॥

ब्रह्मा विष्णुशिवो रुद्र ईशशक्तिसदाशिवः।त्रिदशाः पितरः सिद्धा यक्षरक्षांसि किन्नराः ॥११९॥

साध्या विद्याधरा भूता मनुष्याः पशवः खगाः। समुद्रास्सरितश्शैला भूतभव्यम्भवोद्भवः ॥१२०॥

सांख्यम्पातञ्जलं योगः पुराणानि श्रुतिः स्मृतिः। वेदाङ्गानि सदाचारो मीमांसा न्यायविस्तरः ॥१२१॥

आयुर्वेदो धनुर्वेदो गान्धर्वङ्काव्यनाटकम्। वैखानसं भागवतं सात्वतम्पाञ्चरात्रकम् ॥१२२॥

शैवम्पाशुपतङ्कालमुखं भैरवशासनम्। शाक्तं वैनायकं सौरं जैनमार्हतसंहिता ॥१२३॥

सद्सव्यक्तमव्यक्तं सचेतहनचेतनम्। बन्धो मोक्षः सुखम्भोगोऽयोगस्सत्यमणुर्महान् ॥१२४॥

स्वस्ति हुं फट् स्वधा स्वाहा औषट् वोषड्वषण्नमः। ज्ञानविज्ञानमानन्दो बोधसंविच्छमो यमः ॥१२५॥

एक एकाक्षराधार एकाक्षरपरायणः। एकाग्रधीरेकवीर एकानेकस्वरूपधृक् ॥१२६॥

द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्विपरक्षकः। द्वैमातुरो द्विवदनो द्वन्द्वातीतो द्वयातिगः ॥१२७॥

त्रिधामात्रिकरस्त्रेता त्रिवर्गफलदायकः। त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥१२८॥

चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः। चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः ॥१२९॥

चतुर्विधवचो वृत्तिपरिवर्तप्रवर्तकः। चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः ॥१३०॥

पञ्चाक्षरात्मा पञ्चात्मा पञ्चतालः पञ्चकरः पञ्चप्रणवभावितः। पञ्चब्रह्ममयस्फूर्तिः पञ्चवारणवारितः ॥१३१॥

पञ्चभक्ष्यप्रियः पञ्चबाणः पञ्चशिवात्मकः। षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः ॥१३२॥

षडध्वध्वान्तविध्वंसी षडंगुलमहाह्रदः॥ षण्मुखः षंण्मुखभ्राता षट्शक्ति परिवारितः ॥१३३॥

षड्वैरिवर्गविध्वंसी षडूर्मिभयभञ्जनः। षट्तर्कदूरः षट्कर्मनिरतः षड्रसाश्रयः ॥१३४॥

सप्तपातालचरणः सप्तदीपोरुमण्डलः। सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः ॥१३५॥

सप्ताङ्गराज्यसुखदः सप्तर्षिगणमण्डितः।
सप्तच्छन्दोनिधिः सप्तहोता सप्तस्वराश्रयः॥१३६॥
सप्ताब्धिकलिकासारः सप्तमातृनिषेवितः।
सप्तच्छन्दोमोदमदसप्तच्छन्दो मखप्रभुः॥१३७॥
अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणम्।
अष्टाङ्गयोगफलभूरष्टपत्राम्बुजासनः॥१३८॥
अष्टशक्तिसमृद्धश्रीरष्टैश्वर्य प्रदायकः।
अष्टपीठोपपीठश्रीरष्टमातृसमावृतः॥१३९॥
अष्टभैरवसेव्योष्टवसुवन्द्योऽष्टमूर्तिभृत्।
अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः॥१४०॥
नवनागासनाध्यासी नवनिध्यनुशासिता।
नवद्वारपुराधारो नवद्वारनिकेतनः॥१४१॥
नवनारायणस्तुत्यो नवदुर्गानिषेवितः।
नवनाथमहानाथो नवनागविभूषणः॥१४२॥
नवरत्नविचित्राङ्गो नवशक्तिशिरोधृतः। दशात्मको दशभुजो दशदिक्पतिवन्दितः॥१४३॥
दशाध्यायो दशप्राणो दशेन्द्रियनियामकः।
दशाक्षरमहामन्त्रो दशाशाव्याधिविग्रहः॥१४४॥
एकादशादिभीरुद्रैः स्तुत एकादशाक्षरः।
द्वादशोर्द्दण्डदोर्द्दण्डो द्वादशान्तनिकेतनः॥१४५॥
त्रयोदशभिदा भिन्नविश्वे देवाधिदैवतम्।
चतुर्द्दशेन्द्रवरदश्चतुर्द्दशमनुप्रभुः॥१४६॥
चतुर्द्दशादिविद्याढ्यश्चतुर्द्दशजगत्प्रभुः।
सामपञ्चदशः पञ्चदशो शीतांशुनिर्मलः॥१४७॥
षोडशाधारनिलयः षोडशस्वरमातृकः।
षोटशान्तपदावासः षोडशेन्दुकलात्मकः॥१४८॥
कलासप्तदशीसप्तदशः सप्तदशाक्षरः।
अष्टादशद्वीपपतिरष्टादशपुराणकृत्॥१४९॥
अष्टादशौषधीसृष्टिरष्टादशविधिःस्मृतः।
अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः॥१५०॥

एकविंशः पुमानेकविंशत्यंगुलिपल्लवः।
चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः॥१५१॥
सप्तविंशतितारेशः सप्तविंशतियोगकत्।
द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः॥१५२॥
षट्त्रिंशत्तत्त्वसम्भूतिरष्टत्रिंशत्कलातनुः।
नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः॥१५३॥
पञ्चाशदक्षरश्रेणीः पञ्चाशद्रुद्रविग्रहः।
पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः॥१५४॥
द्विपञ्चाशद्वपुश्श्रेणिस्त्रिषष्ट्यक्षरसंश्रयः।
चतुष्षष्ट्यर्णनिणता चतुःषष्टिकलानिधिः॥१५५॥
चतुःषष्टिमहासिद्धयोगिनीबृन्दसेवितः।
अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः॥१५६॥
चतुर्णवतिमन्त्रात्मा षण्णवत्यधिकः प्रभुः।
शतानन्दः शतधृतिः शतपत्रायतेक्षेणः॥१५७॥
शतानीकः शतमुखश्शतधारवरायुधः। सहस्र पत्रनिलयस्सहस्रफलभूषणः॥१५८॥
सहस्रशीर्षाः पुरुषः सहस्राक्षस्सहस्रपात्।
सहस्र नामसंस्तुत्यः सहस्राक्षबलापहः॥१५९॥
दशसाहस्रफंणिभृत् फणिराजकृतासनः।
अष्टाशीतिसहस्रौघमहर्षिस्तोत्रयन्त्रितः॥१६०॥
लक्षाधीशप्रियाधारो लक्षाधीशमनोमयः।
चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः॥१६१॥
चतुराशीतिलक्षाणाञ्जीवानां
भवाध्युष्टकोटिविनायकधुरन्धरः।
सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः॥१६२॥
त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः।
अनन्तदेवतासेव्योह्यनन्तमुनिसंस्तुतः॥१६३॥
अनन्तमानन्तश्रीरनन्तानन्तसौख्यदः।
इति वैनायकं नाम्नां सहस्रमिदमीरितम्॥१६४॥
इदं ब्राह्मे मुहूर्ते वै यः पठेत्प्रत्यहं नरः। करस्थं तस्य सकलमैहिकामुष्मिकं सुखम्॥१६५॥

आयुरारोग्यमैश्वर्यं धर्मः शौर्यं बलं यशः। मेधा प्रज्ञा
धृतिः कान्तिस्सौभाग्यमतिरूपता ॥१६६॥
सत्यं दया क्षमा शान्तिर्दाक्षिण्यं धर्मशीलता ।
जगत्संयमनं विश्वसम्वादो वादपाटवम् ॥१६७॥
सभापाण्डित्यमौदार्यं गाम्भीर्यं ब्रह्मवर्चसम् ।
औन्नत्यं च कुलं शीलं प्रतापो वीर्यमार्यता ॥१६८॥
ज्ञानं विज्ञानमास्तिक्यं धैर्यं विश्वातिशायिता ।
धनधान्याभिवृद्धिश्च सकृदस्य जपाद्भवेत् ॥१६९॥
वश्यं चतुर्विधं नृणां जपादस्य प्रजायते । राज्ञो
राजकलत्रस्य राजपुत्रस्य मन्त्रिणः ॥१७०॥
जप्यते यस्य वश्यार्थे स दासस्तस्य जायते ।
धर्मार्थकाममोक्षाणामनायासेन साधनम् ॥१७१॥

शाकिनीडाकिनीरक्षोयक्षोरगभयापहम् ।
साम्राज्यसुखदं चैव समस्तरिपुमर्दनम् ॥१७२॥
समस्तकलहध्वंसि दग्धबीजप्ररोहणम् ।
दुःस्वप्नशमनं क्रुद्धस्वामिचित्तप्रसादनम् ॥१७३॥
षट्कर्माष्टमहासिद्धि त्रिकालज्ञानसाधनम् ॥
परकृत्योपशामनं परचक्रविमर्दनम् ॥१७४॥
संग्रामरङ्गे सर्वेषामिदमेकं जयावहम् ।
एवं वन्ध्यात्वदोषघ्नं गर्भरक्षैककारणम् ॥१७५॥
पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदम् । देशे तत्र
न दुर्भिक्षभीतयो दुरितानि च ॥१७६॥

EXCERPT FROM RUDRA-YĀMALA-TANTRA
GANEŚĀSHTOTTARA-STOTRA

गणेश्वरो गणक्रीडो महागणपतिस्तथा। विश्वकर्ता विश्वमुखो दुर्जयो धूर्जयो जयः॥१॥
स्वरूपः सर्वनेत्राधिवासो वीरासनाश्रयः। योगाधिपस्तारकस्थः पुरुषो गजकर्णकः॥२॥
चित्राङ्गः श्यामदशनो भालचन्द्रश्चतुर्भुजः। शम्भुतेजा यज्ञकायः सर्वात्मा सामबृंहितः॥३॥
कुलाचलांसो व्योमनाभिः कल्पद्रुमवनालयः। निम्ननाभिः स्थूलकुक्षिः पीनवक्षाबृहद्भुजः॥४॥
पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः। सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः॥५॥
इक्षुचापधरः शूली कान्तिकन्दलिताश्रयः। अक्षमालाधरो ज्ञानमुद्रावान् विजयावहः॥६॥
कामिनीकामनः काममालिनीकलिलालितः। अमोघसिद्धिराधार आधाराधेयवर्जितः॥७॥
इन्दीवरदलश्याम इन्दुमण्डलनिर्मलः। कर्मसाक्षी कर्मकर्त्ता कर्माकर्मफलप्रदः॥८॥
कमण्डलुधरः कल्पः कपर्द्दी कटिसूत्रभृत्। कारुण्यदेहः कपिलो गुह्यागमनिरूपितः॥९॥
गुहाशयो गुहाब्धिस्थो घटकुम्भो घटोदरः। पूर्णानन्दपरानन्दो धनदो धरणीधरः॥१०॥
बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः। भव्यो भूतालयो भोगदाता चैव महामनः॥११॥
वरेण्यो वामदेवश्च वन्द्यो वज्रनिवारणः। विश्वकर्ता विश्वचक्षुर्हवनं हव्यकव्यभुक्॥१२॥
स्वतन्त्रस्सत्यसङ्कल्पस्तथा सौभाग्यवर्द्धनः। कीर्तिदः शोकहारी च त्रिवर्गफलदायकः॥१३॥
चतुर्बाहुश्चतुर्दन्तश्चतुर्थीतिथिसम्भवः। सहस्रशीर्षा पुरुषः सरस्राक्षस्सहस्रपात्॥१४॥
कामरूपः कामगतिर्द्विरदो दीपरक्षकः। क्षेत्राधिपः क्षमाभर्ता लयस्थो लड्डुकप्रियः॥१५॥
प्रतिवादिमुखस्तम्भो दुष्टचित्तप्रसादनः। भगवान् भक्तिसुलभो याज्ञिको याजकप्रियः॥१६॥
इत्येवं देवदेवस्य गणराजस्य धीमतः। शताष्टोत्तरं नाम्नां सारभूतं प्रकीर्तितम्॥१७॥
सहस्रनाम्नाकृष्य मया प्रोक्तं स्तोत्रं मनोहरम्। ब्राह्मे मुहूर्ते चोत्थाय स्मृत्त्वा देवं गणेश्वरम्। पठेत्स्तोत्रमिदं भक्त्या गणराजः प्रसीदति॥१८॥

EXCERPT FROM RUDRA-YĀMALA-TANTRA: UCCHHISHṬA-GANAPATI-SAHASRA-NĀMA-STOTRA

विनियोगः ॐ अस्य श्रीउच्छिष्टगणेशसहस्त्र नामस्तोत्रमन्त्रस्य श्री भैरव ऋषिः। गायत्री छन्दः। श्रीमहागणपतिर्देवता । गं बीजम् । ह्रीं शक्तिः । कुरुकुरु कीलकम् । मम धर्मार्थकाममोक्षार्थे जपे विनियोगः।

ॐ ह्रीं श्रीं श्रीगणध्यक्षो ग्लां गं गणपतिर्गुणी । गुणाढ्यो निर्गुणो गोप्ता गजपक्त्रो विभावसुः॥१॥
विश्वेश्वरो विभादीप्तो दीपनो धीवरो धनी । सदा शान्तो जगत्राताविश्वावर्तो विभाकरः॥२॥

विश्रम्भी विजयो वैद्यो वारांनिधिरनुत्तमः । अणिमाविभवः श्रेष्ठो ज्येष्ठो गाथापीतविभूषाङ्को रक्तास्यो लोहिताम्बरः॥३॥

द्विपाक्षोच्चविमानस्थो विनयः सदयः सुखी । सुरूपः सात्त्विकः सत्यः शुद्धशङ्करनन्दनः॥४॥

नन्दीश्वरो जयानन्दी बन्धस्तुत्यो विचक्षणः । दैत्यमर्द्दी सदाक्षीबो मदिरारुणलोचनः॥५॥

सारात्मा विश्वसारश्च विश्वसारो विलेपनः। परं ब्रह्म परं ज्योतिः साक्षी त्र्यक्षो विकस्थितः॥६॥

विश्वेश्वरो वीरहर्ताः सौभाग्यो भाग्यवर्द्धनः । भृङ्गीरिटी भृङ्गमाली भृङ्गकूजितनादितः॥७॥

विवर्तको विनीतोपि नयनानन्दनार्चितः । गङ्गाजलपानप्रियो गङ्गातीरविहारिणः॥८॥
गङ्गाप्रियो गङ्गजश्च वाहनानि पुरः सदा गन्धमादनसंवासो गन्धमादनकेलिकृत्॥९॥

गन्धानुलिप्तपूर्णाङ्गः सर्वदेवस्मरः सदा । गणगन्धर्व राजेशो गणगन्धर्वसेवितः॥१०॥
गन्धर्वपूजितो नित्यं सर्वरोगविनाशकः गन्धर्वगणसंसेव्यो गम्धर्ववरदायकः॥११॥
गन्धर्व प्रबलास्त्वं गन्धर्वगणसंयुतः । गम्धर्वादिगुणानन्दो नन्दोनन्तगुणात्मकः॥१२॥
विश्वमूर्तिर्विश्वधाता विनतास्यो विनर्तकः । करालः कामदः कान्तः कमनीयः कलानिधिः॥१३॥
कारुण्यरूपः कुटिलः कुलाचारी कुलेश्वरः । विकारालो रणः श्रेष्ठः संहारो हारभूषणः॥१४॥

ऊरूरम्यमुखो रक्तो देवतादयितो रसः। महाकालो महादंष्ट्रो महोरगभयानकः॥१५॥

उन्मत्तरूपः कालाग्निरग्निसूर्येन्दुलोचनः । सितास्यश्चासितात्मा भैरवसौभाग्यवान्भगः ॥१६॥

भर्गात्मजो भगावासो भगदो भगवर्द्धनः। शुभङ्करः शुचिः शान्तः श्रेष्ठः श्रव्यः शचीपतिः॥१७॥
वेदाद्यो वेदकर्ता च वेदवेद्यः सनातनः। विद्याप्रदो वेदरसो वैदिको वेदपारगः॥१८॥

वेदाध्वनिरंतो वीरो वेदवेदाङ्गस्वर्थवित् । तत्त्वज्ञः सर्वगः साधुः सदयः सदसन्मयः॥१९॥
शिवङ्करः शिवसुतः शिवानन्दविवर्द्धनः। सैन्यः श्वेतः शतमुखो मुग्धो मोदकभञ्जनः॥२०॥
देवदेवो दिनकरो धृतिमान्द्युतिमान्धनः। शुद्धात्मा शुद्धमतिमाञ् शुद्धदीप्तिः शुचिव्रतः॥२१॥

शरण्यः शौनकः शूरः शब्ददम्भीजटोरुकः। दारकः
शिखिवाहेष्टः सितः शङ्करवल्लभः॥२२॥
शङ्करो निर्भयो नित्यो लयकृल्लास्यतत्परः। लूतो
लीलारसोल्लासी विलासी विभ्रमो भ्रमः॥२३॥
भ्रमणः शशिभृत्सूर्यः शनिर्धरणिनन्दनः। बुधो
बिबुधसेव्यश्च बुधराजो बलन्धरः॥२४॥
जीवो जीवप्रदो जेता स्तुत्यो नित्यो रतिप्रियः।
बुधो विबुधसेव्यश्च जनरक्षणतत्परः॥२५॥
जनानन्दप्रदाता च जनकाह्लादकारकः। गच्छो
गणपतिर्गच्छनायको गच्छगर्वहा॥२६॥
गच्छराजोथ गच्छेशो गच्छराजनमस्कृतः।
गच्छप्रियो गच्छगुरुर्गच्छत्राकद्यमातुरः॥२७॥
गच्छप्रभुर्गच्छचरो गच्छप्रियकृतोद्यमः।
गच्छगीतगुणो गर्ता मर्यादाप्रतिपालकः॥२८॥
गीर्वाणागमसारस्य नभो गीर्वाणदेवता।
सम्पत्तिसदनाकारः सम्पत्तिसुभगाननः।
सम्पत्तिशुभदो नित्यं सम्पत्तिश्चतपोधनः॥२९॥
रुचको मेचकस्तुष्टः प्रभुस्तोमरघातकः। दण्डी
चण्डांशुरव्यक्तः कमण्डलुधरोऽनघः॥३०॥
कामो कर्मरतः कालकोलः क्रन्दितदिक्तटः।
भ्रामको जातिपूज्यश्च जाड्यहा जडसूदनः॥३१॥
जालन्धरो जगद्वासी हासगृद्गहनो गुहः।
हविष्मान्हव्यवाहाक्षो हाटको हाटकाङ्गदः॥३२॥
सुमेरुर्हिमवान्होता हरपुत्रो हलाङ्कपः।
हालाप्रियो हृदा शान्तः कान्ताहृदयपोषणः॥३३॥
शोषणः क्लेशहा क्रूरः कुबेरः कविताकृतिः। कुबेरो
धीमयो धीता ध्येयो धीमान्दयानिधिः॥३४॥
दविष्ठो दमनो हृष्टो दाता त्राता सिता समः। निर्गतो
नैगमो गम्यो निर्जयो जटिलोऽजरः॥३५॥
जनजीवो जितारातिर्जगद्व्यापी जगन्मयः।
चामीकरनिभो नाभ्यो नलिनायतलोचनः॥३६॥
रोचनामोचका मन्त्री मन्त्रकोटिसमाश्रितः।
पञ्चभूतात्मकः पञ्चसायकः पञ्चवक्त्रकः॥३७॥
पञ्चमः पश्चिमः पूर्वः पूर्णः गीर्णालकः कुणिः।
कठोरहृदयग्रीवोलंकृतो ललिताशयः॥३८॥
लोलचित्तो बृहन्नासो मासपक्षर्तुरूपवान्। ध्रुवो
व्रुतगतिर्बन्धो धर्मवान्किंप्रियोनलः॥३९॥
अगस्त्यग्रस्तभुवनो भुवनैकमलापहः। सासरः
स्वर्गतिः स्वक्षः सानन्दः साधुपूजितः॥४०॥
सतीपतिः समरसः सनकः सरलः सरः।
सुरप्रियो वसुमतिर्वासवो वसुपूजितः॥४१॥
वित्तदो वित्तनाथश्च धनिनां धनदायकः।
राजीवनयनः स्मार्ता स्मृतिहा कृत्तिकाम्बरः॥४२॥
अश्विनोश्विमुखः शुभ्रो भरणो भरणीप्रियः।
कृत्तिकासनकः कोलो रोहिणी रोहिणोपमः॥४३॥
क्रतवोष्टोरिमन्दी च रोहिणीमोहिनीभृतः।
मृगराजो मृगशिरो माधवो मधुरध्वनिः॥४४॥
आर्द्रानलो महाबुद्धिर्महोरगविभूषणः।
भ्रूक्षेपदन्तविभवो भ्रूकरालः पुनर्मयः॥४५॥
पुनर्देवः पुनर्जाता पुनर्जीवः पुनर्वसुः।
तिमिरस्तिमिकर्तुश्च तिमिवासरघातनः॥४६॥
तिष्यस्तुलाधरो जृम्भो विश्लेषा श्लेषदानराट्।
मानवी माधवो माघो वाचालो मघवो यमः॥४७॥
मघो मघाप्रिये मेघो महाशुण्डो महाभुजः।
पूर्वाफाल्गुणिकः प्रीतः फल्गुरुत्तरफाल्गुणः॥४८॥
फेनिलो ब्रह्मदो ब्रह्मा सप्ततन्तुसमाश्रयः।
घोणाहस्तश्चतुर्हस्तो हस्तिवक्त्रो हलायुधः॥४९॥
चित्राम्बरोर्चितपदः स्वस्तिदः स्वस्तिविग्रहः।
विशाखाशिखिसेव्यश्च शिखिध्वजसहोदरः॥५०॥
अणूरेणूकरस्कारो रूरूरेणू सुतिरहः।
अनुराधाप्रियो राधः श्रीमाञ्छुक्लः शुचिस्मितः॥५१॥

ज्येष्ठः श्रेष्ठार्चितपदो मूलं त्रिजगतो गुरुः। शुचिः
पूर्वोत्तराषाढश्चोत्तराषाढ ईश्वरः॥५२॥
श्रव्योभिजिदन्तात्मा श्रवोश्चेपितदानवः। श्रावणः
श्रवणः श्रोता धनी धान्यो धनिसृकः॥५३॥
धेनुशुकः सदा तीव्रः शीतकुम्भः शरदंद्युतिः।
पुर्वाभाद्रपदाभद्रश्चोत्तराभाद्रपादितः॥५४॥
रेणुकस्तनयो रामो रेवतीरमणो रमी।
अश्वयुक्कार्तिकयेष्टो मार्गशीर्षा मृगोत्तमः॥५५॥
पौषैश्वर्यः फाल्गुनात्मा लसन्तश्चित्रको मधुः।
राज्यदोभिजिदात्मीयस्तारेशस्तारकद्युतिः॥५६॥
प्रतीतः प्रोजितः प्रीतः परमः परमो हितः।
परहा पञ्चभूः पञ्चवायुपूज्यः परो महः॥५७॥
पुराणागमविद्योगी महिषो रासभोग्रगः। ग्रहो मेषो
वृषो मन्दो मन्मथो मिथुनाकृतिः॥५८॥
कल्पभूत्कण्टकटको दीपो मर्कटेशप्रभुः।
कर्कटो घृणिकुक्कटो वनजो हंसरोहसः॥५९॥
सिंहसिंहासनो भूष्यो मुहुर्मूषकवाहनः।
कन्याकलावतीपुत्रो कन्याप्रीतः कुलोद्वहः॥६०॥
अतुल्यरूपो बलदस्तुल्यभृत्तुल्यसाक्षिकः।
अलिश्चापधरो धन्वी कच्छपो मकरो मणिः॥६१॥
कुम्भभृत्कलशः कुब्जी मीनमांससुतर्पितः।
राशितारांग्रहमयस्तिथिरूपो जगद्विभुः॥६२॥
प्रतापी प्रतिपत्प्रेयो द्वितीयाद्वैतनिश्चितः।
त्रिरूपश्च तृतीयाग्निस्त्रयीरूपस्त्रयीतनुः॥६३॥
चतुर्थीवल्लभो देवो परागः पञ्चमीश्वरः।
षड्रसास्वादको जातः षष्ठी षष्ठीकवत्सलः॥६४॥
सप्तार्णवगतिः सारः सत्यमीश्वररोहितः।
अष्टमीनन्दनोनन्तो नवमीभक्तिभावितः॥६५॥
दशदिक्पतिपूज्यश्च दशमीद्रुहिणो द्रुतः।
एकादशात्मगणपो द्वादशीयुगचर्चितः॥६६॥

त्रयोदशमणिस्तुत्यश्चतुर्दशस्वरप्रियः।
चतुर्दशेन्द्रसंस्तुल्यः पूर्णिमानन्दविग्रहः॥६७॥
दर्शादर्शा दर्शगश्च वानप्रस्थो महेश्वरः।
मौर्वी मधुरवाग् मूलं मूर्तिमान्मेघवाहनः॥६८॥
महागजो जितक्रोधो जितशत्रुर्जयाश्रयः।
रौद्री रुद्रप्रियो रुद्रो रुद्रपुत्रोघनाशनः॥६९॥
भवप्रियो भवानिष्टो शरभृद्भूतभावनः।
गन्धर्वकुशलः कुष्ठो वैकुष्ठोऽबिष्टसेवितः॥७०॥
वृत्रहा विघ्नहा सीरः समस्तदुःखतापहः।
मञ्जुरो मार्जरो मत्तो दुर्गापुत्रो दुरालसः॥७१॥
अनन्तचित्सुधाधारो वीरवीयकसाधकः।
भास्वन्मुकुटमाणिक्यः कूजत्किङ्किणिजालकः
॥७२॥
शुण्डाधारी तुण्डचलः कुण्डली मुण्डमालकः।
पद्माक्षः पद्महस्तश्च पद्मनाभसमर्चितः॥७३॥
उदितानरदन्तास्यो मालाभूषणभूषितः। नारदो
वारणो लोलश्रवणः शूर्पकर्णकः॥७४॥
बृहदुल्लासनासाढ्यो व्याप्तत्रैलोक्यमण्डलः।
रत्नमण्डलासीनः कृशानुरूपशीलकः॥७५॥
बृहत्कर्णाञ्चलोद्धूतवायुवीजितदिक्पटः।
बृहदास्यरवाक्रान्तो भीमब्रह्माण्डभाण्डकः॥७६॥
बृहत्पादसमाक्रान्तसप्तपातालदीपितः।
बृहद्दन्तकृतात्युग्ररणान्दरसालसः॥७७॥
बृहदुल्लासनासाढ्यो व्याप्तत्रैलोक्यमण्डलः।
स्फुरत्सिन्दूरवदनः स्फुरत्तेजोग्निलोचनः॥७८॥
उद्दीपितमणिस्फूर्जन्नूपुरध्वनिनादितः।
चलतोयप्रवाहाढ्यो नदीजलकणाकरः॥७९॥
भ्रमत्कुञ्जरसंघातवन्दितांघ्रिशिरोरुहः।
ब्रह्माच्युतमहारुद्रपुरःसरसुरार्चितः॥८०॥

अशेषशेषप्रभृतिव्यालजालोपसवित:।
गर्जत्पञ्चाननारावप्रसादितधरातल:॥८१॥
हाहाहूहूगतात्युग्रस्वरविश्रान्तमानस:।
पञ्चाशद्वर्णबीजाढ्यो मन्त्री मन्त्रितविग्रह:॥८२॥
वेदान्तशास्त्रपीयूषधाराप्लावितभूतल:॥
शङ्खध्वनिसमाक्रान्तपातालादिनभस्तल:॥८३॥
चिन्तामणिर्महामल्लो बल्लहस्तो बलि: कवि:।
कृतत्रेतायुगोल्लासभासमानजगत्त्रय:॥८४॥
द्वापर: परलोकक: कर्मध्वान्तसुधाकर:।
सुधासिक्तवपुर्व्यासो ब्रह्माण्डादिकबाहुक:॥८५॥
अकारादिक्षकारान्तवर्णपंक्तिसमुज्ज्वल:।
अकाराकारमोद्गीतताननादनिनादित:॥८६॥
इकारेकारमन्त्राढ्यो मालाभरणलालस:।
उकारोकारमोहारिघोरनागोपवीतक:॥८७॥
वर्णाङ्कितऋङ्काद्वपद्मरयसमुज्ज्वल:।
लृकारयुतलृकारशङ्खपूर्णदिगन्तर:॥८८॥
एकारेकारगिरिजास्तनपानविचक्षण:।
ओ कारौकारविश्वादिकृतसृष्टिक्रमालस:॥८९॥
अंओवर्णावलीव्याप्तपादादिशीर्षमण्डल:।
कर्णतालकृतात्युच्चवायुवीजितनिर्जर:॥९०॥
खगेशध्वजरत्नाङ्क: किरीटारुणपादक:।
गर्विताशेषगन्धर्वगीततत्परश्रोत्रक:॥९१॥
घनवाहनवागीशपुर:सरसुरार्चित:।
ङवर्णामृतधाराढ्यसोममानैकदन्तक:॥९२॥
चन्द्रकुंकुमजम्बाललिप्तसिन्दूरविग्रह:।
छत्रचामररत्नाढ्यमुकुटालंकृतानन:॥९३॥
जटाबद्धमहार्घमणिपंक्तिविराजित:।
झङ्कारिमधुपव्रातगाननादविनोदित:॥९४॥
जवर्णकृतसंहारदैत्यासृक्पर्णमुद्गर:।
टकारश्च फलास्वादी वेपिताशेषमूर्धज:॥९५॥

ताम्रसिन्दूरपूजाढ्यो ललाटफलकच्छवि:।
थकारधनपंक्त्याढ्य: सन्तोषितद्विजव्रज:॥९६॥
दयामृतहृदम्भोजधृतत्रैलोक्यमण्डल:।
धनदादिमहायक्षसंसेवितपदाम्बुज:॥९७॥
नमिताशेषदेवौघकिरीटमणिरञ्जित:।
परवर्गापवर्गादिभोगच्छेदनदक्षक:॥९८॥
फणिचक्रसमाक्रान्तमल्लमण्डलमण्डित:।
बद्धभ्रूयुगभीमोग्रसन्तर्जितसुरासुर:॥९९॥
भवानीहृदयानन्दवर्द्धनैकनिशाकर:।
मदिराकलशप्रीत: करात्तैककराम्बुज:॥१००॥
यज्ञान्तरायसंघातसज्जीकतवरायुध:।
रत्नाकरसुंताक्रान्तक्रान्तिकीर्तिविवर्धन:॥१०१॥
लम्बोदरमहाभीमवपुर्दीप्तकृतासुर:।
वरुणादिदिगीशानामर्चितार्चनचर्चित:॥१०२॥
शङ्करैकप्रिय: प्रेमनयनानन्दवर्द्धन:।
षोडशस्वरतालापगीतगानविचक्षण:॥१०३॥
समदुर्गसरिन्नाथस्तारणार्कोडुपोहर:।
ब्रह्मवैकुण्ठब्रह्मज्ञसंरक्षिततनूचर:॥१०४॥
ताराङ्कमन्त्रवर्णैकविग्रहोज्ज्वलविग्रह:।
अकारादिक्षकारान्तविद्याभूषितविग्रह:॥१०५॥
ॐ श्रीविनायको ॐ ह्रीं विघ्नाध्यक्षो गणाधिप:।
हेरम्बो मोदकाहारो वक्रतुण्डो विधि: स्मृत:
॥१०६॥
वेदान्तगीतो विद्यार्थिसिद्धमन्त्र: षडक्षर:।
गणेशो वरदो देवो द्वादशाक्षरमन्त्रित:॥१०७॥
सप्तकोटिमहामन्त्रमन्त्रिताशेषविग्रह:।
गाङ्गेयो गणसेव्यश्च ॐ श्रीद्वैमातुर: शिव:॥१०८॥
ॐ ह्रीं श्रीं क्लीं ग्लां गं देवो महागणपति: प्रभु:।इदं
नामसहस्रं ते महागणपते: स्मृतम्॥१०९॥
गुह्यं गोप्यतमं सिद्धं सर्वतंत्रेषु गोपितम्।
सर्वमन्त्रमयं दिव्यं सर्वमन्त्रविनायकम्॥११०॥

ग्रहतारामयं राशिवर्णपंक्तिसमन्वितम् । सर्वविद्यामयं ब्रह्मसाधनं साधकप्रियम् ॥१११॥
गणेशस्य च सर्वस्वं रहस्यं त्रिदिवौकसाम् ।
यथेष्ठफलदं लोके मनोरथप्रपूरणम् ॥११२॥
अष्टसिद्धिमयं श्रेष्ठं साधकानां जयप्रदम् । विनार्चनं विना होमं विना न्यासं विना जपम् ॥११३॥
अणिमाद्यष्टसिद्धीनां साधनं स्मृतिमात्रतः ।
चतुर्थ्यामर्धरात्रे तु पठेन्मन्त्री चतुष्पथे ॥११४॥
लिखेद् भूर्जे महादेवि पुण्यं नाम सहस्रकम् ।
धारयेत्तं चतुर्दश्यां मध्याह्ने मूर्ध्नि वा भुजे ॥११५॥
योषिद्वामकरे चैव पुरुषो दक्षिणे भुजे ।
स्तम्भयेदपि ब्रह्माणं मोहयेदपि शङ्करम् ॥११६॥
वशयेदपि त्रैलोक्यं मारयेदखिलान्रिपून् ।
उच्चाटम्येच्च गीर्वाणं शमयेच्च धनञ्जयम् ॥११७॥
वन्ध्या पुत्रं लभेच्छीघ्रं निर्धनो धनमाप्नुयात् ।
त्रिवारं यः पठेद्रात्रौ गणेशस्य पुरः शिवे ॥११८॥
नक्तं शक्तियुतो देवि भुक्त्वा भोगान्यथेप्सितान् ।
प्रत्यक्षवरदं पश्येद्गणेशं साधकोत्तमः ॥११९॥
पराह्ने पठ्यते नाम्नां सहस्रं भक्तिपूर्वकम् । तस्य वित्तादिविभवो दारायुः सम्पदः सदा ॥१२०॥
रणे राजभये द्यूते पठेन्नामसहस्रकम् । सर्वत्र जयमाप्नोति गणेशस्य प्रसादतः ॥१२१॥
इतीदं पुण्यसर्वस्वं मन्त्रनामसहस्रकम् ।
महागणपतेः पुण्यं गोपनीयं स्वयोनिवत् ॥

इति श्रीरुद्रयामलतन्त्रे उच्छिष्टगणेशसहस्रनामस्तोत्रं समाप्तम् ।

BĀLA-GAṆAPATI



ARBHAKA-GAṆAPATI OF PIḶḶAIĀRPAṬṬI



BĀLA-GAṆAPATI



MAYŪREŚA OF MORGOAN

MADHU-KAIṬABHA-VARADA OF SIDDHAṬEK

TRIPURĀRI-VARADA OF SIDDHAṬEK



MADHŪRU-GAṆAPATI

KŪRMA-GAṆAPATI
(from China)

ĀKHU-VĀHANA
(from Pānagal)

VĀTĀPI-GAṆAPATI
(from Tiruvārūr)

NṚTTA-GAṆAPATI OF VEDĀRAṆYA

SIDDHI-VINĀYAKA



CHAPTER FIVE

FORMS FOR WORSHIP

The worship of Gaṇapati with different names and in variant forms appears to be an ancient practice. It is probably derived from the Vināyaka background of the god. The vināyakas constituted a large group. They were numerous not only in conception but also in ritualistic practice. Even in the Smṛti period, 'Vināyaka- śānti' involved the pacification of many Vināyakas, although their number in due course was settled as six (shaḍ-vināyakas) or four (vināyaka-chatushṭaya). When invoked in a maṇḍala, they were twelve or sixteen in number.

Brahma-vaivarta-purāṇa (3, 44, 85), which may be taken as an early source, gives only eight names of Gaṇapati:

गणेशमेकदन्तं च हेरम्बं विघ्ननायकम् ।
लम्बोदरं शूर्पकर्णं गजवक्त्रं गुहाग्रजम् ॥

Yogajāgama, which also gives eight names, has the following: Vighneśvara, Mahā-karṇa, Gaja-vaktra, Mahodara, Eka-danta, Mahā- kāya, Vighneśa and Gaṇādhipa. One can see that the names here are more descriptive than in the list given above.

Amara-kośa (1,1,40-41) adds two more names: Vināyaka and Dvyai-mātura:

विनायको विघ्नराजः द्वैमातुर गणाधिपाः ।
अप्येकदन्त हेरम्ब लम्बोदर गजाननाः ॥

Padma-purāṇa (sṛshṭi-khaṇḍa, 6,3) gives twelve names: Gaṇapati, Vighna-rāja, Laṁba-tuṇḍa, Gajānana, Deva-mātura (Dvyai-mātura), Heraṁba, Eka-danta, Gaṇādhipa, Vināyaka, Chāru-karṇa, Paśu-pāla and Bhavātmaja. Later, another list of twelve names became popular:

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छ्रुणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥

Chintyāgama provides a list of sixteen names, which are altogether different from the names included in the above lists. This list is more relevant to iconographical representation. The list has

1. Bāla-gaṇapati,
2. Bhakti-gaṇapati,
3. Vīra-gaṇapati,
4. Siddhi-gaṇapati,
5. Piṅgala-gaṇapati,
6. Śakti-gaṇapati,
7. Ucchishṭa-gaṇapati,
8. Rakta-gaṇapati,
9. Kshipra-prasāda- gaṇapati,
10. Heraṁba-gaṇapati,
11. Lakshmī-gaṇapati,
12. Vijaya-gaṇapati,
13. Nṛtta-gaṇapati,
14. Ūrdhva-gaṇapati,
15. Mahā-gaṇapati,
16. Haridrā-gaṇapati.

This list includes the five forms accepted by the sects of the gāṇapatyas, each with specific iconic details and accompanied by a consort (śakti):

1. Mahā-gaṇapati: ten arms; red complexion

2. Ūrdhva-gaṇapati: six arms; yellow

3. Ucchhishṭa-gaṇapati: four arms; red

4. Piṅgala-gaṇapati : six arms; yellow

They are all tāntrik in conception and in the mode of worship accorded. It is under the tāntrik influence that iconic representation of gods and goddesses became important and variegated. Earlier icons of Gaṇeśa were two-armed, and unornamented; they carried no weapons and were not accompanied by consorts. Besides elephantine countenance and probably large belly, there was little that helped identification of the figure with Vināyaka. Nor did the early worship of Vināyaka (or vināyakas) involve specific mantras and ritualistic peculiarities. The tāntrik forms not only introduced variety (in accordance with the purposes)but several magical elements. Special significance was attached to the colour of the image, inclination of the trunk, left-ward (vāmāvarta, iḍamuri), or rightward (dakshiṇāvarta, balamuri), number of arms, number of heads, weapons carried in the hands, posture assumed, details of the consort, vehicle, seat, decorations and so on. The dhyāna-ślokas helped visualization of these forms.

Ucchhishṭa-gaṇapati, for instance, is a typical tāntrik form, which is carved out in white arka or niṁba-wood and invoked in the magical rite known as vaśya-kriyā. The mantra identifies the form with the 'elephant-devil' or with a mysterious sylvan-spirit (yaksha).

१) ॐ ह्रीं गं हस्तिपिशाचि लिखे स्वाहा ।
२) गं हं क्लौं ग्लौं उच्छिष्टगणेशाय महायक्षायायं बलिः ।

The image is to be worshipped with four thousand dhattura flowers, and later thrown away on the banks of a river at night ('mūrtim kshiped rātrau saris-taṭe'). The details of the figure are mentioned in the dhyāna-śloka: four-armed, carrying

bow, arrow, noose and goad; seated on a red lotus; and engaged in amorous sport with his consort who is nude.

शरं धनुः पाशसृणी स्वहस्तै-
र्दधानमारक्तसरोरुहस्थम् ।
विवस्त्रपत्न्या सुरतप्रवृत्त -
मुच्छिष्टमम्बासुतमाश्रयेऽहम् ॥

If the form is a variant one, known as Unmatta-vināyaka, it has a different dhyāna-śloka: the deity seated on a lotus is red in complexion, three-eyed, and four-armed carrying noose, goad, bowl of sweet-cakes and tusk:

चतुर्भुजं रक्ततनुं त्रिणेत्रम्
पाशाङ्कुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थ -
मुन्मत्तमुच्छिष्टगणेशमीडे ॥

This form is used for driving the desired woman mad or for driving away the enemy. The image in the former case is prescribed to be made in potter's clay mixed with the dirt taken from the left foot of a woman, and the name of the woman desired is inscribed on the chest of the icon; and it must be poked with nimba-sticks:

कुलालस्य मृदा स्त्रीणां वामपादस्य रेणुना ।
कृत्वा पुत्त्थलिकां तस्या हृदि स्त्रीनाम संलिखेत् ॥
निखनेत् मन्त्र संजप्तैर्निम्बकाष्टैः क्षिताविमाम् ।
सोऽन्मत्ता भवति क्षिप्रमुद्धृतायां सुखं भवेत् ॥
शत्रोरेवं कृता सा तु लशुनेन समन्विता ।
शरावान्तर्गता सम्यक् पूजिता द्वारि विद्विषः ॥

Likewise, another form known as Haridrā-gaṇapati, is invoked for arresting the higher thinking processes (viz. critical faculties) of all people, so that whatever one desires is achieved (abhīshṭa-siddhi):

ओं हुं गं ग्लौं हरिद्रागणपतये वर वरद सर्वजनहृदयं स्तम्भय
स्तम्भय स्वाहा ॥

The image is either carved in turmeric root or made out of turmeric paste in cow's urine, or is made in clay and covered with powdered turmeric ('pishṭa-haridrayā viliptāngam'). The dhyāna- śloka mentions that the god is four-armed, carrying noose, goad, sweet cake and tusk in his hands; he has three eyes and is clad in yellow garments; he is seated on a golden throne:

पाशाङ्कुशौ मोदकमेकदन्तम्
करैर्दधानं कनकासनस्थम् ।
हरिद्राखण्डप्रतिमं त्रिणेत्रम्
पीतांशुकं रात्रिगणेशमीडे ॥

Mahā-gaṇapati is a popular tāntrik deity worshipped by followers of the Gaṇapati cult. He is visualized as seated within a triangle inside a six-sided figure, located in the lotus constituted by the seet-

letters of the alphabet ('mātṛkāmbuje shaṭ-koṇāntastrikoṇa-stham'), under the pārijāta tree decorated with the nine precious stones, in the marvellous island in the sea of sugar-cane juice (Śāradā-tilaka-tantra, 13, 31, 34). He is imagined as red in complexion, ten-armed and three-eyed. He is embraced by his beloved seated on his left lap. On his head is crescent moon.

हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसा-
दाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया
सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखरुक्चक्राब्ज
पाशोत्पल -
व्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहन्तं भजे

(ibid, 35)

Gaṇeśvara-vimarśinī provides more specific details of the same form but omits the presence of Śakti on his lap.

दक्षाधःकरमारभ्य वामाधःस्थकरान्तिकम् ।
गदाशूलाब्जकह्लारविषाणं दक्षिणैः करैः ।
शाल्यग्रपाशचक्रेक्षुचापसद्बीजपूरकम् ।
वामैर्दधानं मञ्जीरविलसच्चरणाम्बुजम् ।
लीलया रत्नकलशं पुष्कराग्रे निधाय च ॥

Thus there appears to have been two varieties of Mahā-gaṇapati. One with the Śakti, worshipped by the tāntriks in secret rituals, and the other without the Śakti, meant for general worship. The worship of the former variety, elaborately given in Śāradā-tilaka-tantra, includes a minor form, four-armed Viri-Vighneśvara, who holds in his normal right hand a skull-cup filled with wine and who is engaged in amorous sport with his consort named Pushṭi, which is also graphically described:

सिन्दूराभमिभाननं त्रिनयनं हस्तेषु
पाशाङ्कुशौ
बिभ्राणं मधुमत्कपालमनिशं
सार्द्धेन्दुमौलिं भजे ।
पुष्ट्याश्लिष्टतनुं ध्वजाग्रकरया
पद्मोल्लसद्धस्तया
तद्योन्याहित पाणिनात्तवसुमत्पात्रोल्ल
सत्पुष्करम् ॥
(ibid, 70)

The commentary refers to another dhyāna-śloka of the same form but with ten hands:

बीजापूरगदे शरासनमरिं मालां च दक्षैः करै-
र्वामैर्बाणसपाशकोत्पलरदान् रत्नाढ्यकुम्भं
दधत् ।
सिन्दूरारुणविग्रहस्त्रिनयनो योन्यस्तशुण्डो गणः
सल्लिङ्गाहितपाणिमम्बुजकरां पुष्टिं वहन्
वोऽवतात् ॥

Śāradā-tilaka-tantra (13,77-79) mentions another variant form of Mahā-gaṇapati, whom the commentator identifies as Śakti-gaṇapati:

मुक्तागौरं मदगजमुखं चन्द्रचूडं त्रिनेत्रम्
हस्तैः स्वीयैर्दधतमरविन्दाङ्कुशौ रत्नकुम्भम्।
अङ्कस्थाया सरसिजरुचः स्वध्वजालम्बिपाणे-
र्देव्या योनौ विनिहितकरः रत्नमौलिं भजामः॥

It may be noted that these forms are almost identical in essential details, But the tāntrik texts mention different colours of the forms, different mantras for them, different articles employed during worship, different objectives, different rituals of oblations (tarpaṇa-homa) and different yantras.

Another interesting tāntrik form is Heraṁba-gaṇapati, five-faced, ten-armed and lion-riding. Śāradā-tilaka-tantra (13,105) explains that the form has grown out of the mantra 'Oṁ guṁ namah'.

पश्चान्तको (ga) बिन्दुयुतो वामकर्णविभूषितः (uṁ)।
तारादि (oṁ) हृदयान्तोऽयं (namah) हेरम्बमनुरीरितः॥

The form is calculated to bestow, when worshipped, all the four values of life, (dhrama, artha, kāma and moksha) and hence the mantra has four letters (ibid, 106):

चतुर्वर्णात्मको नृणां चतुर्वर्गफलप्रदः।

The five faces of the god have five different colours: the top one being pearl-coloured, and the remaining four (facing the four directions) gold, blue, white and red (in the circumambulatory order). Each of the faces has three eyes and a moon on top. The body is of the complexion of sun. The pair of normal hands carry gestures of boon-bestowal and protection, and the other four pairs modaka and tusk, axe and skull, rosary and hammer, and goad and trident; the trunk carries a pot (dṛpta) (ibid, 107):

मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रि
नेत्रान्वितै -
र्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम्।
दृप्तं दानमभीतिमोदकरदान् टङ्कं
शिरोऽक्षात्मिकां
मालां मुद्गरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं
भजे॥

The commentary adds a variant dhyāna-śloka giving different weapons in the hands and giving the body-colour as reddish, without mentioning the colours of the five faces:

वन्दे दोर्भिर्दधानं जपवलयभुजे साङ्कुशे
मोदकाभी-
टङ्कानुद्यत्कपालं भुजगवररदान्
स्वर्णकुम्भाढ्यशुण्डम्।
सिंहस्थं पञ्चवक्त्रं त्रिनयनमरुणं
दिव्यवस्त्रोरुभूषम्
हेरम्बाख्यं महान्तं गणपतिमखिलस्वार्थदं
प्रार्थयेऽहम्॥



MAHĀ-GAṆAPATI



GAṆAPATI
(Nañjanguḍ)



GAṆAPATI
(Nañjanguḍ)



Ganeśa-purāṇa (upāsanā-khaṇḍa, 37, 12-13) prescribes that this form must be accompanied by the two consorts Siddhi and Buddhi, and must have a serpent as his sacred-chord.

सिंहारूढो दशभुजो व्यालयज्ञोपवीतकः
कुङ्कुमागरुकस्तूरीचारुचन्दनचर्चितः ।
सिद्धिबुद्धियुतः श्रीमान् कोटिसूर्याधिकद्युतिः
अनिर्वाच्यस्वरूपोऽपि लीलयाऽसीत्पुरो मुनेः ॥

Apart from the tāntrik forms, Gaṇapati has various other forms which are worshipped at home and in temples. All these forms have some common features which are included among the classical forms (shoḍaśa-guṇa):

1. elephant-face (gaja-mukha);
2. curved trunk (vakra-tuṇḍa);
3. protruding belly (laṁbodara);
4. dwarfish stature (kharva); legs being very short ('pādāṁbujābhyām ati-vāmanābhyām', Śāradā-tilaka, 11, 140)
5. odd-appearance (vikaṭa);
6. fan-like ears (śūrpa-karṇa);
7. small eyes (hrasva-netra);
8. long trunk (laṁba-nāsikā)'
9. black tusks (śyāma-danta);
10. ash-grey colour (dhūmra-varṇa);
11. naked or clad in tiger-skin (digaṁbara, vyāghra-charma)
12. bald head (khalvāṭa);
13. fond of eating (charvaṇa-lālasa);
14. hidden ankles (gūḍha-gulpha);
15. carrying a water-pot (kamaṇḍalu-dhara);
16. rat as mount or banner (ākhu-ketana):

Early texts (like Bṛhat-saṁhitā, 57, 58) give a very simple description of the form, where elephant-face, big belly, and single tusk are prominent; the common weapon is axe:

प्रमथाधिपो गजमुखः प्रलम्बजठरः कुठारधारी स्यात् ।
एकविषाणो बिभ्रन्मूलककन्दं सुनीलदलकन्दम् ॥

While the above verse from Bṛhat-saṁhitā suggests only two hands for the god (one carrying an axe and the other a radish), the commentary on the text by Utpala provides four hands and three eyes:

